रैः॥प्रभुभिरुदितसत्यैस्त्रिस्त्यैर्बुधः स्पृहयेत्कः॥२६॥ बालत्वेवातरुणिमनिवाप्रायशोवार्धकेवामृत्वामर्त्यावितथमभटैर्बध्यमानाव्यथंते॥
श्रेयस्तेषाममितविपदांजीवतांवाकिमास्तेकस्मिन्प्राग्भेपुनरनडुहांकर्षणक्लेशहानिः॥२७॥ विश्वावसुः॥ सत्यंतथापिमास्मसर्वेषुत्याश्च
यमानुषजन्मदूदुषः॥ रामःक्षेमस्यदाताभुविननुमनुजोरावणस्यप्रहर्तातत्तातःकिंनमर्त्यस्त्रिदशकुलपतेर्दैत्ययुद्धेसहायः॥ कृष्णोवृष्णौसु
दंयोहरतनरतयानःश्रुतःकिंत्वयासौकेतेदेवाःप्रभावात्स्वयमतिशयितामानवाहानवावा॥२८॥किंच॥ मांधाताचभगीरथश्चसगरोमान्यः॰
ककुत्स्थोरघुःपूरुःसोपिपुरूरवाःसचशिबिःपुण्यश्चरुक्मांगदः॥ वैदेहोनहुषश्चहैहयपतिर्वीरोययातिर्नलःपार्थश्चेतिनृपाःप्रशस्त॰
यशसःप्रादुर्बभूवुर्नकिम्॥२९॥ कृशानुः साधीयोगीकारम्॥ कामंजनाःकेपिगुणाभिरामाःक्ष्मातलेसंतियुगांतरेषु॥ कलौयुगेस्मिन्गुणल
वबंध्याःसर्वेपिखर्वेतरदोषभाजः॥३०॥ मदेतरेस्मरमलीमसमानसानांमन्युस्पृहादुरभिमानमदास्पदानाम्॥ कालेकलौकलुषतःकलितो
दयानांदोषायदृष्टिरपिहंतदुरीश्वराणाम्॥३१॥ विश्वावसुः॥ तथापिसर्वेकलिकालिकाअपिमानुषानदूषणीयाः॥यतःसर्वकालमपिसंत्येवसाध
वः॥पश्य॥दुरितभरितक्षीवक्ष्मापप्रसादनिरादराःकमलनयनस्वैरक्रीडागृहायितहृद्गुहाः॥निगमपदवीनिर्वाहापेक्षितावुदिताःस्वयंकृतिनः
कृतिनःसंदृश्यन्तेकलावपिनिर्मलाः॥३२॥ अथवा॥ यदितेमदीयेवचसिनविश्रंभसंभवस्तर्हितत्रतत्रसंचारमारचय्यतत्तद्गुणप्रदर्शनंकर॰
वाणीतिविमानमग्रतःस्थापयन्नंगुल्यानिर्दिश्य॥ इदंबदरिकाश्रमस्थलमभिदैवनारायणस्तपस्यतिनमस्यतांस्थिरतमंतमःशोषयन्॥ वि
कासिधिषणोन्मिषद्भूषयवर्जनाःसज्जनाजनार्दनमहर्निशंभुजगमंचमंचंत्यमी॥३३॥ कृशानुः॥ सत्यंतवात्रगुणवत्तासमर्थनंनरोचतेमह्यम्
॥यदत्रजागर्तिशिलासमंहिमंक्षशीतलागंधवहाश्चदुःसहाः॥जलावगाहाच्चकितोजनस्ततःकुतस्त्वनुष्ठास्यतिकर्मनिर्मलम्॥३४॥ विश्वा
१ इन्द्रस्य २ महत्तरः ३ वसुः॥

वि॰वि॰ वस्कः॥अस्मदनुकूलंमेतद्भवतिभवदुक्तम्॥ परमहिमयुतत्वात्स्माप्रवैकुंठसाम्यंपदमिरसुपयांतःपंडिताःशांतिमंतः॥मुहुरिहसमयेषुस्नानहेतोः
२ सरोगास्तदपिभृशमरोगास्ताह्म्यकेतोः प्रसादात्॥३५॥ इतिविमानमन्यतःप्रस्थाप्यसांजलिबंधम्॥साकेतायनमः पुरायभवतुस्ताकेतरश्रीप्र
षेनानादोषमुषेतदंतरजुषेदेव्यैसरय्वैनमः॥ येमीतत्तटभूमिषुप्रविलसद्रूपाश्वयूपास्थितास्तेभ्योभानुकुलीनकीर्तिलतिकोपघ्नायितेभ्योनमः॥३६
पुनःपुनर्निरीक्ष्यसभक्त्युन्मेषम्॥ भवसागरशोषणेनपश्यच्चेरणान्तःपुरजीवनौषधेन॥ रजसारघुनाथपादभाजारचितांहः प्रशमामिमांनमामि
॥३७॥ पुनःसानुस्मरणरोमांचकम्॥ कल्याणोल्लाससीमाकलयतुकुशलंकालमेघाभिरामाकाचित्साकेतधामाभवगहनगतिक्लांतिहारिप्रणामा
सौंदर्योद्गीर्णकामाधृतजनकसुतासादरापांगधामादिक्षुप्रख्यातभूमादिविषदभिनुतादेवतारामनामा॥३८॥ दशाननकुशासनत्रसदशेषलो
कव्यथाविलोपकररोपकोवसुमतीसुता वल्लभः॥ कूपारसमशरसंसृतिपयोनिधेस्तारकं कृषीष्टसमुरुघीष्टकृत्क्षपणतैकतानेमपि॥३९॥अ
पिच॥सजयतिचित्रचरित्रोयस्यहिवरचरणपुष्करकरेणुः॥ महिषीमृषिसिंहस्यप्राजीजनदपिदृषोदयेहेतुः॥४०॥श्रेयांसिभूयासिमुहावद
न्यः प्रेयान्सदेयाज्जनकात्मजायाः॥ काकायकेकायचयोदितेष्टदाप्नायकौशायचराक्षसाय॥४१॥ अपिच॥ अभीष्टघटकः क्षितावतुलदीप्ति
कोदंडभागितिक्षममिदंपुनःपरममद्भुतंब्रूमहे॥विधूतपरमार्तिकोविघटितारिचक्रःस्वयंसकुंभजनकंप्रभुःशकलयांबभूवक्रुधा॥४२॥ कृशानुः॥
१परमहिमाविष्णुः पक्षेअतिशीतम् २रोगसहिताः सरोवरगामिनश्च ३अयोध्यायै ४आश्रयदंडवत्संज्ञातेभ्यः ५पश्यतोचरणौयस्येतितथाविधोगोतमः तदंतःपुरंअहल्या
तज्जीवनंपाषाणत्वनिरासपूर्वकमानुषीकरणंतत्र औषधरूपं ६लज्जितः ७कुर्यात् ८वरश्रेष्ठोयश्चरणकमलसंबंधीरेणुः ९ ऋषिश्रेष्ठस्यगौतमस्यपत्नीम् १० दृषःसुदृढंतंउल्लं
घ्यचरणशुंडाग्रजोगजः सिंहस्यमहिषीजनयामास दृषोदृषभस्तस्योदयेहेतुरितिचित्रम् ११ अभीष्टजनकः पक्षेअभीष्टोघटकःकुंभोयस्य १२ अतिकांतिकोदंडवान्पक्षे
अतुलादीप्तितेजःसंजननद्रव्यंयस्येत्यतुलदीप्तिकः दंडभाक् इतिच्छेदः १३ परमपीडा पक्षे मृद्विकारः १४ शत्रुसमुदायः पक्षेआगविशिष्टंचक्रम् १५ रावणः कुलाचलश्च २

कथंनामरामभद्रमनुचितकर्माणमध्येचमीडिषे॥ वर्षीयानपिजानकीसहचरोमातुः सपत्न्यामुदेसंपल्लंरथहस्तिपत्तितुरगैः संत्यज्यराज्यंनि
जम्॥ विंद्न्हंतघनंवनंकथमसौनस्यादयुक्तक्रियोगव्यंदुग्धमपास्यपास्यतिजनः कोवायवागूरसम्॥४३॥ किंच॥ धिक्कैकेयीवद्शास्यदर्पशम
नंधीशालिनंवालिनंसोयंराक्षसवर्गनिग्रहकृतेसुग्रीवमन्वग्रहीत्॥ तुंगप्रस्तरभंगलिप्सुरिहनिःशंकंत्रुटंकंत्यजन्संकल्पंकरुयेतपंकजद॰
ल्लादानप्रसंगायकः॥४४॥ कृत्वासेतुंकिलजलनिधौखंडयित्वादुरध्वानूलब्धादेवीस्फुटविदितसंशुद्धिमग्निप्रवेशात्॥ भूयोप्येनांश्रुवंन
जननींभूमिकेन्यामनन्यांमंतर्वत्नीमनयतवनंहंतपौलस्त्यहंता॥४५॥ विश्वावसुः॥ सर्वेषुगुणेषुदोषाविष्कारंकथंकारमारचयसि॥ गुरावसत्यो
क्तिनिरासहेतोःस्वराज्यमग्र्योपिसरामचन्द्रः॥ तृणायमेनेनिपुणोयतेनफणाभृदीशोपिपणायितुंनम्॥४६॥ किंच॥ वालिनिबलोर्मिमालिनिजा
ग्रतिसुग्रीवमग्रहीद्दयम्॥ अस्यकृतिशतविदितंसुव्यक्तंतेनुदीनबंधुत्वम्॥४७॥ किंच॥ लक्ष्मीवस्थसिबिभ्रदप्यविरतंरामाकृतिःश्रीपतिर्वै॰
त्तिकामपिमानुषीमभिनयन्वीराग्रयायीप्रियाम्॥ कल्याणीतुवनीमनीनयदहोकस्याप्ययमृष्यन्वचोमेदिन्यामवलोकितःकिमपरोमानीपुमानीदृ
शः॥४८॥ वसुः॥ तस्तु॥ गातुकईर्ष्येश्रितरामभद्रानूगणानगुणानांगणनादरिद्रान्॥ प्राचेतसाद्याःकवयोनवद्यायदेकदेशाकुलनेपिनेशाः॥४९॥
तथापि॥ तदीयगुणार्णवकणानामेकदेशलेशकुंटितमांशुकलामात्रमिदमत्रभवताश्रोतव्यम्॥ काकुत्स्थकुलपर्यायकरुशार्णवकौस्तुभः॥ कौ
सल्यासुकृतव्रातकल्पकप्रसवोदयः॥५०॥ प्रौढपंक्तिरथागारपरिष्कारहरिन्मणिः॥ जानकीलोचनद्वंद्वचकोरानन्दचंद्रमाः॥५१॥ संसारमार्ग॰
संचारश्रांतच्छायामहीरुहः॥ सर्वपातकवेतालसमुच्चाटनमांत्रिकः॥५२॥ करुणारसकल्लोलपीयूषवरुणालयः॥ तपोधनजनाकांक्षातटाकावन
तोदयः॥५३॥ विद्याविरहणोद्यानविनयास्थानमंडपः॥ सौरभ्यप्रभवोत्कर्षसमावेशनिवेशनम्॥५४॥ टि०॥ १कांजी २ सीता ३ नविद्यतेन्योनुचरादिर्य
स्यास्तामेकाकिनीमित्यर्थः ४रावणः ५समर्थोभाति ६स्तोतुम् ७अरण्ये ८विपुलान् ९क्षीरसमुद्रः १०दशरथः ११अलंकरणम् १२समुद्रः १३प्रभुत्वंप्रतापोवा ॥ ॥

वि॰द॰ सौजन्यवादान्यकयोः सामानाधिकरण्यभूः॥ सौमुख्यमुख्यभवनं सौहार्दैकवितर्दिका॥ ५५॥ अद्भुतोत्साहशक्तीनामसाधारणजीविका॥ प्रसादलु
४ ख्याः प्रासादः प्रसादस्य परा गतिः॥ ५६॥ प्राणप्रतिष्ठा क्लिष्टानां प्रपन्नानां परायणम्॥ अनपायसमृद्धीनामवगाहनदीर्घिका॥ ५७॥ जंभशासनजीवा
तुर्जन्मगेहं जयश्रियः॥ दुर्वारघोरत्रारिद्र्यसर्वंकरखगेश्वरः॥ ५८॥ नत्ताहुंकृताटकादेहध्वान्तराजीवबान्धवः॥ सुबाहुमत्तमातंगसंहारखरकेसरी॥ ५९
भार्गवग्रहदावाग्निपरिवर्जननिर्झरः॥ विराधाख्यदुरातंकविद्रावणमहौषधम्॥ ६०॥ खरदूषणकिंपाकखंडनैकपरश्वधः॥ दुर्मोचनीयमारीचकीच
कप्रबलानलः॥ ६१॥ गृध्रराजस्य नाकादिलोकाक्रमणवर्त्तिनी॥ कबंधमयकासारकवलीकरणातपः॥ ६२॥ शबरीचित्तकह्लारशारदज्योत्स्नको
दयः॥ पावमानियशःकाशप्रकाशशारदागमः॥ ६३॥ प्रगल्भवालिजीमूतप्रोत्सारणसमीरणः॥ सुग्रीवराज्यसामग्रीसूदितानौकसाम्॥ ६४॥
दुर्निरोधधुनीनाथजाड्यरोगचिकित्सकः॥ दुष्टनक्तंचरस्तोमधूमकेतुविजृंभणम्॥ ६५॥ कुंभकर्णमदांभोधिस्तंभनेकुंभसंभवः॥ बली यो रावणप्रा
णपाषाणदलने पविः॥ ६६॥ बिभीषणस्य साम्राज्यविश्राणनसुरद्रुमः॥ अयोध्यापुरनारीणाम स्मरोऽत्यद्भुतोत्सवः॥ ६७॥ अभिषिक्तो यथावच्च वसि
ष्ठाद्यैर्महर्षिभिः॥ रमते सुमतेजस्वी रामः कामसमो हृदि॥ ६८॥ अत्र किल पवित्रचरित्रः कश्चिद्भूपश्चिरं जसम्रमित्थमनुसंधत्ते॥ ध्यायामि रामभिराम
गिराम रं दधानुगमद्भ्रमितेराममरैर्विरामम॥ आराममद्भुततरामलसद्गुणानां घोरामयघ्नमसुरामरवंदिताङ्घ्रिम्॥ ६९॥ दयासमुद्रयालये सुदधिकान
नेकानने पलाशनपलायनप्रणयिका मुकेधार्मिके॥ समीरजसमीडिते प्रविशचित्त मे सत्तमे बलीकृतवली मुखे मनुजधर्मिणि ब्रह्मणि॥ ७०॥ अ
२०
स्त्रामास तृणं प्रियाद्रुहि तृणामासस्मरारेर्धनुर्दारामास मुनेः शिलापि नृवरामास स्वयं पादुका॥ कुल्यामास महार्णवोपि कपयो योधा बभूवुस्तदा पौल
१ औदार्यम् २ इंद्रः ३ जीवनौषधं ४ रोगः ५ दुर्लक्षः ६ भार्गः ७ कबंधाख्यो दानवः ८ हनुमान् ९ यशोलक्षणदंभभेदः १० समुद्रः ११ विध्वंससूचकोत्सातप्रसरणं १२ अगस्त्यः १३ व
च १४ दानं १५ प्राप्तभार्ये १६ अधिकप्रीतियुक्तमुखे १७ राक्षसाः १८ हनुमान् १९ वानरः २० अस्त्रवदाचरति स्म अस्त्रत्वं प्रापेत्यर्थः एवमग्रेतृणामासेत्यादिष्वबोध्यम्॥ ४

स्त्योमशकोबभूवभगावंस्त्वंमानुषीमासिथाः॥७१॥अशिलाश्रापादपैरेरक्षान्वरमुक्तिदैः॥असर्वभूताभयदैरशर्वधनुर्दनैः॥७२॥अब्रह्मास्त्रीह्न
ततृणैरतृणिकृतरावणैः॥अलंकातरदैवैस्तैरलंकापुरसाधकैः॥७३॥इतिविमानंदक्षिणतःप्रस्थाप्यकृशानुमुद्दिश्य॥शिथिलितभवखेदाम्श्लि
ष्टवैकुंठपादाकृतविपदपनोदाकृष्टचित्तप्रमोदा॥विमलतरतरंगाविश्रुतांभोधिसंगाविहितदुरितभंगावीक्ष्यतामत्रगंगा॥७४॥कृशानुः॥उपे
क्षणीयानिभागीरथीयानिपानीयानिकिमितिवीक्षणीयानि॥यतः॥येषांजनिश्चरणतस्तकहिरण्यहर्तुर्दोषाकरेणगुरुदारविटेनमूर्ध्नि॥ब्रह्मांत्त
मांगाभिदएवसहस्थितिश्चरत्यातोलयोजलैनिधौकिलगांगवाराम्॥७५॥विश्वावसुः॥शांतंपापंमंदमत्तेकिमुकुंदपादारविंदनिष्यंदिनींधुनीम
पिनिंदसि॥पश्य॥गंगानिवारिगरुडध्वजपादपद्मादाविर्बभूवपुनरप्युनरिंदुमौलिमू॥निन्युर्विचित्रमममृतेसगरान्वयंचनेतोधिकंभुविपवित्रत
मंसमंवा॥७६॥किंच॥सासर्वतोमुखवनीतटिनीसरोगांमूर्त्तिविधेरिवबिभेतिसरस्वतीच॥भेदस्त्वियान्बलिभिदश्चरणारविंदादाद्याबभूव
चरमाकिलनाभिपद्मात्॥७७॥अपिच॥भागीरथींप्राप्यबुधाःपितृभ्योजलांजलीन्सादरमर्पयंति॥पापानिसर्वाणिततःपितृणांभवंत्यहो
दत्तजलांजलीनि॥७८॥अन्यच्च॥भागीरथीयःपदधीरुपास्तेयथाकेतुन्यायूतएषधन्यः॥देवत्वमेत्यत्रिदिवेसुधायांभागीरथीतिव्यपदे
शमेति॥७९॥सरस्वत्याश्लिष्टासंवितततनपालिंगितझरास्फुरद्गुच्छस्वच्छाप्रकृतिरिवभातित्रिगुणभाक्॥तथाप्येषादोषापनयनपटुत्वाक
लनयाप्रगल्भंसंसारंप्रशमयतिकंसारिपदभूः॥८०॥किंच॥गांभीर्येणगदाधरस्यहृदयंमाधुर्यतस्तद्गिरंस्वैतिम्नाचयशस्तदीयमनघंशैत
ल्यतस्तत्कृपाम्॥नैर्मल्यातिशयेनतस्यधिषणांनित्यप्रसादेनतद्दृक्कंचानुसरंतितत्पदभुवोवाराशिरीराइमे॥८१॥इतिबद्धांजलिरग्रतोःव
१अहल्योद्धारासमर्थैः२निरासः३हिरण्याक्षः सुवर्णंच४चंद्रःदुर्गुणखनिश्च५शिवःब्रह्माच६लेषेउभयोरैक्यादुभयमपि७मोक्षः पीयूषंच८राजविशेषःविषयुक्तंच९ज
लवतीचतुर्दिगंत्तिमुखवती१०रक्तिमाप्रीतिश्च११नदीवाणीच१२विष्णुः१३योयादृशींदेवतामुपास्तेततत्सारूप्यंप्राप्नोतीत्येषन्यायः१४सुधायांभागीतियोजना१५रथी
इतिव्यवहारंच१६माया१७सल्लादयः१८गंगा॥

लोक्यसानंदम्॥ काशीसकाशीभवदिंदुगेहसौधाग्रभागा बहुस[1]न्निनागा॥ इंधेमयूखैर्वि[2]यमंधकारव्युत्पत्तिशून्याशिवशेखरेंदोः॥८२॥ कृशा-
नुः॥ वयस्यकिमेषापितवस्तवास्पदम्॥ पद्म्य॥ येमिष्टान्नभुजोगजोत्तमहयारोहाः स्वगेहांतरेसक्ताभिर्महिलाभिरत्रविरहंरंपाशुकमुक्तास्त्र-
जः॥ तेघोरास्थिधराविराजदनडुह्वाहाविषाहारिणो नर्निर्भ्यस्यवशाः श्मशाननिलयानीचैःपिशाचैःसमम्॥८३॥ काशीसुहृत्॥ दत्तंसाधुसु-
देयदेकमपितत्क्षेत्रप्रभावाद्भवेत् कामंकोटिगुणंभवांतरइतिख्यातंत्वयिस्वास्थया॥ वासंप्राप्यसुदुर्बहूनिददतोवासांसिजन्मान्तरेलोकाहंत-
भजंतिदिग्वसनतांहेकाशिसुभ्यंनमः॥८४॥ वाराणसित्वयिसदैवसरोगभूमावारोग्यभूमिरितिकाममलीकवादः॥ संतस्त्वमुषांभवतियत्रवपु-
स्थूलंजन्मान्तरेपिजडभाववदुत्तमोगम्॥८५॥ विश्वावसुः॥ अनिपुणधिषणगुणमपिकिमितिदोषीकरोषि॥ यदेतन्नगरवासिनाभोगिनापि
योगिनासुप्यप्राप्यंशिवसारूप्यमाप्यते॥ अत्रदेहमपवित्रमपास्यन्नच्छमृच्छतिवपुः किलयस्य॥ लोचनेश्च विरवाप्तनिटालेमस्तकेहरिप-
दांबुजटालेश॥८६॥ अदःपुरवासिनामन्याप्येषाधन्यता॥ प्रदोषवत्साम्राइहप्रदोषेनटोंधकारिर्व्यपदेशमेति॥ प्रकाशपूर्वेषद्दितरेकोद्यहूर्णां
न्नूणांकृतान्भःप्रदेशे॥८७॥ इतिगंगातीरजनपदंकृत्स्नमवेक्ष्यसांजलिबंधम्॥ प्रातःप्रातर्जान्हवीवारिभक्त्यागाहंगाहंकृमनित्यक्रियेभ्यः॥
पुष्पगंधपूरुषंपूजयद्भ्यः पूतात्मभ्योभूसुरेभ्योनमोस्तु॥८८॥ कृशानुः॥ किमेतद्देशवासिनोपिब्राह्मणाः केवलंकुलिमाहात्म्याकलितशास्त्री-
यस्कृचर्याविपर्ययास्त्वयानमस्क्रियंते॥ पश्यतावत्सायेणास्यकाशीदेशीयजनस्यस्कृचर्याविपर्यासम्॥ प्रातर्दंतकृतापवोपरिजकसृष्टान्ज-
डोरासभैरूढान्धारयतेपदानन्नुदिनंधृत्वाबहिर्गच्छति॥ गत्वाम्लेच्छसुखाश्चीन्स्पृशतिचस्पृष्ट्वापिनस्नात्यहोनस्नातोप्यथ-

१अम्बः२अंधकारोपलब्धिरहिता३जन्मांतरे४श्रद्धया५नग्नत्वंअथचशिवत्वं६स्मरसा उदकेनाच्छतीतिसरोगाभूमिर्यस्यांतस्यांहगंगायामित्यर्थः रोगसहितायांच
७वासकर्तॄणां८आयुधंरोगश्च९जलविशिष्टंडलयोरैक्याज्जलंच१०सुंदरः११अग्निः१२अथवासंभासंनिटालंभालंयस्यतस्मिन्१३जटायुक्ते१४प्रदोषकालेनर्तनकर्ता
१५तारकमंत्राक्षराणिनक्षत्रप्रभाश्च१६स्नात्वास्नात्वा१७कृतस्नानः॥

भुंक्तएवचपलोभुंक्त्वापिनव्रीडति॥८९॥ किंच॥ शास्त्रेजीवतिद्वास्त्रमुद्ग्रतिपरंशूद्राहृतैरंबुभिःस्नात्याचामतिदेवताःस्नपयतिस्वैरंपचत्योदन
म्॥ उच्छिष्टान्नबिभेतियातियवनैरुच्चावचैःसंगतिंमांतंगान्निकटगतान्गणयन्मार्गान्मुहुर्गाहते॥९०॥ अपिच॥ नीचैर्दुर्यवनैःशुनीभिरपि
वानिःशंकमालोकितंभुंक्तेपंक्तिविदूषकैःसहनरैरज्ञातवेदास्पदैः॥मद्यास्वादनमत्तविन्नजनैतामोहायभीहानितःकर्माण्यारभतेश्रुतिस्मृति
वचोत्तराण्यसाराण्यहो॥९१॥ अपिच॥ कन्यांकामप्युदूह्यप्रविजहद्दुर्यद्यौवनामप्यनां द्रव्याशापाशकृष्टोभ्रमतिचिरतरंहंतदेशांतरेषु॥ अ
न्योन्यंभोगवांछाविगलितवयसोरात्तमालिन्यमस्यांदंपत्योर्व्याकृतंवैहतविधिरुभयालौकयोःशोकयोगम्॥९२॥ अपिच॥ नाऽधीतेऽत्रजं
नोयदिकथमपधीतेशतेष्वेकहस्त्येवा॥दुस्तर्कैःशुश्रामयतिदूरीकुरुतेश्रुतिस्मृतिसत्तर्कान्॥९३॥ विश्वावसुः॥ कष्टमरेब्राह्मणनिंदांशृण्वतःकंपते
मेहृदयम्॥ यस्त्वयोपन्यस्तःसच्चर्याविपर्यासःसएषकलेरेवदोषोनब्राह्मणानाम्॥ कलौयुगेक्वतेयुगंचरित्रंकुत्रनामसंभाव्यते॥दुरितेहतिः
कोपध्मात्मादुर्जयःखलुकलिः।पशुपाहर्म्यस्थानमधर्मकर्मवितततेदुर्मानमर्मासनंशास्त्रस्तोमललाटभूलिपिलयःशांतिःसर्वानामपि॥ सर्वोम्ना
यवचःसमापनदिनंसस्यासदाचाविधेर्थाशाजनिभूरभूदिहमहोनर्थाविल्लोयंकलिः॥९४॥ एताहृशेकलियुगेपिशतेषुकश्चिज्ज्ञानादरोजगतियः
श्रुतिमार्गएव॥ यत्किंचिदाचरतिपात्रमसौस्तुतीनांश्लाघ्यंमितापमपिकिंनमरौसरश्चेत्॥९५॥ किंच॥ येकायस्थजनाश्चयेनृपसुतायेचहूणं
जाःशास्त्रिणस्तेयत्नादनुसृत्यनिर्दयतयाशुष्कांस्तरुष्काधिपान्॥देवानूभूमिसुराश्चपांतिकृतिनस्तेचेन्मुधोदासैतेब्राह्मण्यायजलांजलिः
किलभुविप्राज्ञैःप्रदेयोभवेत्॥९६॥ सर्वतोदृष्टिंप्रसार्यसश्लाघम्॥ आक्रांतासकलवसुंधरासुयवनैरासेतुहेमाचलंविद्रोणेक्षितिभृद्गणेविकरु
णेनिद्रातिनारायणे॥ निर्विघ्नप्रसरेकलावपिबलान्निष्कंठकंवैदिकंपथानंकिलतत्रतत्रपरिपात्यैकोहिलोकोत्तरः॥९७॥ टी०॥ १दुर्जनः२चांडाला
न्३भ्रष्टाः४जनसमूहः५विवाहितांकृत्वा६त्यजन्७आलिंगनम्८कृतयुगसंबंधि९पापवल्याश्रयः१०समाप्तिः११स्वल्पोदकम्१२उदासीनाःभवेयुः१३नष्टे॥

पुनश्च्वंसश्लाघम् ॥ त्यजतुविहितमेतद्देशवासी निषिद्धं भजतुतदपिलोके[१] नास्तिधन्यस्तदन्यः ॥ त्रियुगपदनखश्रीदत्तशुद्धिर्यदंगे लगतिदुरित
भंगेलग्नको गांगपूरः ॥ ९८ ॥ ओढेषुगौडेषुचकान्यकुब्जेष्वंगेषुवंगेषुचमैथिलेषु ॥ अन्येषुसत्स्वेवबुधेषु धन्येष्वद्यापिजीवंत्यधिभूमिविद्याः
॥ ९९ ॥ एवंतावदवधेहि ॥ एतद्देशप्रचुरचरितान्यन्यदेशस्थितानां रोचंतेचेन्ननुनमनसे मास्फुरन्काश्चहानिः ॥ प्राज्ञाःपुत्राजननपितृहृदे
पश्यपद्मत्सदंतेतद्दूछिद्यन्नपरमनसेतावता कोत्रदोषः ॥ १०० ॥ किंच ॥ प्रातःशीतजलेनिमज्ज्य विबुधानभ्यर्चयत्युच्चकेरार्यैःपर्युषितंतुना
भ्यवहरत्यधःस्कधांधोप्यसौ ॥ भोगेगोमयलिप्तएवपचतेभुंक्तेततोन्यत्रयन्नीतंतद्विजहातिभुक्तिनियमोदृष्टःक्वभूयानियान् ॥ १ ॥ इतिवि
मानदूरतःप्रस्थाप्यसांजलिबंधम् ॥ भुवनकदनक्रुद्धहृद्बृत्रवःकुलिशायुधप्रचकितगिरिप्राणत्राणप्रतिष्ठितकीर्तये ॥ प्रसमरमरुन्नाट्याचा
र्यप्रणर्तितविचयेमहितजनतामाह्यायांस्मैमहोदधयेनमः ॥ २ ॥ कृशानुः ॥ प्रहासम् ॥ पामरैरप्यपेयानांमीराणांपरिपातरि ॥ आश्रयेजलजं
तूनामानिनंसाकथंतव ॥ ३ ॥ ममत्वेधमानपरुषघोषेरवल्वेतस्मिन्रोषएवसमुन्मिषति ॥ सततंक्रंदतेसर्वोदीप्यमानोदरग्नये ॥ महापाय
समुद्राय्यरिप्रायेवकुप्यति ॥ ४ ॥ समृद्धोप्ययमपिलुब्धतयाबुद्धिमद्भिरनादृतः ॥ १४ ॥ रत्नाकरोपिचरमाभ्युदयालयोपिस्वर्णेस्थितोपिग
तापिबद्धर्मिकोपि ॥ तादृघ्घनोपचयकेसरणिप्रचारान्नोपेत्यहोवितरणित्वमसौकदापि ॥ ५ ॥ सृष्टिरेवास्यविफलेतिमेदृष्टिः ॥ तथाहि ॥ नास्त्येषामुप
युक्तातटतरोःसस्योपयोगःकुतोनस्नानायचयोग्यतास्यपयसोकानामपानार्हता ॥ उद्गर्जतमियंतमंतरुपितैर्दुर्जन्तुभिर्भीषणस्त्रष्टुःसृष्टव

१ऐश्वर्यषट्कसंपन्नःश्रीविष्णुः२प्रतिभूः३अधिभूमिइतिच्छेदःभूमावितितदर्थः४नाशः५स्थिरः६प्रशस्तगतिः७डलयोरैक्यादर्थद्वयम्८नमस्कारेच्छा९व
र्धमान१०कठोरशब्दे११दीप्यमानउदरेऽग्निर्वडवानलोयस्यतस्मैपक्षे सुहूशाद्दीप्यमानजठराग्नये१२महापायसमुद्रायेतिच्छेदःमहत्यःआपोय
स्येतिपक्षेएकंपदंमहनीपायस्यविषयेमुद्रायाचनचिन्हम्यस्येति१३सुवर्णम्जलंच१४वीचयःअंगुलीयकानिच१५संचयकर्त्तामेघोत्पादकश्च१६ना
तत्वंनौकारहितत्वंच१७अंतस्थितैः॥१ब्रह्मणः॥ ६

तोजलाशयममुं कोवाशयः कथ्यताम्॥६॥ यस्य स्वर्णश्रियउरुतरा नित्यमायांत्ययत्नात्तेनस्वाप्रत्यनुगुणतया नक्रियेतव्ययश्चेत्॥ वन्हिया
सोभवति विधिनामंथनंबंधनंवा लक्ष्मीप्रेक्षोजगदधिपतेरत्रसाक्षीसरस्वान्॥७॥ किं बहुना॥ कुंभजपीतोच्छिष्टं शिष्टैरस्पृष्टमर्णवमवेत्य॥ उ
न्नततृष्णोप्युदकं पांथजनोनैवगृह्णाति॥८॥ वि॰ सखेसर्वगुणाकरः सरित्पतिरेषनदूषणीयः॥तथाहि॥ उच्चैःश्रवः प्रदातुर्हृदुच्चैःश्रवसेपुनस्त
द्दत्तुं जाये॥ वामविलोचनदातुर्वदान्यमस्माद्दान्यमर्णवतः॥९॥ किंच॥ अमृतंविबुधेभ्योदादभीष्टफलदंतरुंचधेनुंच॥ द्विवसनायसितांशुकर
मीक्षिलएताहृशः क्ववादाता॥१०॥ अमुष्यखलुभाग्यवत्तांशेषादयोऽपिवक्तुमशक्ताः॥ पंश्य॥ जन्होरपत्यंजगतः पवित्रंकलत्रमब्धेस्तनयः
कलात्मा॥ कन्यानुधन्याकमलाबिभर्तिजामातृभावंजगदीशएव॥११॥ अन्यच्चेदमस्यभागधेयम्॥ यत्तीरेपुरुषोत्तमस्थलमिदं यस्याप्सरः कि
न्नरश्रेष्ठैर्नित्यमधिष्ठितंभगवतः सान्निध्यमुरव्यास्पदम्॥ अत्रस्यक्तवतामसूनूकरगतामुक्तिस्त्तलास्ताम होदेहोदं दविनाकृतोप्यविकृ
तः काष्ठादिवत्तिष्ठति॥१२॥ किंच॥ निवेदितुस्याग्रमासखायनीचाहृतस्यापिकिलौदनस्य॥ भक्त्याशनंदृक्प्रभवार्जितानां महांहसांनाशनमा
मनंति॥१३॥ सभक्तुन्मेषम्॥ दारुणिसन्निहितायप्राज्ञैर्हुतमश्नतेमखेषुहविः॥ शिशिरायनित्यरुचयेशुचयेरचयेयमद्भुतापनती॥१४॥ इति
नमस्कृत्यस्फदूरमन्यतोविमानं प्रस्थाप्यसम्लाघंसखेसएषः सर्वसंपदामास्पदंतयात्रिदशालयस्यादेशइवगुर्जरदेशश्चक्षुषीस्फुटीकरो
ति॥ अत्रहि॥ सकर्पूरस्वादुक्रमुकनववीटीरसलसन्मुखाः सर्वश्लाघाः यदविविधदिव्यांबरधराः॥ लसद्दत्ताकल्पाघुमघुमितदेहाश्चघुसृणैर्यु
१विष्णोः राज्ञश्च२अगस्त्यः३एतन्नामकोश्वःउच्चैरतिशयितंकर्णद्वयंच४इंद्रःबधिरश्च५विष्णुःबधिरबंधुश्च६स्त्रीरत्नंलक्ष्मीरूपंअथवावामविलोचनंचंद्ररूपंतस्यदातुः
सुंदरनेत्रं७ दातारं ८ नग्नायशंकराय ९ चंद्रः वस्त्रंच १० जगन्नाथस्थानं ११ एतत्स्थानेशरीरंदाहं विनात्यक्तमपिकाष्ठवच्छुष्यति १२ पवित्रायअग्नयेच शी
तलत्वंनित्यरुचित्वंचाऽस्मिन्नग्नावद्भुतत्वसंपादकम् १३ भूषणानि॥१४॥ अतिशयितसौगन्ध्यबोधकोलौकिकानुकरणशब्दः १५ काश्मीरजंकेशरइतिप्रसिद्धं

वि॰ २ वानोमोदंते युवतिभिरमी तुल्यरतिभिः॥१५॥ अत्र वधूनामन्यादृशं सौंदर्यं॥ तप्तस्वर्णसवर्णमंगकमिदं ताम्रो मृदुश्चाधरः पाणी प्राप्तनवप्र
७ वालसरणी वाणी सुधाधोरणी॥ वक्त्रं वारिजमित्रमुत्पलदलश्रीसूचने लोचने केवा गुर्जरसुभ्रुवामवयवा यूनां न मोहावहाः॥१६॥ कु॰॥ सत्य
मेवं तथापि न ते सारवस्तूपभोगचतुराः॥ तथाहि॥ क्रीडामारभ्य तिकरवनी विद्युदाभाः कृशांगीः क्रीडायोग्येष्वहह समये गेहएव त्यजंतः
॥ नित्यासक्ता निरुपममणिश्रेणिवाणिज्यलाभे बभ्रम्यंते बहुदिनं परिश्राम्य देशांतरेषु॥१७॥ वि॰॥ मंदमनीष स एव पुरुषाणां गुणविशेष
एव न तु दोषः॥ देशे देशे किमपि कुतुकाद्दृष्टुं तं लोकमानाः संपाद्यैवं द्रविणमतुलं सद्म भूयोप्यवाप्य॥ संयुज्यंते सुचिर विरहोत्कंठिताभिः स
तीभिः सौख्यं धन्याः किमपि दधतेसर्वसंपत्समृद्धाः॥१८॥ अनेवंभावो हि पुरुषाधमत्वमावेदयति॥ तथाहि॥ आकिंचन्याद्दतिपरिचयाज्ज्ञा
ययोपेक्ष्यमाणो भूपालानामननुसरणाद्धिभ्यदेवाखिलेभ्यः॥ गेहे तिष्ठन्नकुमतिरलसः कूपकूर्मः सधर्मो किं जानीते भुवनचरितं किं सुखं चो
पभुंक्ते॥१९॥ किंच॥ ...रांतरमुत्सृज्य वीक्षमाणो वधूमुखं॥ यो गृहेष्वेव निद्राति दरिद्राति स दुर्मतिः॥२०॥ इदं चावधार्यतां॥ इच्छेद्यस्तु सु
खं निवृत्तमवनौ गच्छेत्स राज्ञः सभां कल्याणीं गिरमेव संसदि वदेत्कार्यं विरुध्यात्कृती॥ अकुंठाडंबरं नमर्जयेदधिपतेरावर्जयेद्वल्लभानकुर्वी
त प्रकृतिं जनस्य जनयेत्कस्यापि नापक्रियाम्॥२१॥ अन्यच्चेदमवधार्यतां॥ अयुक्तं युक्तं वा यदभिहितमज्ञेन विभुना सत्क्रयादेतन्नित्यं जडमपि
गुरुं तस्य विनुयात्॥ विवक्षुर्नैस्पृत्यं कथमपि सभायामभिनयेत्स्वकार्यं संतुष्टे क्षितिभृति रहस्येव कथयेत्॥२२॥ इत्यलं प्रसक्तानुप्रसक्त्येति
दूरतो विमानुमानयन् सांजलिबंधम्॥ कृष्णाश्लेषविशेषितासितरुचे कालिंदि तुभ्यं नमः कुंज्येभ्यः श्रितताव कांबुकणिकापुंज्येभ्य एषोंजलिः
॥ गोपीभ्यः परिरिप्सया मुररिपोस्तेषु स्थिताभ्यानतीनोंथायाभिरुपासिता यच्च नमोवाकान धीयीमहि॥२३॥ कु॰॥ कृतं सरवे चोरजारशिरोम
१ पश्यंतः २ दरिद्यात् ३ वासं कर्तुं ४ वासं कर्तुमिच्छुः ५ आलिंगनेच्छा ६ नमस्कारोक्तीः ७

णेः कृष्णस्य जगदूतिसंधानुरनुसंधानेन॥ तथाहि॥ ॥ लुंठित्वा नवनीतमन्यसदने लोलेक्षणो भक्षयन् गोपीभिः परिगृह्य मातृसविधं नीतो मु
कुंदस्तया॥ लुंठे मी नवनीतमित्यभिहितोप्येतद्यलुंठीः किमित्युक्तोऽसौ नवनीतमेवहृतमित्योगेजनन्योन्यधात्॥ २४॥ किंच॥ अंसे सलीलम
पिरोप्यशुकं स्वहस्तात् गोप्याभयाकुलदृशः कुतुकी मुकुंदः॥ अंसंगतं शुकमिहापनयेतिवाचं तस्या निशम्य स तदंशुकमाचकर्ष ॥२५॥ अपि
च॥ नीत्वाराधिकया निशां मुररिपुः प्रातर्गृहानागतस्त्वं माभूरपराधिकः पुनरितिप्रोक्तोपि पूर्वमया॥ कस्मादेवमभूरिति श्रितरुषा निर्भर्त्सितो
लीलयात्वह्वाचैव सराधिको हमितितान्व्यामोहयन्मायया॥ २६॥ वयस्यमैवं वादी॥ सद्दि परमेपावनः सकलजगदंह्नः संहरणकृते कृनावता
रो वंदारुजनामंदमोदप्रदनंदनो निंदापदवीदवीयान्॥ असस्तयाथोभ्युदयस्य पसजगश्चरित्रं जगतः पवित्रम् पुनः परस्मै पुरुषाय तस्मै समस्त
नम्याय नमस्तनोमि॥ २७॥ अस्यखल्वत्यद्भुतं चरितमाकर्ण्यतामू॥ चोरस्य चौर्यं जगतिप्रतीतं चौर्यस्य चौर्येन तु दृष्टपूर्वम्॥ चौर्यांचकार्यपि ब
तश्रुतानि कृष्णस्य मुष्णंति तु मातमोसि॥ २८॥ किंच॥ चित्रं चित्रं जृंभिते कृष्णमेघे कंसप्राप्ता प्रापलोपं समृद्धिः॥ आसीद्युक्तं हानिदाघप्रशां
तिर्हृत्सौ हिंसामानसे कीर्तिरुत्थी॥ २९॥ पुनः स भक्त्युन्मेषं भगवंतमुद्दिश्य॥ कंसध्वंसयते मुरंतिरयते हंसंतथाहिंसते बाणंक्षीणयते बकं लघ
यते पौंड्रं परं लुंपते॥ भौमं क्षामयते बलाहलभितो दर्पं पराकुर्वते कृष्णं प्रणमन्भवते कृष्णाय तुभ्यं नमः॥ ३०॥ इति सुदूरं विमानमान
यन्नवनेजनपदसरिद्गिरिप्रभृतीन वेक्ष्य स विस्मयमीश्वरमुद्दिश्य॥ कत्योषधीः कति तरून् कति वा महीध्रान् कत्यंबुधीन् कति नदीः कति पुंस
एतान्॥ कत्यंगनास्त्वमसृजः कति नाथ देशान्मन्येत वैषमहिमा नहि मातिबुद्धौ॥ ३१॥ इत्यन्यतो गच्छन् पुरो वलोक्य स बहुमानम्॥ महारा
१ वंचकस्य २ अपराधं ३ अमित्यक्षरेण युक्तं स्कंधसंबंधिनं च ४ अपराधी राधाविमुक्तश्च ५ अभिवादकाः ६ दूरः ७ उदिते ८ साम्यातुलम् पक्षे कंउद
कम् तस्मिन् संप्राप्ता ९ हेतिखेदे अव्ययं पक्षे हानिदो योऽघासुरः १० असुरः हंसपक्षी च ११ यशाःपंकश्च १२ उत्थिता॥ ॥ ॥

ष्टाभिरव्योमधुरजलसान्द्रोनिरुपमः प्रकाशोदेशोयंस्फुरपुरनिकाशोविजरते॥ गृहस्थायत्रामीगुणजलधयःकेपिविभवैःसमृद्धाःअह्लातोस्तुह्हरंति
थिपूजांविदधते॥३२॥ कृ॰॥ सखेप्राक्कालीनचरित्रमधुनाकथयसि॥ अधुनाकिलकलिमालिन्यादन्यादृशीरीतिरेतद्देशवासिनामासीत्॥ तथा
हि॥ अपारैर्व्यापारैरहरहिहनयंतोशनदशास्व थस्नाताः संध्यांविदधतिनजातुस्वसमये॥ त्यजंतःस्वांवृत्तिंद्विजकुलभवांग्रामगणकीभवंतो हं
तामीकथमपिचजीवंतिबहवः॥ ३३॥ उपनयनविवाहावुत्सवैकप्रधानौकलिविभवतएषांकालभेदान भिन्नाःविज्ञहतिनकदाचिद्वेदपाठैक
योग्येवयसिचयवनानीवान्वनाभ्यासमेते॥३४॥ अज्ञानामविरामलौकिकवचोभाजाममीषांपुनर्मंत्रोच्चारणएवपर्यवसितंमौनव्रतंकर्मसु॥ ग्रा
मायव्ययलेखनेननयतांकालानशेषानहोपारंपर्यतईदृशामिहनृणांब्राह्मण्यमन्यादृशाम्॥३५॥ अन्यच्च॥ कुसेःपूर्वैर्यवनवितत्तेभृत्यकृ
त्यानिकर्त्तुंविक्रीणीतेवपुरपिनिजंवेतनैरेतदास्ताम्॥ विप्रोभूत्वाप्यहहगणनानैपुणेवंचयित्वास्वर्णस्तेयंरचयतिजनःस्वामिनोपोषकाणा
म्॥३६॥ अहोबतकलिमहिम्नासदसद्विवेकवैधुर्यमखिलजनानाम्॥ येमुष्णंतिनिशिप्रविश्यभवनंयेवाबलात्काननंनैतेस्वामिधनंहरंति
ननुतान्निंदंतिचोराइव॥सद्योदत्तंहरंतिपोषकधनंसंख्याविपर्यस्ययेकष्टंतानपिवंचकानिहपुरस्कुर्वंतिसर्वेजनाः॥३७॥ अयंखल्वनुपमो
देशाइनिपुतत्त्वदुक्तंयुक्तमेवयत्रस्वल्पेनापियत्नेनसिद्ध्यतिमहतीप्रतिष्ठा॥ वेदव्यासःसनवदशगुणोवेदवेदाक्षराणिश्लोकंत्वेकंपरिपठतियः
सस्वयंजीवएव॥ आपस्तंबःसइहकलयेत्सम्यगौपासनंयःकष्टंशिष्टंस्मितिकृतिकलोकाश्यपंमृच्छंतिविद्याः॥३८॥ वि॰॥ किमरेभूसुरेष्वे
वदोषमुद्घोषयसि॥ अत्रापिसंतिबहवःकलिताग्निहोत्राःशास्त्रार्थबोधकुशलाःकिलशांतिमंतः॥ अंतर्मुखाःसततमात्मविदोमहांतोनि
र्धूतबाह्यविषयानिगमाध्वनिष्ठाः॥३९॥ अन्यच्च॥ शुचीभूताःस्नानैःकृतविहितपुराणाश्चनियमादपूतानांस्पर्शानवहितदृशोऽमीविज
हतः॥ स्फुराभ्यर्चांकृत्वाशुचिकृतमदंत्यन्नमनघंमहाराष्ट्रेदेशेविलसतिमहानेषहिगुणः॥४०॥ टि॰ १वाचस्पतिः २स्मार्ताग्निं ३प्राप्नुवंति॥ 

किंच॥ चमूनियमनेन वाजनपदाधिकारेण वा द्विजव्रजउपव्रज न्प्रभुपदेस्मिन्महाराष्ट्रजः॥ नवृत्तिमिह पालयेद्यदि धरासुराणां ततो भवेद्यवनवेष्टितं
भुवनमेतदब्राह्मणम्॥४१॥ यच्चदोषांतरं भवता परिभाषितं तद्दोषमपि सा धुजनोपकारेण परिहीयते॥ अलमंकुसंहर्तुमहः सहस्त्रं स एको
पि विप्रप्रवेको पकारः॥ कठोरः कुठारः किलैको पि तिग्मो विनिर्भेत्तुमीष्टे विषद्रूनने कान्॥४२॥ कृ०॥ अस्त्वेवमप्यत्रस्थानामाद्येतरवर्णप्रभवाना
मपि पुनरतिदुःसहं चेष्टितम्॥ पश्य॥ देशे देशे लंपटाः पर्यटंतो भंजंभंजं ब्राह्मणादीनशेषान्॥ हारं हारं हंत सर्वस्वमेषां पापा एते स्वोदरं पूरयंति
॥४३॥ वि०॥ सत्यमेवमथापि मर्हणीयमेव तेषामेव चेष्टितम्॥ तथाहि॥ मार्या चंचुतया भपा वहृशतिः प्रस्थपिप्रि स्त्रीभुजां महाराष्ट्रभटच्छ
लरणपटुर्नो पूर्वेकाल्येतचेत्॥ देवब्राह्मणवर्गनिग्रहकृतो देशांस्तुरुष्कादयो मेनिश्रेत्यूहमनोरथा वितनुयुर्निर्देवभूमीसुरान्॥४४॥ ततः
श्च॥ देवसोर्णीसुरहिंसकृते दारितम्लेच्छपंक्तेर्मत्वा संस्थाकथमपि महाराष्ट्र यूथस्य चेष्टा॥ व्याधिव्यूह प्रतिकृतिकृतां व्यक्तमुग्रौषधानां
कायारोग्य प्रणयि हृदयैः कोटवं मर्षणीयं॥४५॥ इत्यन्यतो विमानं गमयन्नग्रतो विलोक्य॥ कइमेबहवः समवेतामानुषा मार्गानप्यशून्ययं
ति॥ निपुणं निरूप्य॥ सश्लाघम्॥ अंगान्वंगान् कलिंगानथ मगधकुरून्कोसलान्केकयान्वा काश्मीरान्कुंतलान्वा यवनजनपदान्किं
च पांचालदेशान्॥ नेपालान्केरलान्वा कतिचन कृतिनः पांड्यतुंडीरचोलान् कर्णाटान् गौडलाटान्परमिति घटनालंपटाः पर्यटंति॥४६॥
कृ०॥ अरे किमेतान्निंदनीयानभिनंदसि॥ नानाजातिभवाद्यमे कलिबलादेकीभवंतो नरा वैराग्याभिनयं चिराद्विदधतो वर्णाश्रमत्यागिनः॥ नि
र्धूतानघवैदिकप्रणयनानि ष्किंचनावंचनादस्मादिक्षु विदिक्षु कुक्षिभृतये भिसाटनं कुर्वते॥४७॥ किंच॥ विमलचरिता विश्वामित्रादयः परमर्ष
यो बहुभिरतुलैर्ब्राह्मण्यं यत्तपोभिरुपार्जयन्॥ नदिह जहतो जन्मप्राप्तं त्रयीविमुखेष्वमी बहह कतिचित्पाखंडेषु प्रविश्य हता जनाः॥४८॥ टी०
१ ध्रटितिर्श्रेष्ठः ३ तीक्ष्णः ४ ब्राह्मणेतर ५ भंक्त्वा भंक्त्वा ६ हृत्वा हृत्वा ७ स्तुत्यं ८ मोहजनकत्व नैपुण्यं ९ निर्विघ्न १० मर्षणीया ११ प्रतीकारः १२ कटुत्वं १३ संधीभूताः १४ संकुलान्कुर्वंति १५
परलोकसंपादनसक्ताः १६ वेदमार्गपराङ्मुखेषु॥

वेँ॰ वि॰॥ कथमरेहरेर्भक्तेष्वमीषुसन्नह्यसि दोषेभ्योनैवभेतव्यंदृढा चेद्भक्तिरच्युते। तिमिरेभ्योहिंनभयंदीपश्चेल्लभ्यतेमहान्॥४९॥ किंच॥ दुःखंचज
९ न्मदुरितंचहृढामविद्यांह्लादंतनुंतिपरमाहरिभक्तिरेका॥ एकोऽपिराघवशरःकिलसप्ततालान्शैलान् रसातलमपित्वरयाबिभेद॥५०॥अ
पिच॥ धुनोतिनिविडंतमः परिलुनातिपापाटवींतनोतिचमनोरथानुपचिनोतिनानोत्सवान्॥ अनक्तिचपुनःपुनर्ननुमनःसुधानिर्झरैर्भ्यन
क्तिपरिपक्विमंवृषगिरीशभक्तिःशुभम्॥५१॥ किंबहुना॥ पूतांगानांपुण्यगंगादिसिंधुस्नानान्नानाक्षेत्रयात्रापराणाम्॥ दाराऽऽगारापत्यवैरा
ग्यभाजांसाराभिज्ञैरादरःकार्यएषाम्॥५२॥ इतिविमानमन्यतःसमानयन्निपुणंविभाव्य॥ स्फशोभनक्रमकरैःसेवितोजीवनार्थिभिः॥मध्य
स्थवीडवोराजत्यंध्रदेशेनदीशवत्॥५३॥ ह्र॰॥ अयेकिंप्रशंसस्यपयातमर्यादमग्नुंदेशम्॥ पश्य॥ ग्रामेग्रामेनिवसतिचिरात्स्वामिभावेनभू
द्रोभृत्सोभूत्वापठतिगणनांब्राह्मणस्तस्यपार्श्वे॥ वेदाध्यायीसरइवमरौक्वापिकश्चिद्यदिस्यात्तत्रामैत्रप्रकरकरणेचर्न्ततेसोनियुक्तः॥५४॥
किंच॥ महाराष्ट्रदृष्टास्मि अत्राप्यतिदेष्टव्याः॥ विश्वावसुः॥ वयस्यमैवंवादीः॥ मानामयस्ततमखैरनघैरिहामीमाचाधिगीषतवचांसिचिरं
तनानि॥ देवेषुभक्तिरवनित्रिदशेषुचैषांविश्राणनंचविविधान्विधुनोतिदोषान्॥५५॥ पश्यतावदेतेषांभाग्यवत्ताम्॥ रोमावल्यातपनस्रुत
यारम्यहाराद्भ्रनद्याह्रद्यास्तंगस्तनगिरिजुषोनाभिवापीमनोज्ञाः॥ भूमेर्मूर्तीरिवबसत्सुसतीर्भुंजतेभाग्यवंतःक्षोणीपालाइवयुवजनाःका
म्यमाध्वीपुरंध्रीः॥५६॥ शृणुतावत्॥ कोवाकल्पतरौगुणःस्फमनसांयःस्वार्थिनांनामहोसौरांशान्हरतःप्रसत्यमधुपान्धत्तेमहामोदतःोकिर्णेव
दि॰ १ निंदितुंबहुपरिकरोभवसि २ दूरीकरोति ३ परिछिनत्ति ४ विस्तारयति ५ पुष्णाति ६ सिंचति ७ प्रकाशयति ८ परिपक्वम् ९ वृषगिरिर्वेंकटगिरिस्तस्येशः
१० स्फशोभाः=पक्षेस्फशोभनाइतिच्छेदः नक्राःक्रमाश्चेतियथासंख्येनबोध्यम् ११ उदकंसापाधारणंच १२ ब्राह्मणःअग्निश्च १३ भोजनार्थंपलाशादिपत्रावली
करणे १४ पुष्पाणांशोभनमनसांसतांच १५ मधुरूपान्द्रव्यरूपांश्च १६ भ्रमरान्मद्यपांश्च ९७॥ कौंतेयः धवलाच॥ ॥ ॥ ॥ ९॥ ९

मेन कीर्तिहानिपरता कालांबुदे गर्[1]जनं नीरं[2]ध्रं पुनरांध्रदेशनृपतिः श्चास्ते समं स्पर्[3]शनम्॥५७॥ समंतादवलोक्य॥ अहो कृष्णागोदावरीमध्यमध्या
सीना नाममीषां वैदिकानामभिनंदनीयो यमनपायः संप्रदायः॥ निगमपाठनिराकृतनष्टुष्कृतानयविदो बहवोत्र धरासुराः॥ प्रतिवसंतसुपात्तसुखाः
कृत्वं प्रतिवसंति मुकुंदपरायणाः॥५८॥ अत्रत्यानामधिकारव्यापारनिरतानां अप्यपरवल्लवकलंको नियमः॥ आश्रयितव्यो नरपतिरार्जयितव्या
नि भूरिवित्तानि॥ आरब्धव्यं वितरणमाने तव्यं यशो दशापि दिशः॥५९॥ कृ०॥ समंतादवलोक्य॥ हंत संततमत्यंतदुरितनिरता यवनाः प्राचुर्येतः
पर्यटंति ॥ [illegible] ॥ अवनावेतीतपवनाम्बशोभिनो भवनागंशायिभवनावर्हिनः॥ सवनादिधर्मलवेनापदीक्षिता यवनाश्चरंति भुवनातिभी
यणाः॥६०॥ कि०॥ सत्यमेवमथाप्येतेषु तुरुष्कयवनेष्वनन्यसाधारणविक्रमगुणमनुगृह्णाणा गुह्लायप्रमिलंतु हंत पटवो योधाः सहस्राधि
कायश्चैकोपि बलात्तुरुष्कयवनेष्वारूढघोटो भटः॥ निस्त्रिंशपरिकंपयन्नुत्कटकान्निष्क्रामति क्रोधतः सर्वे ते कृपणास्तृणान्यशरणाः खादं
ति सीदंति च॥ ॥ ॥६१॥ किंच॥ पिबंतु मदिराममी परितुदंतु देशान्महो हरंतु परसुंदरीरपलपंतु वेदानपि॥ तथापि चमृधांगणे तृणवदेव मु
क्त्वा तनुं हठाद्विदधते मरुत्सुरकवाटिकोद्घाटनम्॥६२॥ इति व्योमयानमन्यतः स्पंदयन्॥ अग्रतो हस्तास्य प्रत्यभिज्ञं॥ कर्णाटदेशोयः पूर्वं कर्ण
देशमभूषयत्॥ स एष सांप्रतं पश्यचक्षुषो भूषणायते॥६३॥ लोचनासेचनकं किलास्य देशस्य रामणीयकम्॥ प्रतिनगरमिहारामाः प्रत्यारामं पंचे
लिमीः क्रमुकप्रसवाः॥ प्रतिक्रमुकप्रतिप्रसवमप्युत्सर्पति मधुततिः॥६४॥ प्रतिमधुबिंदु मिलिंदाः प्रेंखंति प्रतिमिलिंदमारावाः॥ शून्यारावेषु
दृश्यां मदाउदाराप्रतिमदंमदनः॥६५॥ कृ०॥ हंत कथमभिनंदयसि निंदनीयममुं देशम्॥ तथाहि॥ वेदवैदिकविद्वेषदूषिता भस्मरूषिताः॥

टी०॥ १ गर्जितं वल्गानं च २ निर्दोषं ३ दानं ४ वसंते वसंते ५ वायुधिकवेगा अम्बाः ६ शिवविष्णुदेवालयभंजकाः ७ ध्वंसः ८ कृतदीक्षाः ९ अनन्यसाधारणो योनभ
वति सः तदेकनिष्ठ इत्यर्थः १० अम्बः ११ खड्ग १२ युद्धांगणे १३ स्वर्गकपाटोद्घाटनं १४ अतिस्पृहणीयम् १५ परिपक्वाः १६ भ्रमंति १७ लिप्ताः॥

चंडा[1]ः संपन्न पार्श्वे डालिंगालिंगितवक्षसः ॥६६॥ आकर्णयतावदन्यदप्यमीषामपचरितम् ॥ शिरःपुरारेर्हि[2]जराजपाददिव्यामृतैः सिक्तमितीर्ष्ययेव ॥ शूद्राद्यमेलिंगधराः स्वयंतत्तत्पादतोयैः स्नपयंतिकष्टम् ॥६७॥ वि०॥ सखेवमेवं संगदिष्टाः ॥ यदस्मिंदेशेयदुशैलप्रभृतीनिदिव्यक्षेत्राणिदृश्यंते॥ दुरितमवनतानांदुर्निरोधंनिरुंधन्नसितमतिभिरतंद्रैः सेव्यमानोमुनीन्द्रैः॥ यदुगिरिरयमिंधे यत्रनारायणाख्यो निवसतिकिलहर्षे नीलमेघःप्रवर्षम् ॥६८॥ सभक्त्युन्मेषम् ॥ यदुगिरितटागाराख्याराजमौलिपरिस्फुरन्मणिगणमहोधारानुरीराजितांघ्रिसरोरुहा॥ नवजलधराकारानाराप्रणाल्क्ष्यभूषितानिरवधिदयासारासाराजतेपरदेवता॥६९॥ पुनः सविस्मयम् ॥ यःप्रभुर्यादवक्ष्माभृत्पुरस्कृत्यापुराबभौ॥ अधुनायादवक्ष्माभृदधः कृत्यासभात्यहो ॥७०॥ सश्लाघम् ॥ भूभृत्यास्मिन्यक्षिराजेनपूर्वेश्वेतद्वीपादाहृतांश्वेतमृत्स्नाम् ॥ धन्यानित्यंधारयंतोललाटेमालीमस्यंमानसंनिर्मृजंति॥७१॥ किंच॥ विष्णुपद्याकुलनयाविश्रुतोविमलीशयः॥ कासारोऽत्रहरत्येनःकविःकंसोरिवागिव॥७२॥ इतिविमानमितरत्रपरिस्पन्दयन्सानंदम् ॥ रंजनीठपुरंनतुकांचनश्रियमितंवहतेमहदद्भुतम् ॥ इहवसन्नभुभरीतिवेहोबुधःपरमयोगनसवविराजते॥७३॥ पुनः सश्लाघम् ॥ अत्रैवहिंतद्दृष्टमूर्त्तोभिलाषादासेवितोभुव्यभिजातकीर्त्तिः॥ आनंदतीर्थोक्षयमन्तकश्चिरन्वर्थयन्नाविरभून्मुनीन्द्रः॥७४॥ कृ०॥ अस्तुतावदेवमथाप्यदसीयदेशानुवर्त्तिनामधुनातनानांद्विजानामपिवह्नव आकर्ण्यतामपचाराः॥ सततमहेतसंध्योपास्तिरभ्यस्तशास्त्रःसवितरिगतबाल्येकाल्यसंध्यामुपास्ते॥ तदपिभुविनमान्यंमन्यतेधन्यमन्यत्यजतिविहितहानात्साध्वसंमाध्वसंगः॥७५॥ किंच॥ गायत्रींसहसाजहद्द्विगवीयज्ञोपवीतंत्यजन्मुंचन्किंचशिखांविरक्तइववपः संप्राप्ततुर्याश्रमः॥ आरूढश्वतुरंगयानमभयोहाहंतदेशांतरेष्वर्थानामुपसंग्रहायविचरत्येटी०॥ १ अत्यंतकोपनाः २ चंद्रकिरणब्राह्मणचरणाः ३ स्कधाउदकंच ४ शूद्रबुद्धिभिः ५ प्रकाशते ६ नारायणस्वरूपः ७ यदुराजपुरस्करणेन ८ एतन्नामकपर्वतः ९ क्षालयंति १० जान्हवीपक्षेविष्णोःपद्यानि ११ मानसभंतरंच १२ कांचनइतिशब्दश्लेषः १३ पित्तलवर्त्तमानेच १४ लोहंयोगसहत्वंच १५ मध्वाचार्यः १६ प्रातःसंध्या॥ ॥

षो प्यमी षां गुरुः ॥७६॥ अहो महानेष व्यामोहो विदुषामपि कलिमाहात्म्यात् ॥ यस्य ॥ यस्य क्वापि विलोकने सवसनं स्नानं बुधैः स्मर्यते यस्यान्न
ग्रहणे च निष्कृतितया चांद्रायणं चोदितम् ॥ तस्य प्रत्यक्ष तवाहन स्थितयते दृष्टिर्विमुक्तिप्रदा तस्यान्नं च समस्त पाप हृदिति प्रस्येति विद्वानपि ॥
॥७७॥ पश्यता वत्कलिकालनरपालस्य गृहस्थेषु प्रद्वेषं भिक्षुषु पक्षपातं च ॥ भिक्षां कष्टमटंति कुक्षिभृतये पादौ गतैः क्लेशयंत्याश्वक्त्वा : शिथि
लैः पटैः स्वगृहिणो जीर्णे गृहे शेरते ॥ राजत्सूक्ष्म पटाः प्रशस्त शिविकारूढा गृहिभ्यो न्नदा ग्रावव्यूहदृढे मठे स्थितिजुषो धन्या हि संन्यासिनः ॥७८
अन्यच्च ॥ अन्ये स्यु वेदान हो शास्त्रवादान् पठंतः स्फुटं तेवतैत न्मतस्या ... धीशाननादत्यन्तद्भूस्य पूजा पराणां नराणां पदं ते भजंते ॥ ७९ ॥
किंच ॥ एकादश्यां कलौ हो मह्रानादेषामग्निलौकिकत्वं प्रसंगात् ॥ तस्मादेषां व्यर्थ हिंसानिवृत्यै स्यादुत्कृष्टः पिष्टपश्वादरोपि ॥ ८० ॥ वि० कि
मरे केशवभक्तिप्रकर्षदृप्तान् पिविप्रान् दूषयसि ॥ शक्त्या हि किल मध्वसिद्धांतनिष्ठा नामियं हृदयं जरी हरीति रीतिः ॥ आबालस्थविरं स्थिरं हृ
रिदिने शक्त्योपवासव्रतनिष्ठा स्यूह महर्निशं विजयते नारायणाराधनम् ॥ श्लाघ्या भागवतेषु भक्तिरमिता श्रद्धान्वये षां दृढा शास्त्रं स्वीयगुरूदितेन
चरितं साध्वेष माध्वेषु किम् ॥ ८१ ॥ एतद्गुरूणां यतीनां पुनः येषामाकलितदोषवै धूर्याश्रुभचर्या ॥ दनुजभिदभिषेकैः सत्पुराणावलोकैः पुनरपहृत
मोहैः पुण्यतीर्थावगाहैः ॥ भवकदनविदूरैर्ब्रह्मविद्याविचारैः क्षणमिव पतिवर्याः कालमेतेन यंति ॥ ८२ ॥ यदपि त्वया तदुपरि दूषणमुपन्यस्तं तदपि
मदपिहित हृदयेभ्यो भवादृशेभ्य एव रोचते न तु गुणग्राहिभ्यः ॥ तत्तद्देशनिवासिशिष्यनिवहत्राणाय गुर्वाज्ञया संचारा स्म एष विंदति यतिश्चे
द्ग्राहनेकाः क्षतिः ॥ दत्तं वित्तमशेषमास्तिकजनैर्देत्यारिनित्यार्चना सात्कृत्य स्वयमस्पृशन् वसति चेन्निंदास्ति किं तावता ॥ ८३ ॥ किंच ॥ स्वामिनि विनि
मुक्तानां सत्त्वेनानध्यवस्यता यतिना ॥ कृत्यं पत्यन्तत्वं प्रत्यवयंस्यत्र तद्भुजस्त्वकुतः ॥ ८४ ॥ एतेन मतांतरस्था अपि मठाधिपतयो यतयो व्याख्याताः ॥

टी० ॥ १ निष्क्रिनोति २ गमनैः ३ विष्णुवादीन् ४ सायंप्रातः संबंधिः ५ होमाभावात् ६ दीप्तान् ७ पुनःपुनर्हरति ८ आबालवृद्धं ९ निर्विघ्नम् ॥ ७ ७ ७ ॥

द्दंचावधेयम्॥ यदि कतिपयेजातालस्याद्यथासमयंहिजाबतनतनुयुः संध्योपास्तिंभविष्यतिकिंततः॥ निगमचरितानंगीकारोहिदूषणमंगिना
मशकनवशाद्दोषायैषानजात्वनन्नुष्ठितिः॥८५॥ किंच॥ पथानमनुरुंधानः पित्रादेनैवदुष्यति॥ इतिस्मृतिमधीयानैरेषांदोषोहिदुर्वचः॥८६॥ इ
तिविमानंदूरतः समानयन्पुरतोदृष्ट्वा॥ भाषावेषाचारैर्भूषाभिः पुरुषाश्चयोषाश्च॥ वीक्षस्वप्रतिदेशंविलक्षणाएवदृतलक्ष्यंते॥८७॥ कृ॰॥
सखेवीक्षस्वेतिमावोचः किंतुसत्वरमतिक्राम॥ कीदृशाकल्पजनानिमान्जनपदान्॥ चंद्रालोकचपांधकारभरयोश्चापेयकिंपाकयो राजत्कुंड
लिराजराजिलकयो राजीवधत्तूरयोः॥ खेलत्कोकिललोककाककुलयोः क्षीरार्णवाब्धोरिवव्यक्तंपंडितमूर्खयोः समदृशोव्रात्याइहत्याइमे॥८८
॥ ओमित्यग्रेविमानमुपानयन्सानंदंसांजलिबद्धंच॥ स्फरभितमतमालस्तोमपुष्यद्रसालप्रकरतिलकसालप्रेषुसप्तछद्धुजालः॥ श्रितसमवनशी
लः श्रीशलीलानुकूलः शिथिलितभवमूलः सेव्यताशेषशैलः॥८९॥ पुनः सहर्षम्॥ पन्नगेषुचनगेषुखेलेषुहीपिराजस्फपृषत्स्फहृशत्स्फ॥ वल्ल
रीषुचदरीषुझरीषुप्रार्थ्यतेनिमन्त्रमुनीन्द्राः॥९०॥ विविधनिगमसारेविश्वरक्षैकधीरेवृषशिखरिविहारेवक्षसाश्लिष्टदारे॥ भगवतियदु
वीरेभक्तबुद्धेरुदारेभवतुचिरमुदारेभावनानिर्विकारे॥९१॥ अहोमहोन्नताखल्वस्यशैलस्यधन्यता॥ वैकुंठेपिनिरुत्कंठमकुंठविभवंमहः
॥ तदत्रचित्रंवा रित्र्यंममतेरमयासमम्॥ ९२॥ इतिसानंदंध्यायति॥ कृ॰॥ हेतव्यपेतविषयांकिरव्यासंगंत्वदंतरंगंदेवएवास्मिन्ननुभवति
दृढसंगम्॥ वि॰॥ सखेसत्यमेवोदितंभवता॥ दधतीविरायस्फदतीमुरस्थलेतदतीतंसीमदद्तीस्फखंसताम्॥ रसिकस्यचित्तमिहकस्यदेवता
प्रतिपन्नपन्नगनगानगाहते॥९३॥ कृ॰॥ किमरेकेवलमर्थपरममुंदेवमनुसंधत्से॥ इष्टप्राप्तिमनिष्टभंगमपिवासंप्रार्थ्यक्षुत्याजनैर्यहात व्य
मितिप्रतिश्रुतमभूद्व्यंतदापेफले॥ तेदास्यंतिनचेत्स्वयंभयमसावुत्साद्यतेषांपुनः स्तत्स्नसार्थंहिरण्यहस्पदद्दंदंगृण्हातिहव्यांसमम्॥९४॥ टि॰ १वान ११
रः २चंपकः ३पुंनागाराइतिप्रसिद्धः ४शेषः ५डुंडुभाख्यः क्षुद्रसर्पः ६कूपः ७उत्संगे ८ अंतःकरणं ९मानसं १० अतिष्ठापितं ११ प्रतिज्ञातं १२ सुवर्णंहिरण्याक्षश्च १३ व्याजइतिलोक
प्रसिद्धम्॥

॥किंच॥ नातेस्यामंत्र्यकश्विद्गूनभुवितृषितस्तोयविंदून्ययाचेकस्याप्युच्चैस्तटाकंखनतइहगिरौहंतमृद्वारमूहे॥ दत्तांकेनापिसूनावलिमधिमुकु
टंमृन्मयीमेवदध्रेसोयंभूपःकृतिज्ञैर्भुवनपतिरितिस्तूयतेध्यायतेच॥९५॥ विं० किमरेकरुणानिधयेव्यंकटाचलपतयेप्यसूयसि॥ शृणुतावत्॥
॥नियंताजंतूनांनिखिलजगदुत्पादविभवप्रतिक्षेपैःक्रीडन्परमपुरुषःपन्नगनगे॥ परत्वेसौलभ्यप्रकटनकृतेवेंकटपतिःकृपासिंधुःकांकानतु
मनुजलीलांनतनुते॥९६॥ किंच॥ किमप्युपादायदिशन्नभीष्टंकृत्स्नंजनेभ्यःपतिरंजनाद्रेः॥ कृष्णावतारीयकुचेलसंपत्प्रदानरीतिंविवरीवरीति॥
॥९७॥ त्रियस्तुहचरीलक्ष्मीःस्थानंसहस्रवक्षःस्वयंकुवलयपतिःशालोरत्नाकरःश्वशुरोहरेः॥ तदपिहरतिद्रव्यंपूर्णोजगत्यतिरेषयत्तदिहभज
तांकर्तुंनृणांभुवियमनुग्रहम्॥९८॥ अखिलहेयप्रत्यनीकानंतकल्याणगुणैकतानस्यविश्वनाथस्यश्रीनिवासाभिधानस्यपरस्यब्रह्मणो
गुणार्णवामृतकणानांगणनाभ्यामनिपुणधिषणाधिषणादयोपि॥ गांभीर्यैकावलंबेगिरिमनिवसतोकांतिकुल्यातटाकेकल्याणांभोजकल्येनि
रवधिकरुणासारकल्लोलराशौ॥ चातुर्यौदार्यलक्ष्मीविहरणशरणेसद्गुणौघान्दधानेदेवेश्रीवेंकटेशेनखिलगणयिषताकेनवाम्लानवाचा॥९९॥
किंच॥ समग्राह्यिहरेवेंदैःसमग्राह्यिगुणावलिः॥ प्रत्यक्षेपिपरत्वेस्यभक्तस्येपिचसंशयः॥२००॥ अहोमहात्मनस्याप्यस्यसौलभ्यंकनककुसुमस्य
सौरभ्यमिवरसिकभ्यएवस्वदते॥ पश्य॥ प्रचंडविध्वकेटकप्रखंडनैकपंडितःपतंगमंडलेवसन्यएषपांडवप्रियः॥ अकुंठरीतिकःप्रसन्नपुंडरी
कलोचनःसकुंडलींद्रभूधरप्रकांडमंडनायते॥१॥ अवलोकयतावद्रगवरधरणीधरशिरोमणेश्चक्रपाणेरतितरस्करवरवितरणकौशल
मतिपेशलम्॥ मूकारब्धंकमपिबधिराःश्लोकमाकर्णयंतिश्च द्वालुस्तंविलिखतिकुणिःश्लाघयावीक्षितेंधः॥ अभ्यारोहत्यहहसहसापंगु
१ तोयबिंदुयाचकःमृद्वारवाहकः मृन्मयपुष्पावलिधारकश्च स एवलीलयाभवति २ सृष्टिस्थितिसंहारैः ३ परलोकविषये ४ स्रग्दामा ५ प्रकटयति अंगीकरोतिवा ६
किरणाःमणयश्च ७ पृथ्वीकमलंच ८ बृहस्पतिः ९ उषःकालः १० क्रीडागृहे ११ मौनभाजा १२ सम्यग्गृहीता १३ त्याजितः १४ क्रियापदं १५ सूर्यः १६ कुब्जः ॥ ७ ॥

वि॰ द॰ रुच्यद्रिशृंगं सांद्रारुस्या: शिशुभरणतो मंदं मंदं तु वंध्या:॥२॥ सर्वतः पर्वतमालोक्य सश्लाघम्॥ सर्वोच्चतुंगश्रितशृंगभागुहः साध्वभिख्यातशीलो भास्व
१२ हूं श्रोपचयजनकः सानुजः स्फूर्तिको यम्॥ एवं नूनं क्षितिभृतममुं जानती जानकी शंकाशश्रेणी कलुषशारणीकुर्वती वर्वरीति॥३॥ पुनः सानंदम्॥
प्रकाशबहुपादेवत्यविफणिक्ष्माभृत्स्वदः प्रकाममवलोक्यते परममन्यदत्यद्भुतम्॥ निजोरसि पयोधरं स्थिरमचंचलां विद्युतं पयोधरमुरस्यसाव
पि बिभर्त्ति नित्यं निजे॥४॥ इति दक्षिणतो विमानमानयन् सानंदं विलोकयस्व विपिनानाममीषां परमं रामणीयकं॥ पुरः पुरो घनं वनं वने वने
महागिरिर्महागिरौ महागिरौ विराजते गुहागृहम्॥ गुहागृहे गुहागृहे विहारतत्परो हरिर्हरौ हरौ निरंकुशः कृतेभसाध्वसो ध्वनिः॥५॥ कु॰॥
किमरे वर्णयस्य चास्य व्याणि मनुष्यांगकवलनचपलचंडपुंडरीकाननानि कानननामि॥ इतस्तावद्भ्रा व्यतिकर इतः संत्यजगराइतो लुंटाका
नां समुदयद्रुतः कंटकचयः॥ इतो व्याघ्राउग्राज्वलनजनकावेणवइतो वनं संलक्ष्यैतन्मनइदमहो मोहे स्यते॥६॥ वि॰॥ सखे निपुणनिरू
पणतस्तेषां गुणानपि गृहाण॥ अनायासग्रात्याण्यव निपतिभोग्यान्यपि फलान्यपत्नेन प्राप्यान्नृपसहगपेस्याः सुमनसः॥ असूर्यंपश्या
न्यप्यहहसकुलुभान्यस्मभं वनान्यरण्यानीभाजामति पतति भाग्यं किल गिरः॥७॥ अपि च॥ गहनगुहाविहारिहरिपाणिरुहाभिहतद्विरदप्रि
स्तटोच्छलितमौक्तिकसंहतिभिः॥ अह्नह्वविभूषितैरिह चिरं विरहंतिसखं ससंभ्रमबलाजनैरतिविलासपराः शबराः॥८॥ इति व्योमयानंद
क्षिप्रातः प्रापयन् पुरतो निर्दिश्य॥ कंठोपरि कंठीरववधुचिद्रुष्टारुचिविचित्रचंद्रिकया॥ स्फटिकाचलइव नयनेघटिकाचल एष संप्रति धिनो
ति॥९॥ सभक्तिप्रकर्षमंजलिं बध्वा॥ वरकेतुस्थता स्त्र्या यस्मरकेलिपुषेश्रियः॥ नरकेक्षणविज्ञाय नरकेसरिणे नमः॥१०॥ किंच॥ स्थिरशं
खादिचिन्हाय सुरसंघार्चितांघ्रये। परसंहारदक्षाय नरसिंहाय मंगलम्॥११॥ जंभदंभहरस्तेमारंभलंभन मूर्त्तये॥ शंभुसंभावनीयाय स्तंभ
डिंभाय मंगलम्॥१२॥ कु॰॥ किमरे क्रोधमयेपि नरमृगे दृष्टस्तव बच न विरचयसि॥ प्रल्हादमाल्हादयितुं तमेकं सर्वस्य कुर्वन् भुवनस्य भीतिम्। टि॰
१ मायां निः २ दरीरामसखश्च ३ कुलं वेणुश्च ४ शृंगं बंधवश्च ५ प्रसंतपर्वनाःचरणाश्च ६ क्षोभाचले ७ विद्युत्सभालक्ष्मी ८ विद्युदपि ९ संचयः १० तस्कराः ११ नरकावलोकनं १२ शत्रु १३ इंद्र १४ नृसिंह १२

सैंहंदेधेसंहेननंपुरायस्तवस्तवस्तत्रकथंप्रवृत्तः॥१३॥ वि०॥ वयस्यमैवंवादीः॥ यतः॥ अपुण्यधीरैयहिरण्यदूनत्रिलोकशोकस्य पंणा यशौरिः॥ कोयाधवायासनिरासदंभस्तंभादिहाजं भतसंभ्रमेण॥१४॥ इदंचावधार्यताम्॥ मनुष्यतिर्यक्त्वमुपेत्यनित्योदेवःस्वयंस्थावरतोभ्युदंचत्॥ वितत्रशक्त्यन्वयमन्त्रवेदैःप्रस्ताप्यमानंप्रकटीकरोति॥१५॥ पुनःसविश्रंभम्॥ घटिकाचलवपुरवेक्ष्यतत्वतोघटिकाचलेसमधिरुह्यभक्तितः॥ नरकेसरींद्रचरणौविलोकयन् नरकेसरिष्यतिनजातुमानवः॥१६॥ इतिविमानमन्यतःसंचारयन् सहर्षम्॥ वीक्षारण्यमिदंवदंतिसरसीहृत्तापनाशिन्यसावस्यारोधसिवीरराघवइतिप्रख्यातनामाहरिः॥ व्यक्तंराजतिवीतिहोत्रइव योविस्तीर्णहेतिद्युतिः सेत्रभ्राम्यकुशस्यलंभजतिश्रीशालिहोत्राचितम्॥१७॥ आकल्पयतुभवानत्रैमंचमत्कारं॥ द्विरेफवर्णास्कमनोरमांतनुंबिभर्त्तिसंज्ञामिववीरराघवः॥ सैपर्वराजेनयदीयमर्चितंमुखंपदद्वंद्वमिवोपशोभते॥१८॥ रू०॥ वयस्यकिंसन्नह्यसिवीरराघवस्तवने॥ यदस्मिन्नपिपन्नगनगनाथइवपरधनग्रहणपरत्वादयंः प्रादुष्यंति दोषाः॥ वि०॥ अत्रास्मदुक्तेनैवतत्समाधानेनपुनरत्रापिसंतोष्टव्यमायुष्मता॥ पामरस्मरेरमतेनकस्यमनोवीरराघवेदेवे॥ स्वेक्षासाध्यजगज्जनिःकृतजपल्लाक्षांकितोरःस्थलःसाक्षादेषपरःपुमान् कृतनुतिर्दाक्षायणीशादिभिः॥ वीक्षारण्यपतिर्विराजतिगतिर्द्रासामहक्कुर्सोहितीधीक्षांत्यायुररोगताधनयशोमोक्षाद्यपेक्षावताम्॥१९॥ किंच॥ उपेत्यवीक्षावनमुन्नतःसदाकवर्णवल्यास्कमनःपुषाश्रितः॥ अहीनसेव्योहरिचंदनस्तनोत्यपाश्रितानामुचितांस्कवासनाम्॥२०॥ इत्यन्यतोविमानंप्रेरयन्नग्रतोवीक्ष्य॥ सप्रश्रयभिन्नम्॥ एषाभूतपुरीनिरीक्षितचरीदोषापहंश्रीमयाश्रीमानत्रगुणाब्धिराविरभवद्रामानुजार्यौमुनिः॥ त्रय्यंतामृतसिंधुमंथनभवद्रूप्यंगवीनात्मकंविज्ञानंयदुपेत्य

१ सिंहस्य २ शरीर ३ पुरीणः ४ हिरण्यकशिपुः ५ नाशय ६ कयाधोरपत्यंप्रल्हादः॥ ७ घटिकाचंचलम् ८ खड्गःज्वलाच ९ मुनिः १० अमरः रेफद्वयंच ११ इन्द्रःचैन्द्रश्च १२ प्रादुर्भवंति १३ साहित्यं १४ स्कवर्णलतानाम्न्यापत्न्या १५ उत्तमाः सर्पाश्च १६ अवलोकिता १७ सआचार्यएवआद्यज्ञानकारणंयस्य॥

मेवविदुषामद्यापिविद्योतते॥२१॥किंच॥कामादिवैरिगणभीमानवद्यनिजनामाभिलाषगरिमावैमानिकार्यसमभूमाभतौबच्चनसीमाति
लंघिमहिमा॥श्रीमाननुनूकलसोमाननोविमलधामावमानितरविः स्प्रेमाणिजृंभयतुभूमावमुत्रचसरामानुजोयतिप्रतिः॥२२॥अपिच॥
सजयतिरामानुजयतिरंजयतिपरवादिनंयदीयोक्तिः॥संजयतिबांधमनघंरंजयतिबुधान्व्यथाश्चभंजयति॥२३॥तेमीमांसाशास्त्रप्रमथन
परिकलितबुधजनानिंदाः॥लक्ष्मणमुनेः प्रबंधालक्ष्मणपूर्वजशरादूवजयंति॥२४॥अत्रकश्चिद्विपश्चिमोविपश्चितामित्थमेनमनुदिनंप्र
णमति॥रामानुजायगुरवेनरवेषभाजेशेषायधूतकलयेकलयेप्रणामान्॥योमादृशानपिकृशान्परिपातुकामोभूमाववातरदुदंचितत
बोधभूमा॥२५॥एतच्चाकर्ण्यताम्॥रामानुजौयामुनतीर्थसेवापरावुदीतौनरकंनिरोद्धुम्॥तयोःपुराणःप्रणिनायगीतांतस्यानवीनस्तततां
नटीकाम्॥२६॥क्रू०॥सत्यमेवंतथापितत्पथ्यानुविधायिनांमेधाविनामपिपरावमंतृत्वाद्योदोषाःप्रसिद्धाः॥तथाहि॥श्रीरामानुजदर्श
नैकरसिकैःशिष्टैःप्रकृष्टैर्गुणैःपूर्णानांविदुषांमतांतरजुषांपंक्तौनभुंक्तेक्वचित्॥हाहंतौदनमंततःशुचितमंतद्दृष्टमाक्षत्यजत्यास्तांतत्स्व
मतेस्थितैरपिसमंमायेणनाश्नात्यसौ॥२७॥अपिच॥तेषांन्यायद्रुहांद्विजान्वयजुषांभाषाप्रबंधेश्रमोवेदेविश्वपुमर्थसाधनविधौबद्धादरे
जाग्रति॥तीरंक्षीरपयोनिधेरूपगतोदैत्यारिदीस्यावृतेकोवाधावतिदुग्धलब्धिचपलोमांपालकव्यालयम्॥२८॥किंच॥एतन्मतानुवर्तिनां
केषांचिदेषांचेष्टानेष्टावैदिकानाम्॥पश्य॥मुंचंतःपंचयज्ञान्द्रविडभणितिभिर्मोहयंतोनभिज्ञान्निंदंतोहंतपञ्चज्ञानसक्तैरपिहरेर्वंदनंवारयं
तः॥लुंपतःश्राद्धचर्यांयतिमपिगृहिणोवंदनंकारयंतःसंद्वेषंधारयंतःकतिचिदविहितैरेवकालंक्षिपंति॥२९॥किंच॥घंटाघोषंत्यजंतोहरि
हरिचरणेसर्वलोकावगीतंख्यातं ॥ टी० १अजवत्करोति २उत्पादयतिषंजसंगेत्यस्यरूपंसंधभातीत्यर्थः ३ रामपरुतेऽमीइतिच्छेदः मांसाशाःराक्षसाःमीमांसा
शास्त्रं ४देवपंडितौ ५रामानुजकृष्णौ ६यामुनतीर्थोगुरुर्यमुनासंबंधितीर्थं ७निरयासुरौ ८ एकवारमेवभगवद्वंदनंकार्यमितितत्संप्रदायः ९ संतंवेषंसतांद्वेषंच॥ ॥ ७ ॥ ॥

त्रैलो[1]क्यमातुः श्रुतिभिरभिहितं वैभवं खंडयंतः॥ संकेतः श्रद्धयैव स्वचरणसलिलं स्वीयगोष्ठ्यां[2] पिबंतः केचिद्धि प्लावयंते जगदभिदधतः केशवं से
षभोग्यम्॥३०॥ अपिच॥ यज्ञाः पंचमहत्पदेन सहिता ये चापरे विश्रुता यत्कर्मग्रहसंक्रमादिसमये सर्वे बुधाः कुर्वते॥ तत्सर्वे विसृजंति कास्यमिति
यत्रत्यं तविध्वंसकास्ते हि नित्यतयाश्रितेयदर्शने याचव्यवाप क्रिया॥३१॥ अन्यच्च॥ विदुषामपि मोहमावहंतो वितथैर्निजसहस्रवर्णनेन॥ विन
याभिनयात्तवलाः किलामी विजयंते कपटालया जगंति॥३२॥ किंच॥ यस्यां नास्ति पुरस्कृतिर्नयविदां पश्चात्तु हास्यास्पदं पूज्यं ते च निरस्तराः
पुनरमी सांकेतिकाचार्यकाः॥ वेदानामवहेलनं व्यतिहतावर्णाश्रमप्रक्रिया गोष्ठ्यैव दुष्कलिपुष्कलीकृत पुषेकस्यै चिरस्यै नमः॥३३॥ किंबहुना॥
प्रायो येषां सकृदकरणे प्रत्यवायोस्ति भूयान्यज्ञादीस्तानिह विजहति स्पष्टवेदोपदिष्टान्॥ कर्मैवामी विदधति जडाः किंतु संकेतसिद्धं कष्टं क
ष्टं बत हत कलेः कश्चिदुन्मेष एषः॥३४॥ न गाहंते गंगामपि न टजंटोसार इति येन मज्जंत्यंभोधौ लवणरसवेशंतकं इति॥ नयेच्चैवं गव्यान्यपि पश्च
शकृत्सार इति ह्यपि बंत्येषां दोषान्क इह निपुणः स्याद्गणयितुं॥३५॥ वि०॥ किमरे कलंकलेशरहितेषु श्रीमद्रामानुजदर्शननिष्ठेषु गरिष्ठेष्वपि स
न्नह्यसि॥ अथवा भवादृशानां कृशविवेकानां का नाम मयोदा॥ उक्तं हि॥ अनल्पकंधरा या हि सर्वज्ञस्यापि दारुणाः॥ आरोपयंति मालिन्यका
कोलाद्भवते खलाः॥३६॥ इति पश्यतावदेतेषां पवित्रतमं चरित्रम्॥ उच्छिष्टान्यतिदूरतः परिहरंत्यकज्यंत्यसत्संगतिं प्राणापत्स्वपि बांधवेनर
गृहे प्राश्नंति नापोप्यमी॥ काम्यं निर्मिमते न कर्म भगवत्कैंकर्य एव स्थिताः सत्वस्थैः स्पृहणीय एष जयति श्रीवैष्णवानां क्रमः॥३७॥ किंच॥ भा
ले शुभ्रमृदूर्ध्वपुंड्रतिलकः पद्माक्षमाला गले दिव्यं शंखरथांगचिह्नमनिशं दीप्तभुजामूलयोः॥ वक्त्रे शौरिगुणैकवर्णनपरा वाचस्तदेनोमुषामे
तेषां हरिभक्तितुंदिलहृदां वीक्षापि मोक्षावहा॥३८॥ दोषारोपणं चैतेषु त्वदीयमुपहास्यम्॥ टी० १ स्वातंत्र्येण शक्तिपूजनं कार्यमिति तत्सिद्धांतः
२ संसदि ३ पंचमहायज्ञाः ४ सूर्यचंद्रोपरागो ५ दृष्टिविकासः ६ शिवः ७ संचयः ८ महांतं पक्षे अनल्पकंधरायामिति च्छेदः कंधरायां ग्रीवायां ९ शिवः बहुश्रुतश्च॥

नश्चाहि॥ दृष्टा स्वसंधानजनादितरैरदृष्टंयदंजतेन्नमिहलक्ष्मणपक्षनिष्ठाः॥ दोष१किमेषदुरितापहरोगुणोवेत्येवंविविंच्यपरिपृच्छ्यगुणाग्र
णाज्ञान्॥३९॥ किंच॥ दृष्टबुद्धिनरैःसत नैदत्तं ोयएषोपरैःशिष्टैःस्पृष्टमनश्नतामिहमहाराष्ट्रादिकानां समः॥ एषादूषयितानकोपि
निपुनाहारःपरंतुद्विजःसर्वाशीनतुदूषणादि तभुंजानेषामिदंभूषणम्॥४०॥ यश्च शठारिप्रभृतिसत्वस्थमुनिनिर्मितदिव्यप्रबंधाध्ययनेदोषउ
क्त्वादितःसोयमितिहासपुराणादिभिर्वेदमुपबृंहयन्सद्भिर्नरोचतेशृणुतावत्॥ बकुलविभूषणेनगुरुणाकरुणानिधिनाश्रुतिमुकुटाभिसंधि
मवधार्यपरंगहनम्॥रचितमिहप्रबंधमनुसंध ध्यतंसममपिदूषणंस्मृतिपुराणमधीतवताम्॥४१॥ किंच॥ उपादेयंप्राज्ञैरुचितविषय
द्राविडवचोप्ययुक्तार्थंहेयंभवतिवचनंसंस्कृतमपि॥ हरिंबिभ्रच्चेतस्यनतिस्तभगोपिस्तुतिपदंनसद्रूपोप्यंतःकरणधृतनारीस्तनभरः॥
॥४२॥ वस्तुतस्त्वगस्त्यव्याकरणानुशिष्टनामनवद्यशिष्टपरिग्रहविशेषप्रकृष्टानांद्राविडशब्दानांकोनामसंस्कृतादपकर्षः॥पश्य॥ सया
साव्याकर्त्ताचुलुकितसमुद्रोमुनिवरःप्रबंधारःप्रौढाःशठमथनमुख्याःशमधनाः॥ प्रवक्तारःशस्ताःप्रथितयशसःपूर्वगुरवोगिरांपारेनासांज
मतिगरिमाद्राविडगिराम्॥४३॥ यश्चैकदेशविषयदूषणोपन्यासस्तत्राप्याकर्ण्यताम्॥कतिचिदलसाःकर्मायासासहायदिनिश्चलास्तद
पिभगवद्भक्तिस्तेवांधुनोतिभवव्यथान्॥श्रमसहजनैकाहैर्न्रूणांविनैवहिलंघनैर्ज्वरनिरसनंशालवीयोत्तरंपरमौषधम्॥४४॥ किंच॥रह
स्यव्याख्यानेरघुवरचरित्रानुकथनेस्त्वयीसध्रीचीनांबकुलधरवाचांप्रवचनैः॥ अमीभाष्यारव्यानैर्हरिचरणवैकर्यविधिभिःप्रमाणेश्चायी
णांक्षपणमिवनयंत्यत्रदिवसान्॥४५॥पुनःसक्षणमनुध्यायन्सश्लाघम्॥अन्यदास्तांनामतामेवकाममन्योन्यकरुहायमानानांनानावि
१पृथक्पृथग्विचार्य२अनशनमकुर्वताम्३शठारिनामांतरं४अनिषत्तात्पर्यंनिश्चित्य५धारयत्पुरुषः६साधारणसुंदरोपि७लावण्ययुक्तः८अगस्त्यःद्राविडभाषोपर्यगस्त्य
मुनिप्रणीतंव्याकरणमस्ति९ग्रंथकर्त्तारः१०कर्मायाससहनासमर्थाः११स्थिरचेतसः१२श्रमसहकारिणो१३नैकाहाअनेकदिवसायेषुतैःअनशनक्लेशसहनसमर्थैकयोग्यैः१४
वैसनुसारिणानां

धानां श्रुतीनामविरोधसाधनेन साधुभावं प्रकटयंतीमखिलगुणाभिरामां रामानुजसरस्वतीमभिनंदामि ॥ प्रसिद्धं हि संधिमिच्छंतिसाधवइति
॥ पद्य ॥ निस्संदेहे यगुणा वधूननपरा नैर्गुण्यवादाः श्रुतौ मुख्यार्थाः सगुणोक्तयः शुभगुणाख्याप नाद्ब्रह्मणः ॥ अद्वैतश्रुतयो विशिष्टविषया
निष्कृष्टरूपाश्रयाभेदोक्तिस्तदिहाखिलश्रुतिहितं रामानुजीयं मतम् ॥ ४६ ॥ ५० ॥ अवितथमेतद्यथापि यइमे संचरंत्याचार्यपुरुषसमा
ख्याताएतन्मताभिनिविष्टाः शिष्टास्तेषामेषारीतिर्नरोचते विवेचकेभ्यः ॥ पश्य तावत् ॥ हत्वा मार्गे द्विजादीनखिलमपि धनं हृत हत्वा तिरे
स्तादृर्त्तास्तस्कराये वनगिरिनिलयायेचनीचाइहान्ये ॥ कृत्वाच क्वा कमेषां झटितिविदधतः किंत्वभत्रोप देशं तद्वृत्तैरेववित्तैर्दधति तनुममी
13 वंशपारंपरीभिः ॥ ४७ ॥ किंच ॥ जारान्चोरान्किरातान्जनपदद्मना न्याजपाशान्महाशाः शिष्यान्कृत्वातिद्दप्ताः श्रुतिपथविधुराः श्रोत्रिये
ब्रह्मनिष्ठैः ॥ साकं नो भुंजते मी सकृदपि विनतिं कुर्वते येन तेषां संकेतेनैव सिद्धं तदिदमविदुषां श्लाघ्यमाचार्यदुस्तं ॥ ४८ ॥ अहो महानयं
मभिजनविद्यावृत्तसंपन्नानामन्येषामप्यनिवृत्तो व्यामोहः ॥ आचारस्य दवीयसां घनतृषामज्ञातवेदाध्वनां कामातंककलंकपंकिलहृदां के
षांचिदेषाममी ॥ शुद्धाचारजुषो जितेंद्रियतयाश्रेष्ठाः स्वयं सूरयः शिष्यत्वं यदुशंति तत्किलकलेः साम्राज्यमत्रोर्जितम् ॥ ४९ ॥ अपिच ॥ स्व
यंतरितुमक्षमः किमितरान सौ तारयेद्दितेस्वयमचिंतयन्नगणयन्धनानां व्ययम् ॥ जडं गुरुरितिभ्रमन्नुश्रयति पुस्तकाडंबरैर्बहूपकरणा
न्वितैः पृथुलदेवताविग्रहैः ॥ ५० ॥ अपिच ॥ अमलमतिषु लोके जाग्रत्केष्वनेकेष्वपि निजगुरुवंशोत्पत्तिमेवावलोक्य ॥ विगतशुभचरित्रं
विदश्शास्त्रानभिज्ञं कमपि गुरुरितीमेकष्टमाराधयंति ॥ ५१ ॥ अपरमपि कलेराकर्णयच्चमत्कारम् ॥ सम्यक्शिष्यजनं परीक्ष्य वक्तृभिः सेव
त्सरैरुत्सुकैः शुश्रूषाभिरुपादिशन् प्रमुदिताः पूर्वे भुवीतिश्रुतम् ॥ आराध्येष्टसमर्पणैरविनतानाचार्य एवादरादर्थैर्भूरितमैः प्रशस्य
१ अनित्यत्वादनुपादेयाः २ मत्ताः ३ चक्रमुद्राचिन्हं ४ दुर्नृपान् ५ रहिताः ६ दूराणां ७ अतिलोभिना ८ इच्छंति स्वीकुर्वंति वा ९ महतीभिर्देवताप्रतिमाभिः ॥ ॥ ॥

लभतेशिष्यानक्रमेणाधुना॥५२॥ वि०॥ मंदमनीषमहतः पुरुषानेवंमादृषः॥ भवजलनिधिमज्जन्मज्जनोज्जीवनार्थंजगतिमहतिवंशोज्ञातवं
तोमहांतः॥ प्रपन्नधनतुष्टाः पंचसंस्कारज्ञानाकृतिनकृतिनएतेज्ञानहीनानपुनंति॥५३॥ अपिच॥ आचार्याः पुरुषा महन्नरकुलेष्वक्रोस
दास्योज्ज्वलानावः संसृतिवारिधेः परममीनावातरिष्यन्यदि॥ अत्राप्ताच्युतदास्यवृत्तयइहाविज्ञातमंत्रोत्तमाः सर्वेतर्हिकलावतप्ततनवोहंतापति
ष्यन्त्यधः॥५४॥ तापादिभिःसपापांजनतांपुनतांमहात्मनामेषाम्॥ दोषश्चेदेषसमोदुष्टात्पुनतोपिगांगपूरस्य॥५५॥ इदंचबोद्धव्यम्॥ सद्वंश
प्रभवश्चरित्ररहितोप्याहृत्यएवोत्तमैःसाध्वाचारयुतोपिदुष्कुलभवः सभ्येषुनाभ्यर्हितः॥ शालिग्राममहाद्रिमंपटुमतिःसलक्षणायुक्तमप्यादृ
तेनतुलक्षणाढ्यमपितंचक्रोज्ज्वलंकृत्रिमम्॥५६॥ सविनयमंजलिंबध्वा॥ शिष्यार्पितेनधनंचिनाद्रविणेनतुष्टाः शिष्टामुकुंदशरणापतिधर्म-
निष्ठाः॥ सत्संप्रदायनियताः प्रयताःसदायेतेभ्योनमोसिकरवैवरवैष्णवेभ्यः॥५७॥ इतिविमानमन्यतः प्रस्थापयन् अग्रतोदृष्ट्वा॥ एषाकेरविणी
विशल्यकरणीदोषाशुगार्त्तात्मनामेतद्रोधसिपार्थसारथिरितिख्यातः समिंधेहरिः॥ यस्माद्वाबुजचुंबिनास्फुरपतैः कोटीरगारुत्मतस्तोमानांतु
लसीदलप्रकरतोनोवेदभेरंजनः॥५८॥ अत्रवसंतःसंतश्चिरंतनोक्त्यंतचिंतनाश्रांताः॥ आनन्वंतेस्फचरितमानंन्वतोविभांतिशांतिधनाः॥५९॥
कृ०॥ अस्तुतथापिपरिकलितगुणप्रह्लाणहूणप्रायेहेपजनंनिबिडनगरविशेषसन्निकर्षएवात्रमहान्दोषः दुर्लभाः खलुहूणेभ्यः कुत्सिततः
मालोकेहूणाः करुणाहीनास्तृणवद्ब्राह्मणगणंनगणयंति॥ तेषांदोषाः पारेवाचांयेनास्त्वंतिशौचमपि॥६०॥ पुनश्चैतन्निर्वेदंविधिमुद्दिश्य॥ शो
चत्यागिषुहूणकादिषुधनंशिष्टेषुचक्लिष्टतांदुर्मेधस्सुधराधिपत्वमतुलंदक्षेषुभिक्षाटनं॥ लावण्यंकुरुनास्सुदुष्कुलभवास्वग्र्यौस्सुनीरूपता
कष्टंसद्धवतात्वयाहतविधेकिन्नामलब्धंफलम्॥६१॥ वि०॥ पश्यत्वमेतेष्वपिगुणग्राहिताम्॥ टी० १ तप्तमुद्रापुंड्रःमंत्रः नामनित्यविधिः २ विष्णुः ३ न
अवातरिष्यन्नितिच्छेदःनत्तरेयुरित्यर्थः ४ तप्तमुद्रादग्धदेहाः ५ एतन्नाम्नीनदी ६ मुकुटनीलमणेः ७ उपनिषद्भागाः ८ निरंतरासक्ताः ९ शरीरत्यागपर्यंतं १० विस्तारयंत
११ कुलीनास्सु॥

प्रसत्यनहरंत्यमीपरधनौघमन्यायतोवदंतिनमृषावचोविरचयंतिवस्त्वद्भुतं॥यथांविधिकृतागसांविदधतिस्वयंदंडनंगुणानुवशुणाकरेष्वपि
गृह्णाणहूणोघमून्॥६२॥इतिविमानमितःप्रतीच्यांदिशियोजनपंचकमतिक्रामयन्पुरतोदृष्ट्वासामोदम्॥इयंकांचीकांचीकरिशिखरिणःका
पिनगरीगरीयस्यांयस्यांविहरणजुषांपद्मलदृशां॥मुखंदर्शंदर्शंरजनिकरमादर्शममलंस्वरूपेकेपंकेरुहमपिननिर्वृतिरसिकाः॥६३॥किं
च॥स्मरमनोजननतास्थानस्थानेसद्रूपसेवनीसेयम्॥स्मरताभ्युदयविधात्रीशुभकांचीसाधुरंजयतिचेतः॥६४॥नगरीमेनांदक्षिणेनकरुणा
करीनभगवतीवेगवतीनामप्रवहतिपावनीशैवलिनी॥माधुर्याध्ययनोपसन्नमधुलिट्ष्यंदानिमेदानिलव्यालोलच्चटचारुभूरुहशिखानिष्यू
तपुष्पाधिकैः॥डिंडीरैःस्फुरत्तरंगवितिपातितुरितालहेगापगायास्फुरद्धेगोद्देजितवाजिमेधमखकुहूधासिपाथांसिनः॥६५॥इतश्चसखेचक्षुर्नि
क्षिप्यताम्॥पयःपूरराजत्करंकःमरालिभिःसमाश्रितःशोभनदानसंपदा॥सनित्यभूहूंवरदंतमुद्वहन्यथार्थनामागजभूभृदीक्ष्यते॥६६॥स
भक्तिप्रणम्यमंजलिंबध्वा॥हिपाचलस्युपाश्रितंत्रिदशपादपस्वर्गपीत्रपाकरमुपास्महेदिगधिपावनपावनम्॥कृपाशिशिरलोचनंकृतभवव्यथा
पोच्चनंवर्णास्मरभिलाषरंवरदनामधामस्थिरम्॥६७॥कृशानुमामन्यः॥वेरदंभोभजसततंशरदंभोरुहविलोचनंदेवम्॥परदंभोपहतिकरंदहरे
दंभोनिधरमुखमरवार्थानुतम॥६८॥पुनःसानुस्मरणरोमांचम्॥तापत्रयप्रशमनादमृतंगृहीत्वातामिववेधसमपधवपामुपासे॥अंभोधिजाधरस्फु
रसघांकृतेनयाञ्चुंबितावरदराजमुखांबुजेन॥६९॥पुनःसानंदम्॥भुवनवहनशीलासिंधुरागंभजेलीजयदवरदमूर्त्तिःसाधुवेगापगाच
॥इत्यचिंत्यमवतीर्णांधानपजंछितीयासफलयितुमिहाध्यासादप्रादुरासीत्॥७०॥टी॰१कांचयंमादि२हस्तिगिरेः३सौंदरीणां४दृष्ट्वादृष्ट्वा५कामासक्ता६सुभुम
भ्रोः७मेनेन८सुंदरतरम्सेवनीयम्सद्रूपं९रेवसंपीरतिश्च१०क्षेमभूपणं११एतन्नामकानगे१२कदाचिद्ब्रह्मासरस्वतीमनादृत्यभुवमागत्याश्वमेधंमारब्धवान्तदारोषवत्यात
मार्गमंतरिक्षिप्तवतिनयाअनेकाश्वमेधफलनिर्गमेविधातसरस्वानि१३नरदराजः१४हस्तिद्री१५कृत्वा१६कामधेनुम्यः१७ब्रह्माश्वमेधसंबंधिनी१८वरदंभोइतिपदं१९शिवेंद्राद्२०उद
केआगच्छ२१सप्तद्वीपानिहिमनमम्म

यस्यन वेयंजयानभिज्ञेतस्मिन्नजयती त्यक्तिरयुक्ता॥ सवनसफलीकरणभणितिरपितस्यातिकूल्यभाजिनोचिता॥ तथाहि॥ अजयंज्ञो
ऽस्वेतस्मिन्कथनामजकूनता॥ सवनाशानुकूलेकासवसाफल्यकारिता॥७१॥ वि०॥ सरेवेश्लेषभंग्यैवदोषमुद्भावयिताभवतातस्मिन्नखिल
कृतेवाविष्कृता॥ युक्तंचैतत्॥ पद्मोल्लासविधायिनिसत्यर्थदीप्तिस्फुतिचक्रेभव्यकरे॥ भास्वतिवरदेभवितानजातुदोषानुषंगावातापि
॥७२॥ समंतादवलोकयन्नंजलिबध्वा॥ सेवेनंतसरःश्रयेकरिगिरिंश्रीपुण्यकोट्यासमं ध्यायाम्युत्तरवेदिमत्रमहितंदेवाधिराजंभजे॥ कल्प
पोंकलयामिकंजनिलयांकल्याणकोटिस्थितामीडेराघवयादवादि मकिटीन्वंदेमुकुंदाश्रितान्॥७३॥ इतिप्रतीच्यांदिशिकिंचिदंतरमति
क्रम्यसविस्मयानंदम्॥ अत्रहि॥ स्वावज्ञानसमून्मिषद्दुषिसरस्वत्यांविरिंच्यध्वरप्रत्यूहायनर्दीप्रवाहविधिनापर्यापतंत्यामहो॥ दूनेनुद्रुहि
णेगणेचमरुतादीनेमखंविघ्नतः पातुसेतुरूदेषसेतुरभवत्सद्भीदृकेतुःस्वयम्॥७४॥ किंच॥ परंवेगंसरस्वत्याउहूेगमपितत्पतेः॥ एषसेतुर्वि
धरणोन्यरुणद्धगपत्प्रभुः॥७५॥ अपिच॥ आशामीशानबंधोश्वरणनलरुचांधारयास्मेरयंतीकुंभीडिंभैस्यकाष्ठामपिमणिमुकुटन्यु
प्तमुक्तामयूखैः॥ पर्यंकेवेदविद्यापरिमलसरलेपंकजस्पर्धिनेत्रावक्तिर्वेगापगायांस्वपतिसमुदिताकापिताफुल्लवर्णा॥७६॥ समंत्यभि
त्तं॥ प्राजापत्यमखांतरंयतदिनेप्राथोनिरोधोद्धतः प्रासःपावनहेमतामरसिनीपारंकृपारम्यधीः॥ स्मेमंको गलमल्लिकासहचरः पुष्णा
तुकृष्णांबुदच्छायःसोभ्रमवातरन्महतिपारंगैर्भुजंगेशयः॥७७॥ पुनरनुध्यायन्सानंदम्॥ श्रीतमरवमणिस्तोमशय्यामंशयनंमहीश्वरेश
शिसखसुखंराजीवाक्षंसमुन्नतनासिकं॥ महितचरणंधातुःपत्न्यामहस्तमसःपरंहृदिलगतुमेबिंबोष्ठंतद्यथोक्तकृतांह्वयम्॥७८॥

१ विधातृयज्ञोत्पन्नापक्षेजयानभिज्ञजन्मा २ यज्ञभागाशनंतन्नाशश्च ३ लक्ष्मीकमलंच ४ आकाशवेदमार्गौ ५ चक्रवाकहिताःपक्षेचक्रयुक्तकरे ६ सूर्यदीप्ति
स्पंश्च ७ रात्रिर्दूषणंच ८ संज्ञकंविमानं ९ एतत्संज्ञकंस्थानम् १० अगस्त्यः ११ शेषे १२ सरसीं १३ तद्भार्या १४ श्रीरंगक्षेत्रे १५ यथोक्तकारीतितन्नदेशप्रसिद्धनाम॥ १६

किंच ॥ वेत्रवतीसेतुनयाभ्रागवतीर्णांद्दिदेवतावितुतान् ॥ भागवतीयंदुरितांद्भागवत्तीकलशजलधिकन्यास्वम् ॥७९॥ कृशानुः ॥ अहोकथमा
श्च कविः सन्नपिभवानमुंदेवमभिनंदति ॥ तथाहि ॥ अंधः करोत्यादिमशालिङ्कोरंगकलानिधिं धिक्कुरुतेमुखेनयः ॥ कृतांतरायस्यसरस्वतीज
वेस्तवेरुचिस्तस्यकथंभवेत्कवेः ॥८०॥ वि० ॥ किमेभिः श्लेषैकावलंबनैर्दोषैः मुंदेवमाश्रितेषु खल्वप्रत्यूहः सरस्वतीप्रवाहो विजयते ॥ पश्य।
कल्पंतेकामरामास्फुरदधरसुधागर्वसर्वस्वमोषोद्युक्तान्युक्तान्यमीषांरसिकजनमुदेधातृयोषाहिएषाम् ॥ श्लाघावेलास्फुरल्लालायितनिज
मुकुटाकल्पकल्पद्रुसूनोड्डीनास्मिन्नाननतानाकलनपरिमलश्चारुवीणाभिगाना ॥८१॥ किंचिद्दुत्तरतो दृष्टिमाधायसांजलिबंधम् ॥ क्षेमारंभ
निदानमामुकमुषांहेमाद्रिमाम्बुजस्तोमायातमरंदलंभितपयोभूमास्वभूमानिता ॥ सह्याद्रिप्रभवांसमानविभवामस्मामसह्यार्तिहृत्पुण्यायोगिव
र्ण्यपुण्यसरसिंदुह्यास्सलांहसे ॥८२॥ इति दक्षिणतः सादरमक्षिनिक्षिप्यसांजलिर्भूत्वा ॥ विश्वाल्हादकरींकरींद्रसरसीकल्हारपारंपरीभव्यामोदधु
रंधरानिलजडैर्दिव्यालयेजाग्रतीम् ॥ कष्टग्रहनिवर्त्तिनींघनतपःक्लिष्टात्मनांयोगिनामिष्टामप्रभुतांभजामिविबुधैराराधितांदेवताम् ॥
॥८३॥ अथप्रतीच्यांदिशिकिंचिदंतरंगत्वाविमानमागमय्यसहर्षम् ॥ त्रिदशाकलितस्तेनैर्हंस्भैःसंभ्रान्तमपंस्तमः ॥ भातिदीपप्रकाशो
नशाऽयोगतबोधकृत् ॥८४॥ कृ० ॥ दीपप्रकाशसंज्ञादेवेस्मिन्नुत्तमस्फुरणे ॥ रात्रिचरम्यतिकूलेनदीपजातोल्लसद्दृचोनाहो ॥८५॥ वि०
॥ मदयन्तमेवंभाणीः ॥ प्रकटितदशावतारेप्रचुरांज्याकलनभावितस्फुरणे ॥ दीपप्रकाशनाम्नसमंविभावयुदितिभीतिहरे ॥८६॥ निरू
पणपरम् ॥ श्रीरंगेश्वरशासनादधिगतश्चलंचलाचार्यकंदान्तेयंकविवादिदंतिहरिरित्यार्यावदंतिक्षितौ ॥ सर्वस्यामपिहंततंत्रसर
१ ...धिम् २ देषाः ३ कीर्तिने ३ तलंप्रीतिश्च ४ तिमिरंअज्ञानंच ५ देवतादीपप्रकाशश्च ६ गृहंरक्षणंच ७ उत्कृष्टतमंस्फुरणंयस्मिन्पक्षेउद्गतंतमः स्फुरणंयस्मि
दीपः= नदीपःसमुद्रः तस्माज्जातालक्ष्मीकौस्तुभौवा ९ दशावताराःप्रसिद्धाःपक्षेदशानांवर्त्तिकानांअवतारः १० प्रचुरांयदाज्यंपक्षेप्रचुराःआजयःसंग्रामाः ११ तांता
चार्ये

...त्वा तं न्यभासेद्दुषां स्फुरन्मासु हि वेंकटेशकविराडत्राविरासीत्प्रभुः॥ ८७॥ जनानुद्दिश्य॥ भेदाभेदाविषयवादापतद्दुरुपपादार्थसाधकमदो
१७ द्धृवेतां वहाद्भुतगर्भ...प्रगास्पदविनोदापह्नारभणितिः॥ पादारविंदनतखेदापहारचतुरो ह्यमारमाधवगुणास्वादाभितुष्टहृदयो मोदाय वो भ
यतु वेंकटदेशिकाग्रमणिः॥ ८८॥ अपि च॥ नानाम्नायपरिश्रमं कलयतां नास्येव शास्त्रेषु धीः सत्योरप्युभयोस्तथा न संस्कृतभाषा हि स्फीतोत्साहिती:
॥ अन्ये तास्ति सती सुनास्ति विनयो नाचारभक्तिसमाचातुर्यः सच सा च सा च स च ता अथ्वा लंब्यं स्थूलं स्यमुम्॥ ८९॥ किं बहुना॥ अवंतिमास्येतत्सुपा
स्य स्वं गवेत मोजं कुदृशां प्रशांतम्॥ कुर्वंतमेतं गुरुमंतरेण गुर्वंतरं कोत्र गुणी वृणीते॥ ९०॥ टि० ॥ वयस्य मास्मैवमवोचः यदेतत्सलावलंबनं
तः पश्चात्तरस्वीकारएव वरमिति मे प्रतिभाति॥ तथाहि॥ यस्मिन्यस्ये स्ति मोक्षो गुरुणि लघुनि [illegible] नेप्य प्रयुक्ते श्लाघाहेतुः क्षमार्थव्ययकर
यजनाद्यव्यक्र्मप्रहाणम्॥ तं हंतोपेक्ष्य एष्टं श्रयति जगति कः काम्यवेदोक्तकर्मानुष्ठानावश्यपैत्वंत्र्यकटनकठिनवेदचूडार्यमार्गम्॥ ९१॥
टि०॥ निरूपणनिपुणोपि भवान्नु कथमेवं कथयति॥ वेदांतार्यविशोधितं हितपथं व्याधूय साधून्वितं चापल्यादुरुरुंधनेत्त दितरं पंथानमंधान
राः॥ इष्टं भस्म यकाल पावविकारे [illegible] प्रियालापिनं रोगार्ताश्चपलास्त्वतिनतु तयः पथ्यवादी भिषक्॥ ९२॥ किंच॥ आम्नायमौलिगुरुणा करु
णाकरेण नावा तरिष्यति यदी...नाब्धिना वा॥ अज्ञातभक्तिजगदश्रुतसच्चरित्रमज्ञातशास्त्रमभविष्यदेवेदिकं च॥ ९३॥ पुनरालोच्य॥
अथास्य खलु निगममौलिगुरोरशेषविद्यासमुद्रतलस्पर्शित्वादधुनातनविबुधव्यूहसमभिव्याहारो नोचितः॥ किंतु॥ निशमयति यः किल
हयशानिशामयत्यपि...चयो विम्बम्॥ ॥गजतुरगौ वदने यो तैः सह वेदांतदेशिको गण्यः॥ ९४॥ विचिंत्य॥ गंभीरशब्देन विशाल...रमो हयशापि
शान्त्य ग्रहस्मो वनेन॥ घंटा हरेर्वेंकटनाथरूपा कल्याणमुल्लासयति क्षनीनाम्॥ ९५॥ पुनः सचमत्कारं॥ वेदांताचार्यशब्दोस्मिन्वेदांतस्था १७
टि० १ वेग २ शास्त्रधियोः ३ साहित्यशास्त्रम् ४ चातुरीशब्दस्य बहुवचनम् ५ हयग्रीव ६ अज्ञानजम् ७ शेषः ८ आलोचना ९ घंटावतारो वेंकटाचार्यः॥ ॥ ॥

प्रकेसमः॥ इमंविवेकं कुर्वतोद्रांताचार्येचतंविदुः॥९६॥कृ०॥ कथंनामद्रुहिणगृहिणीचिकुरनिकुरंबचुंबिचंपककुसुमसुकुमारतराः॥ क
विकशककंठीरवगुरोरपिगिरोदुस्तरप्रस्तरनिष्ठुरबृंहिष्ठुसासूयहृदयंनिर्भेदायजायंते॥ वि०॥ सखेशृणुतावत्॥ वेदांतार्यगिरःप्रसूनमृदु
वोमोदंदधानाःसतांश्रद्धयाकर्कशैरकाण्यपिपरंभिंदंतिहृदिद्विषाम्॥ नंद्याद्यार्यजनाभिनंदितमृदुस्पर्शोपिपादोहरेर्दुर्भेदंभुकटास्करेतु
शतकोस्याकारमागान्नफिम्॥९७॥पुनःसप्रार्थनमंजलिंबध्वा॥दर्पाविष्टकुदृष्टिदुष्टसमयोत्सादायबोधांकुरोद्भेदायप्रबलेकलावपिजयोत्साः
दायवेधाध्वनः॥श्रीमल्लक्ष्मणपद्मश्रीकबुधामोदायपापाटवीच्छेदायाथिमरुत्तरुर्विजयतांवेदांतविद्यागुरुः॥९८॥ इत्य न्यतोदृष्टिं वि
न्यस्यसांजलिबंधम्॥श्री मान्गंभीरैतरवेगवतीप्रतीरभूमावघद्रुहिस्फुरद्दुरिवावतीर्णः॥कामादिवैरिगणमुल्बणमस्मदीयंकामासिकान
रहरिःकबलीकरोतु॥९९॥ इत्यन्यतश्चक्षुर्निक्षिप्यप्रांजलिःसन्॥ भयार्त्तजीवातुदयामहिम्नेवैकुंठधाम्ने कुरवेनमोसि॥ आम्नायउ
क्तःपरमेशितेतिनाम्नायउक्तःपरमत्रचित्रम्॥३००॥ युक्तंचैतत्॥यतोविष्णुःपरमइतिश्रुताश्रुतिः॥भवनपायरमोविष्णुःकस्मादपरमोभवे
त्॥युक्तंरमापतेरन्येदेवास्त्वपरमाइति॥१॥किंच॥ जाग्रत्येवशिरांसिनित्यवचसांसवैन्नतैर्याद्दुर्णैस्तत्रव्यासपराशरादिकृतयोदत्तादरा
वस्तुतः॥ यःपादांबुददातियस्तदुपसंगृह्णातिधत्तेथवापश्येतच्छिरसैवतेषुपरमंजानातिकोनात्मवान्॥२॥ पुनःसचमत्कारं ॥दुर्वादिनो
विष्णुपदारविंददोषापहंतानुसरंतिमोहात्॥ तेषांमतंतुस्वयमत्रविष्णुपदारविंदानुसृतिंविधत्ते॥३॥ इत्यन्यतोदृष्टिंविन्यस्य॥ समंतरूढ
[illegible]घितन्मरंदसंतम्भिषिक्तमुत्तमम्॥रविक्रमाधकृत्वनिरोधिगोपुरंत्रिविक्रमस्यायतननिशाम्यताम्॥४॥सविस्मयमभिध्यायन्
[illegible]रंकिंचश्लेष[illegible]ताचार्यशब्दविगतवेकंवेशब्दरहितंकुर्वतोलोकास्तमाचार्यशब्दंचदांचाचार्यंब्रुवतेतियुक्तमेवेति श्रीमहृतोपाल्ह्यलक्ष्मणा
[illegible]तकौशल्यम्॥२बजप्रयाताम् ३ कामासिकानामकनगरवासीनरहरिः ४ नआम्नायउक्तइतिविरोधाभासवैचित्र्यं ५ भनुत्कृष्टःलक्ष्मीरहितश्च ६ गगन
रविंद

१८ ॥ अनस्याश्रयतामनश्वरपदप्रासादनिश्रेणिकोहर्षादूर्ध्वमुदंचितःसचरणस्त्रिविक्रमोनःक्रमात्॥ त्रैलोक्यार्पणतःसितंशुभ्रयशश्छत्रंयदासीदु
१८ द्धृतःसिद्धोहरिनीस्त्वंगात्रदस्तद्धारणायोद्धृतः॥५॥ कु०॥ किमरेमापाविनमेनमक्रमंत्रिविक्रममभिनंदसि॥ पश्य॥ श्रीमानपिस्वयंदैत्यात्कु
तोणःकुर्यंतिग्रहस्थः॥ विंदन्नसमहतीं वृद्धिमिमगोत्रंभिदेददौ॥६॥ वि शिष्यायमकपदानांकवीनांनश्लाघनीयः॥ यतः॥ निस्त्राणपाशिग्रमदोपि
त्राथोबभूभवन्नवंचितसात्तकोसौ॥ कविव्यथाहत्खलुभूस्करोपिभूदानवत्त्वसममेवभेजे॥७॥ वि०॥ अभ्युपगच्छामएवभवतःप्रौढगुणदो
षीकरणपांडित्यमास्तामेषश्लेषचमत्कारः॥ आकर्णयतावदेतत्॥ पराश्रितरक्षणायप्रवृत्तेःक्षणःस्वमहत्वानतुरूपमपिरूपमापेदे॥ निस्त्रान
तोपिनिरपायरमाश्रितोपिदातापिहंतबहुशोमहतांपदानाम्॥ स्वीकृत्यवामनवपुःश्रितमिंद्रमेशः पातुपदत्रितयमत्रबलिंविभिक्षे॥८॥ पुनः
सभक्तिप्रकर्षम्॥ त्रैविक्रमास्त्रिपथगाजनकःसपादःपायात्सुरस्यमरुतांमरुतांनिहंता॥ शंभोःस्फुरन्मुकुटभूषणदानचंचुसंभोनिधेःश्वश्र
रमास्तगिरोयमाहुः॥९॥ इतिकिंचित्सरिक्रम्य॥ अत्रहि॥ कांचीनगरविभूषाकामाक्षीकल्पमंजरीभजताम्॥ रक्षाकरसेनानांराजतिशर्वस्यस
र्वस्वम्॥१०॥ इतिनिरूप्यसरितस्यमानंदकामाक्षीमाभंत्र्य॥ दंतश्रीस्तवदृश्यतेयदितत्कुंदंननिंदंतिकेवक्त्रंयद्यभिलष्यतेबुधजनश्चंद्रंनसं
द्रक्ष्यति॥ दृष्टेदृष्टियुगेणनेनविदुषांह्यालोपिनीलोत्पलंसूक्तिश्चेदनुभूयतेमधुरताकामाक्षिकामाक्षिके॥११॥ कु०॥ यद्यपिविद्यतेकामाक्ष्या
सर्वाभिनंदनीयसौंदर्यम्॥ तथापिमुधातदितिप्रतिभाति॥ तथाहि॥ कांतोविरूपाक्षइतिप्रतीतःकामस्यहंतागिरिराजपुत्र्याः॥ स्तंबेरमास्य
स्तनयोःपितस्यालंबोदरःकिंफलमाभिरूप्यम्॥१२॥ अनयोःखल्वंबिकात्र्यंबकयोःदांपत्यमननुरूपमितिव्यक्तमेतत्॥ अयंहिसर्वमंग
लासत्तुस्मशानमंदिरोविभातिहैमवत्यसौसयातिदिक्षुभिक्षुकः॥ इयंतुकुंकुमांकितासभस्मराशिरूषितोप्यरालकुंतलाचसाजलाभिरेषभीषणः
१लक्ष्मीसपदे२कुत्सितपृथिव्यो३इंद्रकुलानाशकौ४भूदैत्यत्वंतत्स्वीकारकर्तृत्वंच५स्वभक्त६निर्जलत्वं७शिवःश्लेषेतु विरूपेकुत्सिते८अक्षीणीति९मंगलविरुद्धंह्येतत१०सुवर्णाले १८
कृताहिमनगस्यकन्याच

वि० वयस्यमैवंवादीः॥ नखल्वप्रशस्तैरप्यावासवासः प्रभृतिभिः सांसिद्धिकमभिरूपाणामाभिरूप्यमपह्नीयते॥ विनस्तांवाङ्कृत्तिंनिवसतु
चिरंवापितृवनेशिवस्तावद्रुत्तामहिगणमथाप्येषसुभगः॥ परीतंशैवालैरुषितमपिपंकेषुमलिनान्नलीनो॥ बिभ्राणंकिमिहकमनीयंनकमल
म्॥ १४॥ किंच॥ रमणीयःसह्रिपुरूपोरमणीयत्रैवरज्यतिविदग्धा॥ श्लोकः सएवसुभगश्चित्तंसक्तंहियत्ररसिकस्य॥ १५॥ अवधार्यतामति
मात्रमत्रेदंविचित्रम्॥ शिवास्यालोकितःकामोजितइत्येवशुश्रुम॥ व्यत्यासात्रजितोयस्मात्कामास्यालोकतःशिवः॥ १६॥ पुष्कलंकिलपु
त्रभाग्यमपिपर्वतराजकन्यायाः॥ यतः॥ कुशलीभनाथवक्त्रः पुत्रः प्रथमोहिमाद्रितनयायाः॥ पंचास्यात्पितुरधिकः षडाननोनन्दनोहिती
योस्याः॥ १७॥ इत्यन्यत्किंचिदपीक्षामन्त्रामोदम्॥ शशांकमौलिःसहकारमूलेकैलासवासीसइहाविरासीत्॥ यस्याग्निभूर्हेकुचतनू
भवश्चयोवापिभूषापिनागराजिः॥ १८॥ कु०॥ वयस्यकिंवर्णयसिविश्वविलक्षणचरित्रंरुद्रंलोकेहिलोचनशैत्यमपिपादविषयायत
मानम्॥ जनानेवपश्यामः॥ अयंतुपशुपतिस्थाणुरितिस्वाह्वयमन्वर्थयन्निवआशक्त्रुस्थाणुमस्मिन्निसिमवान्॥ वि०॥ अवधेहिताव
दभिधास्यामिरहस्यम्॥ अंगानुषंगोदितसीतबाधामिदोषुसिंधोश्चसमन्वयेन॥ दर्तुंवदन्यस्याग्निमपीतृतीयोहरोहसंतीमिवहंतदृष्टिम्
॥ १९॥ कु०॥ हंततर्हितुहिनकिरणशकलासुरसरिज्झरीशिशिरशिरसस्त्रिपुरहरस्यकथमभिषेकप्रियता॥ ततश्च॥ गंगातरंगावलिभिःसु
धांशोःसुधाझरैश्चानिशमार्द्रमूर्ध्नः॥ वृथाभिषेकंकलयंतिशंभोस्तृप्तायतोयस्यदहस्यपके॥ २०॥ वि०॥ अत्रापिसुक्तमुत्तरंव्याहरामि
॥ ज्वलनानलनाद्विषस्यपानाद्विषभाजांवदनाच्चुतत्समूर्त्तेः॥ अनिशंत्रिदशापगाधरस्याप्यभिषेकप्रियताशिवस्यजाता॥ २१॥ कु०॥ अ
पि ... थाप्यन्य ... पते॥ किमसौविहायविहायसे ... ततंशंकरशिरसिगंगातरंगांतःप्रतिवसतिमृगांकःकृशांगः॥ टी० १मनोज्ञानांरूप
... वतीकामास्विरामेनेत्रतेनजितइतिविरोधः ४ एकाम्रेश्वरनामाशिवःआम्रेश्वरइतितद्देशप्रसिद्धः ५गुहः अग्न्युत्पत्तिस्थानंच ६नगराजस्येयंनागराजिःनागानांराजि
रितिच ७अंगारपात्रम्॥

१-दे॰ वि॰ ॥ शृणु सखे तत्र कारणम् ॥ शिवशिरसि सीतभानुः सागरसूनुत्वसूचनायपरम् ॥ अधिवसति नन्महिष्या गंगायाजठरसंल्पतनुरेषः ॥२२॥
१९ [illegible] पिलुब्ध [illegible] भिरनादृत्यः ॥ तथाहि ॥ सूक्ष्मसितांशुकलाभेप्यपटो हैमधरपदनिविष्टोपि ॥ लुब्धो यमयोहस्त स्तुलइलेसत्त्वेप्य
टत्यहो भिक्षाम् ॥२३॥ अन्यदल्पमिदमुच्यते ॥ यच्छेकरसंगान्नंगायामपि जीवनदायिन्यां संक्रांतात न्ताललुब्धता ॥ पृष्ठय ॥ मुक्ता श्रिता वि
ष्णुपदादुदीतागांगेयमुत्याद्यवरूप्रकृष्टम् ॥ प्राप्यापि रत्नाकरनित्यसंगंकपर्दिकाशांनजहातिगंगा ॥२४॥ अन्यच्च ॥ सर्वतोमुखसमृद्धिजु
षोद्यत्पौंडरीकंघनवासनयापि ॥ यत्तयाव्यवधिजन्तुमरवृत्तत्तत्र घाति चिरसंगतिदोषात् ॥२५॥ पुनर्विमृश्य ॥ ईशः करस्थीकृतकांचनाद्रिः
कुबेरमित्रं रजताचलस्थः ॥ तथापि भिक्षाटनमस्य जातं विधौ शिरस्थे कुटिले कुतः श्रीः ॥२६॥ [illegible] रूढधर्मा कृत्तिवासानस्तोतव्यः ॥ शृ
णुतावत् ॥ धत्तेमं ह्यो मूर्ध्नितदोषधीशमोषबुधं भालतले गकेषु ॥ फणींद्रमौलिस्थमणिप्रसूतेहरांधकारित्वमथाप्युपैति ॥२७॥ अपिच ॥ तार
कारिं वहन्नंके मस्तके ताराधिपम् ॥ अंगीकुर्वन्नुमदृश्मप्यलीकासोविभात्ययं ॥२८॥ वि॰ ॥ किमेभिः शब्दश्लेषैकशरणैर्दूषणैरस्य खलुम
त्फंजपस्य विश्वस्तत्यमसदृक्षेत्वन्यत्वम् ॥ दीर्घायुर्मुनिसूनवे प्रददेदिव्यं तथाभीष्टं प्रख्यातायभगीरथायभगवत्पादामृतं प्राददात् ॥
पापेभ्योपिच बाणपत्तिवदनप्रेष्ठेभ्य इष्टफलं प्रादात्तस्य शिवस्य भाति जगदाल्हादायवादान्यकम् ॥२९॥ कृ॰ ॥ तदेतन्याहतं भाषितं ॥ यन्म
हादेवस्य वादान्यकं जगदाल्हादायेति ॥ यतः ॥ दत्वा वरान्दानवराक्षसेभ्यो विश्वस्य चस्वस्य च यो विषादम् ॥ संपादयामास सशांकमौलि
र्दातृत्वमेतस्य तवैवहेयम् ॥३०॥ वि॰ कुटिलधिषणगुणमपि दोषदृति घोषयति भवान् ॥ तथाहि ॥ टी॰ १ एककलः २ चंद्रः वस्त्रेच ३ विरोधे हैमध
रस्ये दहैमधरं पक्षे हिमधरस्ये द४ मुभं लोहंच ५ तेंडुर्गणस्तेन लसतीतितस्य भावस्तत्वम् ६ मौक्तिकानि मुक्ताश्च ७ भीष्मःरूपर्णंच ८ द्रव्यं वसवश्च ९ सर्वतः प्र
सारि समृद्धिजुषा पक्षे सर्वतो मुखमुदकं १० पुंडरीकं कमलं तत्संबंधि सुगंधि पुक्तया पक्षे पुंडरीको यत्तः ११ दैवं चंद्रश्च १२ स्कं [illegible] १३ स्त्रियं दृष्टिं च १४ कुत्सितं भालं च १५ अ १९
ग्रेसरः १६ औदार्यम् ॥ ॥

दैत्येभ्योनवरान्सदास्यतियदित्र्यक्षोमुहुस्तर्हि तेनाशास्यन्भुवनस्यपेष्टमुदयंनाप्स्यहयांशाङ्गिणः॥नेक्ष्यायिष्यत मानुषादिषु हरिर्नोसेतु गीतादिकंप्रारप्स्यद्भगवान्भवार्णवममीनालंघयिष्यन्नराः॥३१॥ किंच॥पंपातरंगशिशिरानिलडिंभजातकंपान्निषति तपुष्पर साभिषिक्तः॥ संपादयत्यतुलसंपदमर्थिनोनुकंपासुधांबुधिरयपतिरंबिकायाः॥३२॥पुनर्निरीक्ष्यसम्लाघम्॥ अल्पोपिकांच्यामावासादासादयतिगौरवम्॥यतएतत्सुरस्याणुर्गिरीशइतिगीयते॥३३॥कृ०॥ अन्योन्यविरुद्धस्वभावाभ्यांदेवाभ्यामाक्रांतांनगरींकिंविनौषि॥देवौह्यावधिकांचिपश्यलसज्जःप्राचीप्रतीच्याशयोस्तत्रैकः कुरुतेविनापकमधश्चित्रंपुरश्चापरः॥एकोनित्यमनष्टमूर्त्तिरितरःख्यातोष्टमूर्तिर्जगत्यकोवारितवान्गजार्त्तिमचिराद्धत्तेगजार्त्तिपरः॥३४॥यद्वा॥ कांचीनाम्निपुरेस्मरेंद्रमहितेप्राकृपश्चिमोद्देशयोश्चित्रंदैवतयोश्चिरंनिवसतोरीतिर्विरुद्धामिथः॥एकोहिद्विजराजमप्यधरयत्यन्यस्तमुत्तंसयत्यंघ्रोहंतबिभर्त्तिकश्चिदपरःस्वेमूर्धनिस्वर्धुनीं॥३५॥विरुद्धदेवाक्रांतकांचीनगरसमागमाहारणधराधरोप्येवम्॥ तथाहि॥भेत्तास्तिगोत्राचहरिर्महासवज्जुषोहिरण्यगर्भस्य॥भयकृदिभास्याभयकृन्मूलांचलयोश्वकास्तिहस्तिगिरिः॥३६॥अयंचापरोदोषः॥दशानुषंगंचगदान्वयंचत्यक्तुंजनायेनिवसंतिकांच्याम्॥ दंतावलाद्रीश्वरमाश्रितास्तेदेहस्यतौनियतंभजंते॥३७॥वि०॥ सर्वमेवंसंभाषिष्ठाः॥ यतएकरूपदैवतमिदंनगरमितिसमभ्यर्थ्यते॥ शृणुतावत्॥ फणिपतिसरःस्फुरंतीभनायकधरोत्तमांगशोभितनुः॥ भवहरिसंज्ञाकांच्योःपूर्वापरयोर्हिदैवतंजयति॥३८॥ अन्यच्चास्यनगरस्यभूषणमेवनतुदूषणमित्यन्यत्रदृष्टिमाधायसानंदम्॥ अहोखलु॥ममाद्यपचेलिमभागधेयम्॥स्फुरयोवत्तोपगीतःप्रातःपद्माननोमुनिर्ध्यातः॥ व्यासेकृतोयःख्यातःप[illegible]वदूतःस[illegible]चेनितः॥३९॥कृ०॥अनुचितकर्मासौकिमर्थमनुवर्ण्यते॥टी०१एकाम्रेश्वरसमीपवर्तिसरः२पुरस्योःणुःपुरःसंबंधिस्थाणुरितिच त्रिपुरघ्नश्च३गरुडःगणेशश्च४गजेंद्रार्त्तिः५असुरः६गरुडचंद्रौ७भयंशंखश्च ८गोगायुधयोः९अनंतसरःपक्षेसर्पराजहारः१०आदौभनायकश्चंद्रःपक्षेइभनायकोहस्ति गिरिः११अप्सरोगण

सकलजगतामीशानोपि स्वयंविगतश्रियामिदमनुचितंदूतोजातोयएषपृथाभुवाम्॥ किमिह महतांहृद्यास्वच्छोत्तपोतनिकेतनेक्षितमधिप
तेर्भीमद्वासानुकंसदृश्यस्थितिः॥४०॥ वि०॥ पुरोभागिन्भगवद्गुणेषुदोषमनीषयाभवानेवदुष्यति॥ श्रूयतामेतत्॥ कवित्वस्यगांभीर्यमो
त्कर्षमृहेः प्रभुत्वस्यशौर्यगुरुत्वस्यविद्याम्॥ महाविश्यतायाःसदाचारपूर्तिमहत्वस्यसौलभ्यमाकल्पमाहुः॥४१॥ इत्यपरत्रविमानमानय
न्सानंदम्॥ अत्रहि॥ विकचरुचिरपुंडरीकखंडद्युतिमदमोचनलोचनप्रभावः॥ जयतिविजयराघवःसदेवःश्रुचितरगृध्रसरोवरोपकंठे॥४२॥
किंच॥ संपातिसोदरसरस्तटसंप्ररूढोभात्यङ्कतोविजयराघवपारिजातः॥ शाखान्तरेरूपरिसङ्गिरुदीक्ष्यतेयोयस्याधएवसकलःस्फु
मनःप्रपंचः॥४३॥ पुनःसभक्तिप्रकर्षम्॥ ज्ञानानुहृदय॥ भोभोभुक्तिमुक्तिप्रेप्सवद्दंदश्शूण्वंतुभवतः॥ विश्रुताश्रितवात्सल्यंवीरंविजय
राघवम्॥ नमस्कुरुतयोगृध्रंसमस्कुरुतंदाहृतः॥४४॥ अत्रचगृध्रपतिक्षेत्रेविश्वप्रसिद्धाकाचिद्वैचित्री॥ तनयार्थनयासमागताभिः
स्तरुणीभिःपरिभजितासुमुद्धाः॥ हृदमकुरमुत्रदेवशक्त्यासममासापुलकांकुरैःफलंति॥४५॥ कृ०॥ निजमहिमानुरूपस्थितिरसौ
विजयराघवःकिमीड्यते॥ श्रीकर्स्कंतोहंसमयूरवाहमुखप्रगीतोगरुडासनोसौ॥ क्षीराब्धितीरावसथोपिवासंकरोत्यहोगृध्रसरोति
केस्मिन्॥४६॥ वि०॥ तदेतद्यापयोधेरेतस्यभूषणभवनतुदूषणम्॥ तत्ताहृशुत्तमपदेतमसःपरस्तादस्तामयैरतुलसूरिभिरर्चितोपि
॥ अत्राविरस्तिहरिरेषचिरान्नराणांदृष्टिलूतार्थयितुमेवदृढानुकंपः॥४७॥ इतिदक्षिणतोविमानंप्रस्थापयन्सहर्षम्॥ इयंहि॥ गंगासिं
धुसरस्वतीभवहरातुगापूतंगात्मजारंगोभ्याशतरंगिणीवदघतस्यगारभंगावहा॥ श्रुग्धाराप्रमनोमनीषिजनतारब्धावगाहामुहुर्मुग्धा
नामपिशुद्धबुद्धिजननीदुग्धापगाहृश्यते॥४८॥ किंच॥ ॥टि० १एतन्नामादेवः२ वेदःशिफाच३ देवपुष्पपोः४दाहसंस्कारमकरोत्५ शुकाचार्यः
पक्षीचद् परमहंसाः७ षडाननःमयूरोवाहनश्चेतिपृथगपिश्लेषे ८ छंदोमयासनत्वंसूचितम्९ कांचननदी१० कावेरी११ पालस्तइतितद्देशप्रसिद्धा॥ ॥ २०

ममदुग्धनदीधनदीकृतमज्जन्मानवानवांभोभिः॥ बुधजातनुतान्तनुतां तनुतापकृद्घनाघानाम्॥ ४९॥ कु० भवत्त्वेवमथाप्यस्याः क्षीरतरं
गिण्याविधिनाकृताविरसता॥ कालुष्यलेशविधुरामधुरापि पयोनदी॥ रोचेतसाधवेयुक्तानोचेल्लवणसिंधुना॥ ५०॥ वि०॥ गुणमपि भणासि
दोषतया॥ यतः॥ क्वचनसमागतसिंधुनिधुनीजलेसाधुनिस्नानम्॥ पंकविलोपं कलयति संघट्टयति श्रियमिति स्मरंति बुधाः॥ ५१॥ किं
चिद्दक्षिणतोभिक्रम्य॥ मोहादिदोषरहितां तटवासिदेहिव्यूहाय कामपि मतिं महतीं दिशंती॥ स्वाहाकरोति दुरितानि शुभप्रवाहा वाहानदी बु
धसमूहकृतावगाहा॥ ५२॥ अस्याश्चोत्तरतीरे श्रोत्रियोत्तंसवाससयोग्यः॥ समग्रगुणोसावग्रहारः संलक्ष्यते॥ पश्य॥ कर्णानंदकरस्फु
रन्मधुकरव्याहारवाहापगारोधःश्रीरविमरंदबुंदिलपयः कल्याणकुल्यावृतः॥ आत्रेयान्वयविद्वद्ध्वरद्विर्गैर्धानुबंधापतत्सेमोभास्वरश्री
निफालइतिहिग्रामोभिरामाभिधः॥ ५३॥ किंच॥ साध्वग्रेसरयूपेतः साकेतनगरश्रियम्॥ अग्रहारो विभात्येष रघुनाथाभिरक्षितः॥ ५४॥ किंचिद्दि=
मानमुन्नमय्यसश्लाघम्॥ नद्योः पार्श्वद्वयमवलोक्य॥ चारुगुणैः सन्मणिभिर्जुष्टा वाहानदी पयस्विन्योः॥ उपकूलमग्रहाराउदग्रहारा इवावने
भांति॥ ५५॥ कु०॥ अमूनग्रामान् कथंकारमग्रहारान्प्रचक्षते॥ कृतवृत्तमुक्ताः रहिता यदेनानाश्रिताजनाः॥ ५६॥ वि० भवतास्त्वतिरेवसषांभं
ग्यंतरेणकृतोतिमृष्या हृष्यामि च अथसर्वतस्तुंडीरमंडलमवलोकयन्॥ सहर्षातिरेकं वयस्यस्फुटमस्यतुंडीरमंडलस्य पश्यतु भवान् पावनत्वं
रमणीयत्वं च॥ तीरेतीरेस्फुरति सरितामग्रहारोत्रभूयानग्र्योवर्गोधरणिमरुतामग्रहारेग्रहारे॥ वर्गेवर्गे धरणिमरुतां वर्त्तते साधुयज्ञो य
ज्ञे यज्ञे श्रवणसुभगस्तोत्रशस्त्रानुघोषः॥ ५७॥ किंच॥ तुंडीरमंडलनिवासिषु दुग्धसिंधुडिंडीरखंडनिभकीर्त्तिषु पंडितेषु॥ आप्याय्य

टि० १ दैवदृंदस्कृता २ [illegible] ३ कार्श्यम् ४ लवणयोगेपयसोनिषिद्धत्वादनादेयत्वमस्याः ५ विद्याद्यः सूत्रंच ६ उत्तमस्रकू विप्रार्पितो ग्रामश्च ७ अग्रेसराः श्रेष्ठा
येपूपास्तैरुपेतः पक्षे ८ अग्रेसरयूपेतः ८ रामभद्रोरघुनाथदीक्षितश्च ९ उत्तमरत्नानि साधवश्च १० श्रेष्ठाः ११ ब्राह्मणाः १२ फेनः १३ सेव्यमानम्॥ ॥ ॥

भानमखिलैरविगीतमेतद्रोचेत धूतदुरितं चरितं न कस्मै॥ ५८॥ क॰॥ हंत तस्मिन्नंतिमयुगेपि अध्वरकर्माचरताममीषांचरितानि कथमिवरो
चेरन्कोविदेभ्यः॥ स्वस्तित्रिवर्गसंपत्तिर्नैनचकुशलना यष्टुरनघा न च द्रव्यंशुद्धं न च हृदपशुद्धिः कलियुगे॥ प्रसिद्धिं कांक्षंतः परिमितधनेहं तत्कृपणा
वृथापश्वोलंभं विदधति तथापि क्षितिसुराः॥ ५९॥ किंच॥ शौचं नाचरितं यथाविधि कलौ शक्ता द्विजाः किंच ते येखल्वाचमनाप्लुवादि नियमास्ता
न्स्मर्तुमप्यक्षमाः॥ कामीषां पुनरग्निहोत्रनियमः केष्टेरनुष्ठानधीः काग्निष्टोममुखामखाः सपशुकाः क्वत्याग्निचित्यात्तु सा॥ ६०॥ वि॰॥ स्थूल
मनीषमृषा किमिति भाषसे॥ यतः॥ शिष्येभ्यः प्रतिगृह्य वित्तमुचितं संपाद्य विद्यांकुलाश्रद्धालून्क्रतिकल्पसूत्रचतुरान्लब्ध्वा शुचीनृत्विजः
॥ प्रीतिं भागवतीं प्रकाममभिसंधायाहरंतः क्रतून्धीमंतो गुगमंति संतुष्टतयं स्यंतं सुखाः संततम्॥ ६१॥ किंच॥ अयज्ञार्हद्रव्यावयमिति तु यज्ञा
द्विरमतां न कल्प्येत स्वान्नैर्ननु भगवदाराधनमपि॥ प्रयत्नेन द्रव्यं शुचि किमपि लब्ध्वा भगवतः कृते चेत्कैंकर्यं किमिति न तदेवाध्वरमयम्॥ ६२
॥ अपि च॥ हिंसाकृत्प्रत्यवेयादिति कथयति यो वेद एवैष यागे पश्वालंभं विधत्ते यदि कद्वहमखे वैदिकः संशयीत॥ हिंसात्वाभावमेवाध्वरपशुनि
हते राह शमानुजार्यस्तत्पक्षस्थोपि योनप्रसजति यजने कस्तदन्योगुरुर्हि द्ग॥ ६३॥ इदं चावधेयम्॥ हिंसांतरेष्वि(?)मखाश्रितहिंसनेपि जैनेतरो
यदि जनो भजते जुगुप्साम्॥ नायं तरेष्वि वनविंदति नंदनानां निष्पादनं किमनघेपि निजे कलत्रे॥ ६४॥ इदमप्यवगंतव्यं॥ ऋत्विग्विशुद्धिविरहादति
शंकया चेत्के चित्कलौ जहति नित्यमपि क्रतुं ते॥ मुंचंति गुर्वशुचिता विशयेन किन्न चक्रांकवैष्णवमनुग्रहणादि सर्वम्॥ ६५॥ किंच॥ सर्वैर्वेदैः स्मृति
गणयुतैः सेतिहासैः पुराणैः शिष्टाचारैरपि नियमितानध्वरान्मध्वरावैः॥ आज्ञासिद्धान्नहहजहतस्तर्हि रूढानि कृत्यान्यातन्वंतः कतिचिदितरा
नप्यमी शिक्षयंति॥ ६६॥ किं बहुना॥ यागं येवतवैष्णवा विजहति छद्मागच्छिदा भीतितः शिष्यक्लेशनसाध्वसाज्जहतु ते चक्रांकनप्रक्रियाम्॥
१ पशुहिंसने २ कलिसंज्ञे ३ कृतयुगवत्कुर्वंति ४ ब्रह्मनिष्ठाम् ५ प्रत्यवायं प्राप्नुयात् ६ संशययुक्तो भवेत् ७ प्रवर्त्तते ८ संशयः ९ समुद्रा १० मंत्रोपदेश ११ मुद्राधारणप्रकारः

पूर्वस्मिन्बहुसंमतिर्भगवतःप्रीतिःफलंनोधनान्यस्मीयोभिमतिःपरत्रफलमप्यपवर्गाप्तिरित्थंभिदा॥६७॥कृ०॥विहस्य॥तप्ताभ्यांशंखचक्रा-
भ्यांतापनंप्राणिनामिदम्॥छागालंभसमत्वेनसाधोर्किमितिवर्ण्यते ॥६८॥वि०॥गुणदोषतारतम्यानभिज्ञशृणुतावदिदम्॥छागालंभसह-
स्रतःक्षितिसुरस्यैकस्यहिंसाधिकातस्माद्ब्राह्मणतापनंनुकिमिदंतुल्यंपशोर्हिंसया॥शास्त्रात्ततप्तरथांगधारणमपिश्रेयस्करंचेत्तदावैदे-
वसवेपशोर्विशसनाद्धर्मोपिकिंहीयते॥६९॥इत्यलंशास्त्रयुतविहितसवनकरणावश्यकतासमर्थनेनकरबदरास्तित्वसाधकप्रमाणांतर-
परिकल्पनाकल्पेनेतिदक्षिणतोविमानमानयन्सशिरःकंपं॥खर्वीकृताखिलहृद्दारमणीमणीत्नामंजीरमंजुतरशिंजितरंजितेन॥वंजीपुरीयु-
वगणेनचक्वास्तिपूर्णासंजीवितोग्रपरिवंचितपंचबाणा॥७०॥किंच॥ऋक्सामयोश्चयजुषांचनिवासभूताःपूताद्विजाःस्मृतिपुराणकला-
धुरीणाः।कुर्वंतिवासमिहकर्कशतर्कशब्दतंत्रत्रयीशिखरसिंधुतलस्पृशोऽमी॥७१॥कृ०॥सहासम्॥नैतद्विभातिनगरेनगरस्यदुर्गप्राकार-
साधनदशासुविशांपतीनाम्॥युद्धोन्नमद्भटशिरस्तटनिस्सृतासृक्स्रोतःसहस्रभरविस्रपलास्थिसांद्रम्॥७२॥विश्वा०॥वयस्यगुणान्व-
यस्यपुनरस्यनगरस्यनिंदाछद्मनाप्रशंसामेवभवान्कृतवान्॥यतः॥पुरातनानांहिपुरातराणांप्रशोधितारोपिदिशांस्मभूपाः॥पुरंतदेतद्धपुरंतमा-
जौहृत्वाप्युपेत्याप्यलभर्थयंते॥७३॥कृ०॥निरूपणमभिनीयसास्वरसंहतचिरंतनानामिदानीतनानांचवसुंधराधुरंधराणांअवारणीयोसा-
वविवेकः॥पश्य॥प्राज्येहृतधनेस्थितेपिनृवरोराज्येपिसत्यूर्जितेसंभोगानुगुणाविलोचनगुणैरंभोजदंभद्रुहः॥कल्याणीस्तरुणीरुपेक्ष्य
करुणांहीनःससेनःस्वयंहंतुंशत्रुधरांविराद्भिलषन्मत्तुंरणेजृंभते॥७४॥वि०॥विरूद्धबुद्धेविवेकमेवतावददविवेकमाकलयसि॥तथाहि
॥संपद्धन्यसरिद्धरीसहचरीशापासमंप्राभवंनार्यःसूर्पकरावलीढरजनीछायास्फुटद्यौवनाः॥देहःस्नेहविहीनदीपसदृशइत्यालोच्य
॥टि०॥१हिंसया२सहस्राणि३विह्वलीकृत४शिवः५अधिपतयः६संग्रामः७स्वीकृत्य८स्फुटनदीवत्स्वल्पकालस्थायिनीम्९विद्युत्१०प्रभुत्वं॥ ॥

पृथ्वीश्वराःप्राणान्नुन्मुक्तिनाकमाकलयितुंशक्ताहिंयुक्तानले॥७५॥ शृणुसखेचमत्कारम्॥ रक्तैर्भटैरणमुखेरुधिरेणतस्मिन्रक्ता[1]भव
त्यमरयोषिदनुव्रतेव।पूरःसचेदतनुसायकखंडितांगःसाप्युच्चकैरतनुसायकखंडितेव॥७६॥ किंच॥ दीप्तोतिप्रभमाश्रितक्षितितरुंदि
व्येविमानेस्थितोगाढाश्लिष्टकृपाणपाणिकरजग्रस्तामरस्त्रीस्तनः॥ तत्संदृतनखक्षतोबहुतरंप्रत्यर्थिबाणक्षतंयुद्धाग्नौहुतजीवितुंनिजव
पुर्वीरोमुदावीक्षते॥७७॥ इत्यन्यत्रविमानंसंचारयन्परितोदृष्ट्वा॥ पिनाकिनींपश्यघनाघनाशिनींजलाच्चलघ्वींगरुडापगामपि॥ इदंतटे
लसंतिदेवनायकःपरोत्रसर्गादिवदेवनायकः॥७८॥ इतरत्रविमानंप्रस्पंदयन्सानंदम्॥ अद्यपतत्रिक्रमसञ्चरित्रंदेवःप्रीतःसप्रभातानि
शामे॥ श्रीसुष्ण्यंयन्मुष्णादहःसहस्रंक्षेत्रंप्राप्तंनेत्रयोःपात्रभावम्॥७९॥ अत्रहि॥ वरावराहरूपिणीचराचरांतरस्थितासुरासुरानुसेविता
धराधरादिदेवता॥ सदासदावलिस्तुतामुदामुदारसेवधिर्हिताहितोक्ष्यकेतनानतापतानतानयेत्॥८०॥ श्रीमत्कवींद्रश्वात्रकश्चिदित्थमनु
संधत्ते॥ सदावदातनिम्नगातटीकुटीरवासिनीकटीस्फुटीभवत्कराकटीश्वरीपदीयसी॥ रसारसादिहोदिताम्रसालसालसंवृतेवनेवनेषुदी
क्षितामदीक्षिताधिदेवता॥८१॥ कृशानुः॥ सोयंहेयप्रत्यनीकोपिशार्ङ्गीकष्टंपृथ्वीकांक्षयाभूद्वराहः॥ इत्थंसिद्धेब्रूहिभूलाभलोभात्कंकेवे
षंमानुषोनेहधत्ते॥८२॥ विश्वा०॥ अनभिज्ञोभवान्भगवदावताररहस्यस्य॥ शृणु॥ पाठीनीयंकामठंकैठभारिःकैटरूप्यात्तुकाठीरवंवा॥
अन्यद्वापत्सर्वमप्राकृतंसन्नासौतेष्वप्युज्झतिस्वस्वभावम्॥८३॥ किंच॥ श्रीकोलंभुविकोलंजगदालंबमवैतुंस्वामीशुभकामीकिलभू
मीमस्करातम्॥ वाराशिगभीरांभसिकाराभवनेभिग्रस्तामिहमुस्तामिवयस्तामुदहार्षीत्॥८४॥ सभक्तिप्रकर्षयज्ञवाराहमभिध्यायन्
तमामंत्र्य॥ द्राघिष्ठंकुहनावराहभगवन्दंष्ट्रात्मकंतेदृढस्तंभंसंप्रतिचिंतयामिजलधिस्तेनौघसंपूरितम्॥ यस्मिन्विंदतिदीपभाजनविधा
नामेदिनीमेदिनीचित्रंतत्रचरत्नसानुरयतेनिष्कंपदीपाकृतिम्॥८५॥ टि॰ १अनुरक्ता २कामबाणः ३एतन्नटे ४निधिरूपा ५शेषगरुडौ ६माहात्म्यम् ७वाराहं ८उत्सृनवान्

द्रुतमन्यत्राभिक्रामन्मंदानिलस्पर्शसुखमभिनीयसानन्दम्॥ कल्लोल॥ स्खलतल्लुजोल्ललुनवत्कल्लोलानिलोलनक्रीडापाटवगाढरूढहिमता
सौरभ्यविभ्राजितः॥ कावेरीसलिलावगाहरसिकः कुर्स्येषनेऽद्योमरुत् क्रांतानांमुहुरध्वनीनवपुषांयन्निर्धुनीतेश्रमम्॥ ८६॥ कावेरीनिरीक्ष्य
सशिरःकंपम्॥ हंतरंगपुरसंगतमत्राहंतरंगचलपंकजसंघम्॥ सह्यजायतइत्यंबहुमन्येसत्यजायततमःशमनार्थम्॥ ८७॥ एषाखलुदोषा
कुलसकलमनुजकुलसकलकलुषशोषणबद्धकंकणकंकणानिजतटनिबिडतमबकुलधवलकुलतिलकामलकाविरलसरलकुटजचंद
नमंदारसहकारकरलकेसरसरलबदरकदंबककदंबकगंभीरजंभीरजंबीरजंबुसंपूर्णपर्णकुसुमपलाशसमृद्धकपित्थलोध्रजीरअशिलीध्र
पाटलपटलजल्लिकक्रमुकप्रमुखविशंकटविटपिमंजरीपुंजसंजरीजृंभदुरुतरश्रमशमकरभकरंदरसग्रसनरतात्परपेपटदंदभ्रविभ्रमाल
बरोलंबनीकुरंबकरंबिततयाकलिंदनंदिनीप्रतिच्छंदतामनुविंदतीनिशाकलितविशालस्फुरदशाभवभ्रमशालिक्षितीशालिनिशांतकुः
शांगीजनमज्जनवेलाडोलायितपृथुलहारभ्रत्युप्रमुक्ताफलरुचिनिचयपरिचयसवितयाशुचिंतयापिपीतांबरपदांभोरुहसंभवसरिदेबुडंबरंवि
डंबयतीसततमंतर्गतचिरंतनपुरुषतल्पीभवदनंतफणामणिघृणिश्रेणीशोणीभूततयासरस्वतीमनुकुर्वतीपार्श्वद्वयामपिनैष्यमिककर्मानु
ष्ठानश्रुद्धाकक्षासनश्रद्धावनीसरारथ्यानवद्यब्रह्मयज्ञसमयसमधिगतमंत्रब्राह्मणाम्रेडनपूर्वकमजस्रसहस्रपत्रमध्यमध्यासीनानांश्रीरं
गराजश्रीभसरोजराजमाननिखिलनिगमपठनमुखरचतुर्मुखमुखवैखरींव्याचक्षणानांमदकरमरालयूनांवरतापरिरंभपरिचुंबनमुखानं
गसंगरेपर्वीभसमुत्सुत्वरैरभिरामतामरसपरागैरभिनवचंदनरसमसृणशरीरेवसलीलमाकंठनिमग्नमूर्तीनांसुगात्रीणांवेदनैरदसीये
पर्यस्तिविहायसाध्यारेनसमागतश्चंद्रमाःसन्निहितश्रीरंगधामास्वसमाननामाविधुर्विरचितानेकावतारइतीष्यरोस्वयमपिबहूनिरूपाणि
टि० १ पाथाः २ अत्रअद्यमितिच्छेदः ३ सःहिअजायतेतिचच्छेदः॥ ४ बहु ५ हंसी॥

वि· २ द्धानो विराजत इति भ्रांत्यां सत्यामनुरागमांद्यसंपादिकायामितरेतरदृढाश्लेषोन्मिषत्तोषाभिः कोकदंपतीपरंपराभिर्निराकृतायामकुंठो
२३ त्कंठेन सुवर्लोकेन निर्निमेषमवलोक्यमानैरलंकृता सरस्वत्याभिमुख्येन कवेरात्मजेति प्रसिद्धिं सार्थयंती शांतनवास्पदतया गांगेयतां
गिणीति संज्ञामन्वर्थयंती सभज्जनदुरितहरापि नमज्जनदुरितहरा निराकृतपथिकविश्रांतिः स्रवंतीयं कदलयति चक्षुषोरमंदमानं
दम्॥ प्रहसतिभवशोषकरीभवेन परितोषितां स्ववर्णनदी॥ दुर्वर्णरुचिरफेनैः सत्यसृता जाह्नवीमसत्यसृता॥ ८८॥ पुनः सश्लाघम्
स्वर्णवंतं विदुः कां तरामां हेमापगामिमाम्॥ दांपत्यमनयोरेतदनुरूपं विशोभते॥ ८९॥ क्रू०॥ साक्षेपम्॥ परिशोभितोभयपार्श्वामध्यमहि
तरंगराजेतः स्फुरिता॥ कथमिव दधाति कीर्तिं कावेरी कनकनिम्नगेत्येषाम्॥ ९०॥ विश्वा०॥ आपातदूषणमिदं निरूप्यमाणे अस्या गुण
एव स्यात्पश्यतां वटेनापरमरमणीयाम्॥ पीतांबरालंकृतमध्यभागा कल्हारमालाकमनीयवेणी॥ सेत्याद्रिकन्याजनकस्य गेहात्पत्युः
समीपं व्रजति प्रसन्ना॥ ९१॥ पुनर्निर्वर्ण्य॥ उद्गच्छदच्छतमगुच्छरसच्छिदरस्कास्तीरद्रुपेपि तरवः प्रतिभांत्यमुष्याः॥ एनांतरीतुमिह यत्न
जुषः स्वशीर्षबद्धावदातवसनाः पथिका इवामी॥ ९२॥ किंचिदंतरमुपसृत्याधस्तादवलोक्य सहर्षम्॥ श्रीरंगडिंभनयनानवकेलियो
ग्यनारंगमुख्यतरुपुष्कलनिष्कुटपम्॥ श्रीरंगदिव्यनगरीप्रथतेनयाब्धिपारंगतैर्बुधजनैः परिसेव्यमाना॥ ९३॥ निपुणं विभाव्य स
शिरःकंपम्॥ हंसानिष्कुटदीर्घिकावसतयः प्रक्रांतकावेरहालीलोद्यानचराः पतंजलिगिरा पुंस्कोकिलः खेलति॥ हूताहूतकथा यथा
विदधति क्रीडाकुमारा इह स्वैरं तांत्रिककारिकाः परिपठंत्येता मुहुः सारिकाः॥ ९४॥ किंच॥ प्रातः प्रातः पयसि विमले पावने सत्यपुण्याः
स्नापस्नायं सकलविषयत्यागिनो योगिनोमी॥ वारंवारं भुजगशयनं लोचनाभ्यां पिबंतो क्षामक्षेमाः क्षणवदखिलं कालमत्र क्षिपंति॥ ९५॥ क्रू० २३
टी० १ कवेरात्मजा कन्येति श्लेषेण २ शोभनं तमर्णं वं सुवर्णयुक्तं च ३ आम्रतां गूंद्धृति पदे ४ त्रपु ५ रूप्यं पक्षे तसिप्रत्ययांतम् ६ बहुलकल्याणाः॥ ॥ ॥

वयस्य विस्रब्धमेवाभिभाषसे ॥ सारंगदृष्टीः कथमुत्सृजन्ध्रुः सारंगदृष्टीः स्वदते मुनिभ्यः ॥ कवेरजा संगतिमुच्छ्रितश्रीः कवेरजासंगरुचिः क
थं स्यात् ॥ ९६ ॥ वि० ॥ सरवे भवता भणितानां पदानां व्यासेनैव विशेषः समधिपद्धत्यग्रतः पश्यन्नंजलिं बध्वा ॥ श्रीरंगे शोभते यस्य श्रीरंगेशो भ
ते च यः ॥ नमो हं कलयेतस्मै नमोहं कलयेत ततः ॥ ९७ ॥ किंच ॥ प्रणिपतिकर्मा कूर्मः फणिपतिभोगे शयं रथांगशयम् ॥ कारणमेकं जगतां वारण
पतिभीतिवारणं ज्योतिः ॥ ९८ ॥ कृ० ॥ किमस्मिन्महाभुजंगे क्षिपंते त्वया प्रणामाः ॥ तथाहि ॥ भूयामोत्तुंगपयोधरोज्ज्वलरुचिस्तन्वन्भुजंगा
न्वयं श्रीरंगस्थलनित्यवासिरसिकः शृंगारिणामग्रणीः ॥ प्राकारप्रकरांतरस्थितिमतीयाराजपद्मिन्यहो निःशंकं परपूरुषश्चिरमसौ लिहा
ति तत्संनिधौ ॥ ९९ ॥ वि० ॥ श्लेषावलंबनाद्दोषानमेरोषावहाः ॥ प्रस्तुततोषावहाइतिनाहमुत्रोत्तरयामि पुनर्निरूप्य ॥ क्षितिभृद्धिर्निजमौलि
धृतपादो विरहितापकारी च ॥ दृद्धरिवरंगबंधुर्दोषाभावे विलोक्यते किंतु ॥ १०० ॥ यद्वा ॥ नवविधौ श्रृंभरंगलक्षितांगे स्फुमुदाप्यायनकारिणी ह
द्धे ॥ कुलयामिकुरंगलक्षितांगं कुमुदाप्यायनकारिणं विधुं तम् ॥ १ ॥ पुनः संचिंत्य सविस्मयम् ॥ रंगेशसेवकोयुक्तं नोत्तरीतिं भजेदिति ॥ चित्रमेतद
संगीतिं व्यपदेशं यदश्नुते ॥ २ ॥ अन्यदद्भुतमुद्भूतमत्र श्रीरंगधामनि ॥ यच्चंद्राभिर्व्ययाप्येषाशोभते पुष्करिण्यहो ॥ ३ ॥ समंतादवलोक्य सश्लाघम्
॥ अंगमसन्नमि देरमेशितुरभिव्यक्तिस्थलं ध्वादिमं तीर्थं सेवमरुद्धधाभगवती यालोष्टवीनिश्रृतिः ॥ सर्वात्मा नगरस्य चास्य जगतां निर्वाहको नायको
वासश्चैतद्विहलभ्यते जगति को वैकुंठमुत्कंठते ॥ ४ ॥ कृ० ॥ साधांगीकारम् ॥ सोयं यद्यपि हृद्य एव विषयः सायंतनेंदीवरश्यामांगेनसनायकः कुत
तमो श्रेणीनरंगेंदुना ॥ भ्रांताः किंतु चरंति हंत पिशुनाः शांतात्मनां नापदः श्रीमतोयदुदंचनाद्भुतनरवल्त्वत्रासमत्रासते ॥ ५ ॥ किं बहुना ॥ नित्यं कांच
नसिंधुमध्यरुचिरो निष्कंपसंपन्नधिनिस्तत्स्यामपि कांचनश्रियमुरोमध्येदधानः स्वयम् ॥ बिभ्यत्किं पिशुनेभ्य एव बहुलप्राकारसंवेष्टितेशो ते

१ विलसर्पौ २ रंगस्थलंसेवंच ३ चंद्रनृपौ ४ राजापर्वतश्च ५ किरणाश्चरणाश्च ६ रंगसंतकेविष्णौ ७ सुरंगमित्यर्थः ८ प्रसिद्धचंद्रम् ९ नृत्यरीतिं आर्त्तरीतिं च १० संगीत्यभावः संगरहितश्च

धामनिरंगनायकइतिस्वाख्यामिहख्यापयन्॥६॥वि०॥सखेनजातुश्रीमतांहानिः॥प्रत्युततद्द्वेषिणांपिशुनानामेवभवंत्यनर्थाः॥परवित्तजिही
र्षयाप्रवृत्तःपिशुनस्तुस्वयमेवनाशमेति॥स्फुलभःशलभस्यकिंनदाहः पृथुदीपग्रसनायजृंभितस्य॥७॥ अलमन्यप्रसंगेनतमेवचरंगेशंश्रीरं
गधामाग्रजमनुसंदधामि॥सविस्मयं॥सपर्याविरुद्धादपिप्राप्नुमीष्टसमर्थोजगत्यांयतोराममचंद्रात्॥ अरंगाधिराजोदितप्रौढभक्तेरपिप्रापपूजां
सरंगाधिराजः॥८॥ अथवानात्रविरोधइतिसमर्थयति॥कुतस्तुहानात्सहस्तसंग्रहीराघवःस्वमम्॥ हंताकुरंगराजस्यरंगराजमपूजयत्॥९॥
खलःस्वभक्तिप्रकर्षंभगवंतमुद्दिश्य॥श्रुतस्फुरत्नुतिघोषेशत्रुखस्फीतरोषेनिहतविनतदोषेनित्यदास्याभिलाषे॥ललितवपुषिशेषेलब्धसंपू
र्णतोषेपरमपुरुषशेषेपर्वचंद्राविशेषे॥१०॥भगवन्रंगनायकभवदीयसदभिभाषितुमपिवयंबिभीमः॥ तथाहि॥ कर्तुर्व्याकरणस्यवाममितं
रघ्वस्यप्रवक्त्रीस्वणंभाष्यंव्याकरणस्यसाधुविदधेप्रख्यापदीयापुनः॥ यन्नाहोद्विजशेखरःश्रुतिमयोयस्यप्रभुषाभारतीगोष्ठ्यांत्रस्यतितस्यते
कविजनोरंगेशकर्त्तुंस्तुतिम्॥११॥ पुनरंजलिंबध्वासप्रार्थनम्॥ वरगुणगणसीमावारिदश्यामधामासततममरसामासंघसंगीतनामा॥परि
हृतभवदामाभासितकल्पहेमामममकलयतुभूमामंगलंरंगधामा॥१२॥ अन्यतोवीक्ष्यसश्लाघम्॥स्वामिनीस्तोमिनीलाब्जमदमोचनलो
चनाम्॥ अंगनांरंगनाथस्यदीप्तिंमूर्तिमतीमिव॥१३॥ देवीमुद्दिश्य॥मोहोन्मूलनमूलिकाभवजुषांमोक्षाध्वनिःश्रेणिकाचेतःशुद्धिविधान
सिद्धगुलिकाचिंतातमश्चंद्रिका॥ विद्याविभ्रमसारिकाःसिकमलेविष्णोरुरोमालिकामातस्त्वंममपारिजातलतिकामोदांबुधेर्वीचिका॥
॥१४॥ रू०॥ कांत्येवहंतरत्न्यापिकमलाममपिचंचलं॥ अशिष्टेष्वेवरज्जंतीमभिष्टौतिकथंबुधः॥१५॥ तथाहि॥ प्राकृपयेकमधिष्ठितोपिम
हुलंपालाग्रग्राह्यामपिप्रायःप्रार्थयतेकदन्नमिवयःक्षीरोदनंभुक्तवान्॥ प्राश्नात्येषकेदुष्णिकाममृतवत् प्रागात्तपीतांबरःकंथांयाचति।

टी० १ सभा २ स्थित्यास्वभावेनच ३ विद्युतंचपलांच ४ सुवर्णगृहं॥

[1]भृत्यतिक्षितिपतिर्लक्ष्मीकटाक्षाश्रये॥१६॥ अन्यच्चाभिधेयम्॥ दातुर्ह्यर्थिय एषवारणमगात्तद्ध्यर्थहोवारणंपश्याम्यद्यचिरादशेतभुवियोभूत्तस्य
शेतेभुजे॥ नाहारान्नपिलेभिरेयदवलाहारानभूस्तत्प्रियाविंदंतेकमलादृगूर्मिभिरहोनिम्नेभवत्युन्नतिः॥१७॥ इदंचबोध्यंश्रियमुद्दिश्य॥ हन्तु
वैधुजनान्धनार्थमनघान्गंतुःपरस्त्रीशतंरंतुंजेतुंद्विहिंसकैःसहजनैःसंतुष्यतोवंचनैः॥ वक्तुंस्तीक्ष्णमयुक्तमेववचनंपंक्तुंमितंचौरनंनि
त्यंनृत्यसिमंदरेषुकश्मलेच्छकत्यंतवैतन्मतम्॥१८॥ अन्यच्च॥ एषामन्यकलत्रदर्शनकलान्युत्पत्तिभून्येदृशोमूढंहृच्चपरार्थचिंतनविधौमिथ्या
नभिन्नंमुखं॥ अप्रज्ञातपशून्स्वबुभुक्षितशिशून्नम्रोदकैस्ताम्यतस्तेषांलक्ष्मिगृहान्नदृशाचभयभीतेवेहनावीक्ष्यसे॥१९॥ वि०॥ सर्वेमनसः
खेदजननीतवेयंवाणी॥ यतोदुःशीलेषुदृश्यमानाः साधुजनानुपयुक्ताःसंपदाभासाःप्रस्तुतमृत्फतरणकारणभुवनजननीकृपाकटाक्षवै
धुर्येनिबंधनाएव॥ उक्तंहि॥ गुणहानिरुरधिदुर्हितृवैमुख्यनिबंधनत्वमुचितंज्ञेनकेनचिद्विदुषा॥ सद्योवैगुण्यमायांतिधूलीलाद्याःसक
लागुणाः॥ पराङ्मुखीजगद्धात्रीयस्यत्वंविष्णुवल्लभे॥२०॥ ततश्च॥ संपत्तिःकिंपचेनानासंप्राप्ताकोपशेनया॥ नरकानुभवोदकैनसालक्ष्मी॰
कृपाफलम्॥२१॥ तथाहि॥ धन्यंमन्यतयातृणीकृतबुधाधर्मेषुदुर्मेधसःसेर्ष्याःस्तामसपुण्यलेशविलसत्संपल्लवाःपल्लवाः॥ पश्यासूनपहाय
पंचषदिनैराकल्पमल्पाद्वमे भोक्ष्यंतेबततातनाबहुविधाःकांतौनगर्तांतरे॥२२॥ यच्चभणितंभवतातत्रभवतःशिष्टान्लक्ष्मीनवीक्षतइतितद
ज्ञानोपबृंहितमेव॥ यतःसाधुजनेभ्योमुक्तैश्वर्यपर्यंतनिरंतरभगवद्भक्तिसंपदंप्रदत्तेदूरापास्तमारामयविकारावाराशिदुहितुरुदारकटाक्ष
स्याधारा॥ संभोगारंभजृंभन्मदकितवपरीरंभसंपीड्यमानाप्रौढस्त्रीरत्नहारप्रशिथिलगुणवन्भंगुराःसंपदोघाः॥ साधूनामास्मभूवन्स्फुर
पुरनिरयीकारदक्षाहिलोकेभोक्ष्यंतेमोक्षमंतेस्थिरनिरवधिकानंदधारात्मकंते॥२३॥ किंच॥ लक्ष्मीकटाक्षपूरःसजयतियदुपचयतारतम्ये
न॥ नरस्करपशुप्रजानांपतयःस्युर्हितजंतवःकेपि॥२४॥ टि० १ भृत्यवदाचरति २ कृपणाः ३ अन्यायेन ४ औकलिकम् ५ पंचषडवापानि ६ कृतांतोपमस्त
स्यपे

रू॰॥ कमलाकटाक्षातिशयो विभवोपचयहेतुरितिनोपपद्यते॥ यतस्तदल्पीयस्त्वमेव संपदुत्कर्षसंपादकम्॥ तथाहि॥ गजशिबिकातु
रगाःस्फुरन्नरस्यतन्व्या दृशा हरेस्तन्व्याः॥ मङ्क्ष्विभवति वा ह्यो नीरदजक्षाच हंतपक्षीन्च॥२५॥ वि॰॥ विहस्य॥ ईदृशीमुत्कर्षपिशुनामरविं
दालयामभिन्नदामि॥ किंदर्पदायकधनोपचयैप्रमत्तैः कंदर्पसायकहतेः क्षितिपैरिहेति॥ संतःपुरंदरनुतंत्वरविंदनाभेरतःपुरतदवनाव
नुचिंतयंति॥२६॥ पुनरनुध्यायसांजलिबंधम्॥ मातस्तेमधुसूदनप्रणयिनिप्रातःसरोजच्छटामुष्टीमुष्टिविचक्षणेशुभगुणेदृष्टीनमस्कुर्महे
॥ अष्टाभिःकिलदृष्टिभिश्चतसृभिर्जुष्टाःसहस्रेण वा देवा ह्यादशभिश्चयह्निषयतामेवार्थयंतेक्षणम्॥२७॥ इत्यन्यतोवीक्ष्यसानंदम्॥
उपरिपुनिग्रहरूपविग्रहदिवौकश्चक्रूचूतश्चक्रमदविक्रमोनहंता॥ मोदरसमादरसमेतदिहपूर्णः प्रक्षिपतुपक्षिपतिरक्षिपुगुलेमे॥२८॥ रू॰॥ किं
वर्णयसिस्रूपर्णमसुमतिक्रांतमपोदम्॥ तथाहि॥ अधिगतनिगमोगोपिद्विजराजोप्यच्युतंदधानोपि॥ निजगारकश्चंकारंनिःशंकंभिल्लपल्लि
कांगरुडः॥२९॥ त्रि॰॥ पक्षिराजस्यभिल्लपल्लिकानिगरणेनसाधुजनानुग्रहासाधुजननिग्रहसामर्थ्येसदसद्विवेचनचातुर्यंचव्यंजितमेतत्कथं
भूषणमेवदूषयसि॥ शृणु॥ गरुडोगिलन्नकिमपिकिल्बिषाविलं खलुभिल्लजालमुषितंतदंतरे॥ निरजीगलन्निजगलादिलासुरंभवतःप्रप
न्नमिवपन्नगेशयः॥३०॥ हंतशाकुंतपुरंदरस्यास्यस्वच्छंदविहारावसरेष्वप्यभंगुरमेवस्वामिकैंकर्यम्॥ यतः॥ स्वज्येष्ठप्रेपहयोश्रितरथघूर्णि
मन्मंडलस्याच्युताध्वसन्मार्गपक्षवातोद्धतधरणिरजच्छन्नमेतज्जवेन॥ कल्लोलैरुल्लसद्भिः प्रचलजलनिधेःक्षालयन्घूर्णदर्णःप्रेंखडिंडी
रखंडच्छलकुसुमकुलैर्मंडयत्यंडजेन्द्रः॥३१॥ पुनरभिध्यायन्॥ यह्रीक्षाधैर्यरक्षाकिलपुलकभृतायाचतोदैवतानांसेवासंमर्दकाले॥
गिरिशाफणिगणाद्विभ्यतामभ्यतानीत्॥ सोसंगगिरपृथ्वीधरवरशिखरच्छायदायादकायश्छिंदन्वृंदंरिपूणांकलयतुकुशलंछादसो
नःशाकुंतः॥३२॥ पुनःसविस्मयम्॥ नगरूपमुपैतियुक्तमंगीकृतशाखोपिसुपर्णउन्नतोपि॥ टि॰१ वृक्षरूपत्वं रोहद्शाखाःशिखाश्च२ दलानिपक्षाश्च॥ २५

विंनतेकविधेयएषचित्रं स्थिरमामोदमगान्मधौर्विपक्षात्॥३३॥अथसर्वतःपुरींनिरीक्ष्यसांजलिबंधम्॥श्रीवल्लभदासेभ्यःश्रीरंगक्षेत्रनिलयवा सेभ्यः॥त्रुटितभवबन्धसेभ्यःनमोऽस्तुकृत शिष्यधीविकासेभ्यः॥३४॥ कृ०॥सखेसर्वनितत्पुरवास्तव्यान्मामस्मभवान्नमस्कार्षीत्॥निखिलस गुणस्तोमैर्हरिदासैरलंकृते॥अद्दृष्टशूलाःकतिपयेपदृष्टेऽस्मिन्प्रतिष्ठिताः॥३५॥निरूप्यसविस्मयं॥शक्रांद्यर्थेद्रविरघहरंशौरिणास्वादितयत् दत्तंवित्तग्रहणचपलाःकेपिविक्रीणतेतत्॥धामश्रीमद्यदिमधुजिताधीयतेस्वीयमेतेनत्रस्यंतेधनकणतृषास्तच्चविक्रेतुमज्ञाः॥३६॥वि०॥मं दमतेमैवं॥किंकिंनजीर्यतिमुकुंदपदारविंदद्वंद्वाभिवंदनकृतामिहदेहभाजाम्॥अत्यद्भुतोषधविशेषनिषेवकाणामापादयेतकिमनर्थमप थ्यसेवाम्॥३७॥समंतात्पुरीनिरीक्ष्यसश्लाघम्॥रंगालव्यदनंगारेःकसारर्वास्थलेप्वहो॥किंदृष्टंकिमपिक्षेत्रंसप्तप्राकारवेष्टितम्॥३८॥कृ० वयस्यमेवंवोचः॥अभ्यर्णस्यपुरस्यैतद्धिसख्यात्मजातदम्॥शैवक्षेत्रमवेक्षेथाःसप्तप्राकारसंवृतम्॥३९॥विश्वा०॥विहस्यसस्मम्॥ज टाधरप्राकारसंवृतस्यास्यश्लेषैर्पुण्येनेवरंगसाधर्म्यसमर्थनीयंनिपुणंनिरूप्य॥नंदत्कंदर्पदर्पक्षपणनिपुणदृग्वन्हिसंपर्कलाभारुण्यः ᳚ फण्याग्रगण्यप्रकरमयंतयाभीर्वणेभूषणेर्यः॥कांतःसांतःपुरःसन्कवलितगरलोराजतेराजतेद्रौमत्यांसत्यात्मजाग्रेविहरतिसुचिरंशंकरः शंखरोचिः॥४०॥कृ०॥सखेनात्रस्थातव्यम्॥यदिहविश्वविलक्षणारीतिरालक्ष्यते॥पश्य॥येतोयैर्नादेयैरभिषिक्तास्तेहितापमुज्झंति॥प्रत्युतज हातितापंकावेरीशंकराभिषेकेण॥४१॥वि०॥कुतएवं॥कृ०॥शृणुतावत्॥गंगानुषंगाद्यमुनासदर्ध्येत्यसत्यताखाबतसह्यकन्या॥गंगाधरेस्वैरभिषि च्यमानेतोयैःस्वयंतापमिपंजहाति॥४२॥वि०॥ईदृशंदूषणंगुणग्राहिणामभिमतमेवेति अन्यतोविमानंप्रस्थाप्यसानंदम्॥अमीरदलु॥व्याला धिपेशयशुभस्थलभूषतेलाःस्वेलाशनापतनसांद्रतरांतरालाः॥चोलाविभांतिपवमानवि हारवेलाडोलायमानसहकारनवप्रवालाः॥४३॥ निपुणंविभाव्यसोत्कंठं॥नागवल्लीमतल्लीभिःक्रमुकीभिरिवादरात्॥ ॥टि०॥१ नम्राः २ वसंतदेव्यौ ३ पक्वान्नक्रयस्थानानि ४ अभिर्जटाभिसहितःशंकरस्त स्यप्राकारः॥

परिरब्धाः प्रमोदं ते क्रमुकाः कामुका इव ॥४४॥ इतश्च भवानवेक्ष्यताम् ॥ अभ्रंलिहानहह पश्य मरुद्धुधा यारोधोरुहः पृथुफलानि हनारिकेलान्॥
आगच्छते सवितृमंडलमाश्रिताय देवाय भक्तितदिवात्तनवोपहारान्॥४५॥ कृ॰ ममत्वेवंमतिः॥ लोलदीर्घदलावृहन्नरफलावातोल्ललन्धूलिभि
श्छन्नाः प्रांशुतमाः स्फुरंति पुरतो येनारिकेलद्रुमाः॥ धूमास्वादनपात्रधारिण इमे ह्याधिष्ठचञ्चज्जटाभस्मोद्धूलितमूर्त्तयो विवसनाः पाखंडिभेदा
इव ॥४६॥ वि॰ ॥ सहासमन्यतो निर्दिश्य॥ पद्मिन्याकर्षोचितगंधप्रसवान्प्रपश्य पुन्नागान्॥ अतनूश्चाशुगकेलनात्संप्राप्तानधिकरेणुसंपर्कम्॥
॥४७॥ पार्श्वतो वीक्ष्य॥ अहो महोज्ज्वलताजनपदानाममीषामभिजा ता॥ पश्य॥ ज्योतिष्टोमस्तोमउक्थ्यातिरात्राप्तोर्यामः षोडशी वाजपेयः॥ प्रौ
ढा यज्ञाः पौंडरीकादयोऽपि चोले भूते चित्रमोपासनंति॥४८॥ पश्य॥ गृहे गृहे पश्य कृताग्निहोत्राः शास्त्रौषधोल्लाघहृद्दोषाः॥ पुण्योत्तराः पंडित
पुंडरीकाः पुनंति वैदैकधनाजनं[illegible]ति॥४९॥ कृ॰॥ एतद्विषयविषयाश्लाघाशास्त्रानुशारैव न कर्तव्या॥ यत एतद्देशे वसतां सतामप्यनेकप्रकारा दुरा
चारा उपलभ्यंते॥ स्नातिप्रातरधिस्रवंति विधिवत्संध्यादिकर्माचरंत्यग्नीनादधते मखान्विदधते शास्त्राणि चाधीयते॥ अभ्यर्चयंति सुरान्परा
र्घ्यैः कुसुमैरर्चंति किंचातिथीनन्नैः किंतु पुरीतनेस्तनुरमी पुष्यंति दुष्यंत्यतः॥५०॥ पुनर्निरूप्य सविस्मयम्॥ कष्टमेतद्देशवासिनीनां विलासिनी
नां लज्जाव्युत्पत्तिराहित्यम्॥ तथाहि॥ अपिहितचोलस्यासेस्थैर्यवतीनां चिराय युवतीनां॥ अपकंचुलिकाबंधौ कुचकुंभाविति विरुद्धमुपलब्धम्
॥५१॥ किंच॥ अगूढमाढस्तनकुंभिकुंभमंभोजदंभोद्यजैत्रनेत्रं॥ चित्ते निधत्ते बत चोलदेशस्त्रैणं प्रवीणं रतिकांतबाणं॥५२॥ अपि च॥ नवा
र्त्तवमहोत्सवे ननु सह स्वसृश्वाः संगता गृहाद्बहिरशंकितं गदितकामगाथाशताः॥ अहार्यकठिणस्तनप्रकटनादनागस्विनो मुनेरपि घनां धृ
तिं चुलकयंति चोलांगनाः॥५३॥ वि॰॥ वयस्य मास्म निंद चोलमंडलवासिनो जनान्॥ याभिः सर्वपदार्थशुद्धिरुदिता तास्त्वपक्षे देवार्पितं निर
टी॰ १ कावेरी २ अतनोः कामस्य बाणाः पक्षे अतनुर्महान्वायुः ३ उल्लवितेसर्थः ४ नद्यां ५ वस्त्रंवसतिश्च ६ स्त्रीसमुदायः ७ अगस्त्य ८ प्रसन्ननिमितामिव स्वल्पांकुर्वंति॥

क्षिप्तं निशि रक्षितं शुचिह विर्भस्येतचेत्काक्षति ॥ त्याज्यं ... स्त्वनिषेधतस्तदितिचेत्साज्यं सतैलं चतज्ज्ञोज्यं पर्युषितं स्मरंति यद्ततो योज्यं नत्त ह्
वणे ॥ ५४ ॥ पातिव्रत्यमुपेत्य नित्यमनघाचारा वसंता ... मनां चोली नाथ दिकंचुकीन कुचयोर्मालीमसीकाततः ॥ नारीणां स्फुरतोपयोग्य वयवे
स्पष्टीकृतिर्दोषदृक्त्वं चेद्धरापिधानमपि किं नस्यात्स ... सा ॥ ५५ ॥ पार्श्वतो वलोक्य सश्लाघम् ॥ अस्य देवस्य भाग्यवत्तात्वल्वियत्ता
परित्यक्ता ॥ यतोत्र ॥ मणिमयफणितल्पे मल्लिकापुंजकल्पे शभितजगद्भद्रां संश्रयन्योगनिद्राम् ॥ देहरकुहरवर्तीदेवताचक्रवर्ती दलि
तदुरितबाणे दृश्यते कुंभकोणे ॥ ५६ ॥ अंतर्नागगिरिं किं ... मतामवेस्य सशिरः कंपम् ॥ स्नात्वा सह्यसुताजले शुचितमा भूत्वा जपादिक्रमैर्हु
त्वाग्नौ च हविः कृतैतरगिरां कृत्वा च पारायणं ॥ नत्वा शार्ङ्गधरं भवामय हरं स्तुत्वा च तं भक्तितः श्रेष्ठाः कालममी क्षिपंति बहवः श्रीकुंभकोण
द्विजाः ॥ ५७ ॥ इतश्च ॥ कुटीषु गोपीस्तु चिरास्त ... मोकभूतटीषु गोपाल इति श्रुतो चरत् ॥ अकंपकारुण्यमुपेत्यमोदतेस चंपकारण्यमगण्य
वैभवः ॥ ५८ ॥ अत्र किल राजगोपाल ... कमलमुपाश्रयतः साधुजनस्येत्थमनुसंधानम् ॥ कोपाटोपदशाविशालपरुषालापादिरूपाशुभ
व्यापारग्लपितार्थिलोकदुर्दये ... लपोशेरलम् ॥ तापाविष्टसकृत्प्रपन्नजनसुक्त्या पादनेदीक्षितपापानामपनोदनाय कुहनागोपालमे
... ॥ ५९ ॥ कृ० ॥ अत्रापि ममाविरोध एव प्रतिभाति ॥ यतः ॥ न्यस्तपादः क्रमनसां शीर्षेषु मधुहा यहो ॥ मुरारातिर्हरिः सोपि चंपकारण्यमा
... ॥ ६० ॥ वि० ॥ विरुद्धानामपि सहावस्थितिसंपादके देवे वा स्फुरद्वे का नाम विरोधकथा ॥ यस्मिन्विलोचनतया सह पुष्पवंतौ पर्यंकवाहन
तया फणिपक्षिराजौ ॥ तेजस्विनौ प्रमुदितौ स्थितिमाश्रयेते तस्मिन्नहो भगवति क्व विरोधगंधः ॥ ६१ ॥ इति परिक्रम्यावलोक्य प्रांजलिः ॥ प
रिगतसहकारैः प्रांशुभिर्नारिकेलैर्दिनकरकरधारादुष्प्रवेशांतरेभ्यः ॥ चुलकितदुरितेभ्यश्चोलदेशस्थितेभ्यो नम इदमखिलेभ्यो नाथ दिव्य
स्थलेभ्यः ॥ ६२ ॥ कृ० ॥ भवतु तवैतेषु नमस्कर्तृता ॥ ॥ टि० ॥ १ आकाश २ वेदानां ३ यमुना ४ दूराजभिः ५ दैत्यमकरंदश्च ६ चंद्रसूर्यौ ७ अन्नचौर्यपरैः ॥ ॥ ॥

ममतु देवलकादिदेवालयोपजीविदुराचारानालोकयतो न भवति नमश्चिकीर्षा॥ तथाहि॥ वार स्त्रीकुचमर्दिभिर्विचरयंस्यष्योदिदानैकरैस्त हीटीरसवासितैश्च वदनैर्जल्पंति मैत्रानमी॥ द्रव्यं देवलकाहरंत्यच कितो देवस्य तत्पूजितास्त्वेतास्तु प्रतिमास्तु हंत भविता किं देवतासन्निधिः॥ ॥६३॥ किंच॥ आघ्राता बत पुण्यधौवतकचा नो कर्मसंध्यादिकैर्येरभ्यस्तमभूदसभ्यवचनं न त्वेव वेदाक्षरम्॥ अंधश्चो येपरैर्दुरन्वयभवैः सूदैर ... तान्यन्नादीनि निवेदितानि भगवानंगीकरोत्येष किम्॥ ६४॥ विमृश्य॥ अहो कलिमाहात्म्यादखिलजनानामनिवार्यो विवेकविपर्ययः॥ स ... स्वादरतोर्पितानि हरयेसत्त्वोत्तरैर्भूसुरैरन्नान्यत्र न मानयेति विधि वित्सिद्धानि वृद्धा अपि॥ देवस्यायतनेस्वदंति विभयाश्चाद्यैः कृतानो दनान् स्पृष्टान्न्दृजनेन ... भरिधि ... दृष्टान शिष्टात्हृतान्॥६५॥ वि॰॥ मादृशोभ्यो हि दिव्यक्षेत्रमहात्म्यवेदिभ्यो भवदीयमत्र दूषणं न रोचते॥ यतः॥ उपस्येय ... चितश्च चि ... विष्णु पोविनीताः स्वेशास्त्रेविगतवर्जिनाः पूजकजनाः॥ परित्रातुं लोकान्विधिवदपतंद्रो न विदधते पवित्रैरन्नाद्यैः परमपुरुषाराधनममी॥ ६६॥ आकर्ण्यतामिदमपि यद्भ्युपगम्याप्यभिधास्यामि रहस्यम्॥ विधिवदविधिवद्वा भक्तितो भक्तितो वानन्तुश्च विरश्चचिवोनाथमर्चेत्त्विहस्थैः॥ अनुदिनमुपयातैरर्चमानास्तु दैवैरुचिरजितमूर्तिर्ब्बाप्तिकस्यास्तिकस्य॥६७॥ इदं चावधेयं॥ केचिच्चक्रधरापराधचकिताः क्ष्मापालभीताः परे श्रद्धातः कतिचित्प्रचंत्यवहिताः श्चाश्वदिव्यं हविः॥ अथैन्यस्तमिदंसुदेवभगवानालोकनैः स्वीकरोत्यर्हैः संहरणास्यया च तदिदं प्राश्नंति भाग्योत्तराः॥६८॥ पश्यतावत्स्वानुभवसिद्धोपकर्षनिकर्षौ भगवदायतनं नदितरस्थलपरिकल्पितयोरन्नयोः॥ उपस्कारैस्फारैरुपचितमसामोदभरमप्यवेस्यन्नं गेहे कृतमनतिभोग्यं बुधजनः॥ अभूयः संस्कारिण्यपि हविषि देवालयभवे त्वनल्पं भाग्यत्वं पुनरघहरत्वं ... मनुते॥६९॥ इदं च बोद्धव्यं॥ देवागारनिषेविणः किल जनाद्दुष्यंतु शुद्धा तु वा तेमीस्वामिपरिग्रहेण नियतं मान्या मनीषाजुषाम्॥ ... टी॰॥ १ पाककर्त्तारः २ सात्त्विकगुणवद्भिः ३ संस्कारहीनः ४ विष्णुः ५ भाग्यशालिनः ६ बहुभिः ७ मन्यते॥ ॥

प्रायेणाश्रयगौरवेण लभते हीनोपि मानार्हतां कुब्जा रंकुरितं मुखो जनोपि भजते पूजां हि राजाश्रयात् ॥ ७० ॥ इत्यन्यतः परिक्रामन्नग्रतो विलोक्य सहर्षं सांजलिबंधम् ॥ यां तु पातकिनो जनानशरणान् पातुं तमः सागरं यातुं यातु पुरीमरीन् रणमुखे जेतुं दशास्यादिकान् ॥ नेतुं भूतनयां मुदं विरहिणी मेतुं यशः प्राप्यतं दातुं शर्म च राघवेण रचितं सेतुं नमस्कुर्महे ॥ ७१ ॥ हं तत्कठिनानामप्यनुबंधुजने प्रीतिरतिमहती ॥ यतः ॥ लंकापुरं पंक्तिमुखेन रुद्धां भूमिसुतां भूमिभृतो नुबंधात् ॥ पतिं पुनः प्रापयितुं पयोधौ सेतुर्भवेतः स्वयमाप्लुवंति ॥ ७२ ॥ निरूप्य ॥ पयोधिमध्ये प्लवमानमूर्त्तयस्तरंगवेगार्पितफेनचिन्हिताः ॥ हसंति किं मंदरमंतरर्णवं निमग्नमेते नलसेतुभूधराः ॥ ७३ ॥ पुनर्विमृश्य ॥ लंकापुरावासिरघूद्वहारिसंपर्कपापादिव सिंधुराजः ॥ सपक्षभूभृन्निविडांतरोपि विभर्ति भूभृद्भिरलंघ्यकष्टम् ॥ ७४ ॥ शुद्धाः संश्रितधर्मसेतवइमे सोढोग्रवर्षातपाः स्थित्वा सिंधुजले सदाक्षितिभृतो घोरं तपः कुर्वते ॥ नृत्यंती रितनिर्भमेव लुलितैर्स्तीर्णैरतन्वांशुगैर्लावण्यं दधतीः कदापि न चलंत्यालोक्य वीचीरमूः ॥ ७५ ॥ क्षणमपि ध्यायन् अंजलिं बध्वा ॥ अस्तोकदृषदार्थिवारिधिरेष यस्मात्त्रस्तो बिभर्त्ति विपुलोपलसांद्रसेतुम् ॥ गोपायते दुरितवंति जगंति तस्मै कोपाच्यतेर घुपतेन्नृपधेनमोस्तु ॥ ७६ ॥ क्षणं साश्चर्यम् ॥ काकुत्स्थकोपचकितः कमितानदीनां मौसी यदा गुरुनगप्लवनार्हतोयः ॥ शक्यस्तदैषतरितुं हरिभिः पदा [illegible] वा फलं कथय सेतुकृतिश्रमस्य ॥ ७७ ॥ विमृश्य ॥ तत्कथितमेव मयाभवता तु न सम्यगवधारितम् ॥ शृणु तर्हि पुनः सावधानम् ॥ अंभोराशिं तानरा [illegible] पतिस्त्वेतच्छ्याजीकृत्य राजीवनेत्रः ॥ अंहोराशेर्लंघनार्थं नराणामंभोराशौ सेतुमुच्चैरबध्नात् ॥ ७८ ॥ पुनर्निरूप्य ॥ न सागरो सौ नभ एव फेनव्रजानचायं विपुलोडुवर्गाः ॥ न सेतुरेषोपि निशाचराणां नृपातकानामपि धूमकेतुः ॥ ७९ ॥ पश्यात्र जलचरभ्रमचमत्कारः ॥ गजेन्द्रबुध्या नलसेतुशैलान् ग्राहाग्रसंते जलधौ वसंतः ॥ तद्ग्रासजायासससमुत्थदंष्ट्राव्याधाः प्रधावंति यथागतं ते ॥ ८० ॥ पुनर्विचिंत्य ॥ डिंडीरखंडान्वयपांडुरा भंद्राघिष्ठमुच्चैः परिणाहवंतं ॥ काकुत्स्थसेतुं कलयेगुणाढ्यं धौतोत्तरीयं धृतमर्णवेन ॥ ८१ ॥ १पक्षरहिताः २गर्वश्च ३कामबाणैः ४बहुभिर्वायुभिः ५सौंदर्यसारत्वं ६विशालता ॥ ॥

दि·द यद्यूः ॥ चिराङ्कुराभूरिभरार्तमूर्तिर्हरित्करिश्चर्पितनैजकृत्यः ॥ श्रमस्ततया यार्णववारिशीते शेते स किं सेतुमिषेण शेषः ॥ ८२ ॥ विमृश्य सश्लाघम् ॥ यः पु
२८ रा पापदैत्यकच्छेदे साधनतां गतः ॥ स सेतुर्नैकथं शक्तः पापपंचकभंजने ॥ ८३ ॥ इति परावृत्यान्यतोऽवलोक्य सामोदम् ॥ तापं विलुंपति नृणामिह ता
म्रपर्णी सा रम्यावहन्नघदवानलजृंभणोत्थाम् ॥ पाथोनिधेस्त्रिजगतिप्रथितो वरोधोरोधोल्लसत्परमहर्षिमहर्षियूथः ॥ ८४ ॥ तदभ्यर्णे निर्वर्ण्य ॥ चक्रा॰
त्तिकु[illegible]पुरी शुचिनिताम्रपर्णीतटे विरक्तपरिपङ्क्तिमति युगे भक्तिभिर्वैष्णवैः ॥ दृढव्रतशठारिर्यो वकुलसंपतद्भ्रमरध्वनिहृद्गुणाज्जृंभणद्राविडवे
[illegible]ज्ज्वला ॥ ८५ ॥ अत्रत्यानां हरिभृत्यानामित्थमनुसंधानम् ॥ परिदृष्टवते सहस्रशाखापरमां द्राविडसंहितां हितां नः ॥ गुरवे करवाम नित्य
[illegible]स शठकोपाय महर्षये प्रणामम् ॥ ८६ ॥ अंचामचिंचातरुमद्भुतं तं पंचामरद्रूनवधीरयंतम् ॥ शठारिसंज्ञं किल यस्य मूले तपःफलं किंचिदुद
चिंतनः ॥ ८७ ॥ [illegible] फलं विलक्षणो भाति स तिंतिणीतरुः ॥ सहस्रशाखं द्राविडागमं सृजन् स यस्य मूलं समुपाश्रितो मुनिः
॥ ८८ ॥ हरिमिव कृतवेतरणं वकुलाभरणं वृणीमहे शरणम् ॥ ध्येयं यं विदुरार्या मुमुक्षुभिर्यत्प्रबंधमध्येयम् ॥ ८९ ॥ तस्मिन्प्रतिमैस्तत्र दृढा शठारे
गायंत उच्चैरिह यस्य गाथाः ॥ प्रह्लादपदे हृत्प्रथयंति दिव्ये पदे हेमन्लादइतिप्रगीतम् ॥ ९० ॥ कृतदुरितनिरोधानां कलितश्रुतिमौलिभाववोधानां
॥ वशितरमानाथानां नस्क्रधापि समा शठारिगाथानाम् ॥ ९१ ॥ जनाननुदिश्य ॥ कठिनशठनरेन्द्रस्तावकान्श्लोकपाशान् जठरपिठरपूर्त्यै जातु मा
स्तं गदिष्ठाः ॥ लुठितदृढतमस्कैमाम्चसंस्कारकूपे पठत शठजिदुक्तीः श्रमालीनमुक्तीः ॥ ९२ ॥ कृशानुमामंत्र्य ॥ ननु शठकोपायत्वं प्रणतिप्राप्ताप
भावुकोपायत्वम् ॥ विमलमते कुरुकायान्निरसितुमंहो विराजते कुरुकापुराम् ॥ ९३ ॥ किंच ॥ वकुलाभरणीयानां गाथानां सम्मुखेन भरणीयाना
न् ॥ हरिगृहमध्ये तारस्वरेण पुनते प्रपंचमध्येतारः ॥ ९४ ॥ सश्लाघं ॥ विरक्तेरास्थानी मधुमथनभक्तेर्नटनभूर्विमुक्तेर्निःश्रेणी सुकृतपरिपक्तेः फलमसौ ॥ २८
टी॰ १ पापे योद्धा कोदशमूर्धा रावणः पंचमहापातकानि [illegible] चरअत्वारितिर्नहरीतितद्देशप्रसिद्धिः ३ विष्णुः ४ धिकुर्वंतं ५ एतन्नामकपुर्याः ६ उच्चस्वरेण ७ राजधानी ८ रंगभूमिः ॥

प्रपत्तेरुद्यानस्थितिरकृतकोत्के:प्रियसखी चिदंकूरश्रोणीबकुलधरवाणी विजयते ।।९५।। समंतादवलोक्यसानंदम्।। कृशानुमुद्दिश्य ।।अभ्य
स्तवेदमौलिभ्यस्सद्भ्रःस्तत्त्वबुभुत्सया ।।कुरुकापुरुषासि भ्यःकुरुकामं नमस्क्रियाः ।।९६।। कृ०।। सत्यमेवं।। तथापि पुनरतिपतितश्रुतिस्मृतयो
यतयोपि कतिचिद्दत्र वर्त्तंत इतिन भाती हमाननीयता।। कथ्याहि।। नसंध्यास्नानं नाग्निसृष्टुन कमंडल्वभिधृतिर्नचातुर्मास्यादिव्रतमपिन भिक्षा
टनविधिः।। नलिंगं योगाभ्यास्या गोनपरिपठनंचोपनिषदांश्रुतिस्त्वं तन्नैषांश्रु ह्यमितमतिक्रम्यचरताम्।।९७।। नकेवलमेतावदेव शृणुतावदन्यदपि
।।संन्यासाश्रममाश्रितोपिसकलव्यापारलोपात्मकं कैकर्यचपलो हरेरपदिशन्द्रागराजधानीं विशन्।। अर्थानर्जयतिश्रितोजितमठोमृष्टा
न्नमश्नात्यसौ कोमृष्यो दिहरामरोमतदिदं कष्टं कलौश्चेष्टितम्।।९८।। किंबहुना।।अन्याय्यमस्ति किमितोपिहतेकलौपत्संन्यासिनोविद
धतेगृहिणांप्रणामान्।। एतत्तु चेतसि हहकृतेतिवैष्णवोसाविस्यत्रसूद्ममतिनेमतिहिजोपत ।।९९।। वि०।। सखेमैवंभाषिष्ठाः।। इच्छंतु हंत
यतिन:कतिचिन्मुकुंदमुद्धंतुनवरणं कलयंतुमावा।। हृद्येघ्रिपंकरुह किंकरतारताश्चेदेकप्रसक्तिरकलंक हृदां कृते षाम्।।५००।। य
त्पुनरभिहितं कतिचिन्मुकुंदं अर्थपर्यटनमपितुर्याश्रमाननुगणमितितदपि निपुणनिरूपणविरहविजृंभितम्।। केचनपंकजलोचनकैं क
र्यैकपरायणाः स्यते।। सन्यासिनइह धन्यास्तेहिस्वतनुपगतस्पृहाविरहाः।।१।। इत्थंहि हेयोपादेयविदउदाहरंति।। भोगायैवनितंबिनीपरिण
।।यमूलकृतिः रव्यातयेस्वार्थपाककृतिः कुपात्रविषयेत्यागार्थमर्थार्जनम्।। स्वाध्यायाध्ययनं प्रतिग्रहकृतेवादायशास्त्रश्रमोदुष्येत्स्वोदर
पूर्तयेपदिहहरेः कैंकर्यमाचर्यते।।२।। अन्यच्च।।भूयोदोषैरपिपरिवृतः पूरुषःसात्विकानाप्रायः पूज्योभवतिभगवद्भक्तिमासाद्यहद्याम्।।८
आक्रांतोपि प्रबलभुजगैः कंटकैरप्यनल्पैः किंनाहत्यास्करभिकुसुमाकेतकी भाग्यभाजाम्।।३।। इत्यन्यतोभिक्षामन्समंतादवलोक्यसा
नंदमिवं रम्।। क्रियासा र्थितवेदेभ्योग्राहयद्भ्रःश्रतीर्व हून्।। ।।टी०।। १अतिक्रांतश्रुतिस्मृतयः २अनिदुःखोद्गारोपं ३दोषः ४विष्णुः ५भ्रमंति ६स्वाज्यग्राह्ये ।।८

पांड्यचोलनिवासिभ्यः पंडितेभ्योनमोस्तुवः॥४॥ क्रू॰॥ सत्यंपुनर्मह्यमराणामप्येषांनरोचतेनमस्क्रियायदेषुमिथ्यावादिनएवबहुलमुपल
भ्यंतअमीखलुप्रामाणिकमप्यर्थंदूरीकृत्याप्रामाणिकमर्थमुररीकुर्वंति॥ तथाहि॥ प्रत्यक्षगोचरमशेषमपिप्रपंचंमिथ्येतिमायिनइमेप्रति
द्रूयंति॥ आद्येप्रमाणसरणीमतिवर्त्तमानंब्रह्माश्रुंतिचपरंबतनिर्विशेषं॥५॥ पुनःसरोषंहंतब्रह्मबंधवइमेब्रह्मणेपिपरस्मैद्रुह्यंति॥ यतः
स्तत्केषसर्वज्ञमपास्तदोषंभवार्त्तिहारिक्षतिमागमांते॥ अज्ञंपरंब्रह्मतदेवभुंक्तेसंसारतापानितिसंगिरंते॥६॥ नकेवलममीपरस्मैद्रुह्यंति॥
[illegible]॥ तत्प्रमाणेभ्यःश्रुतिभ्योपियतः॥ मिथ्यार्थावेदकत्वाच्छ्रुतिषुकुमतिभिःकर्मकांडेनिरस्तप्रामाण्यंब्रह्मकांडेसहगुणवचनैःशोषितोब्र
ह्मशब्दः॥ मिथ्यार्थ[illegible]भवंति[illegible]प्रकृतिरपिपरंब्रह्मनैवाभिधत्तेवाच्यत्वानाश्रयत्वात्कथमुपनिषदांमाननांजानतांते॥७॥ परमेतेश्रुतिभ्यो
[illegible]कायाभूमि[illegible]शरभुवाशास्त्रंतत्प्रज्ञानाप्यनिर्मितंअसमंजसतांनीतमहो तब्रह्मवादिभिः॥८॥ किंच॥ यादृशःस्वभा
वः सर्वभ्यरस्तद्विपरीतमेवमुशंतिविरुद्धमन्यदूरते॥ सर्वज्ञमज्ञइतिसर्वपदाभिधेयंकस्याप्यवाच्यइतिसर्वमहागुणानां॥ स्थानंचनिर्गुण
इतीहसमस्तवेदवेद्यंत्ववेद्यइतितंजगदीशमाहुः॥९॥ किंबहुना॥ विविधदुरितव्रातस्फीतस्थिरव्यसनाकुलादतिभितमतजीवादेवाभि
दांपरमेशितुः॥ अपगतपरिच्छेदामोदांबुधेरुपगुच्छतामशकशिशुकाभेदोनस्यात्कुतोमदहस्तिनः॥१०॥ अपरंच॥ दृश्यंमिथ्याद्दृष्टि
कर्तापिमिथ्यादोषोमिथ्यैत्येवपाथीरमीषां॥ साधिष्ठाज्ञोपिकिन्नेतिचिंता साधिष्ठानांपंडितानामुदेति॥११॥ वि॰॥ वयस्यमेवंमहीसुरदूषणेषु
विजृंभिष्ठाः॥ पारंपर्यत आगतोनिजकुलेपंथानह्यातव्ययइत्यहोतंपरिगृह्यदंतजगतोमिथ्यात्वमाचक्षते॥ अध्येतुंनिगमानशेषानुतइमान्कर्माणि
निर्मातुमप्यास्तिक्याच्चतुरानिकाममितरेकेतावदेतादृशाः॥१२॥ किंच॥ श्रुतीरध्येतारःकिमपिवदितारःप्रतिदिनंक्रतूनांहर्त्तारःकिमपिजपिता
रोमंत्रगणं॥ ॥टी॰॥ १गुणशून्यं २दुर्ब्राह्मणाः ३वेदांते ४अभिधेयशून्या संस्कारकार्याभावात् ५प्रामाण्यं ६तर्कयंति ७अधिष्ठानसहिते ८उत्तमानां ९त्याज्यः १०संपादयि २९
तारः ११मंत्रः।

अमीस्मार्ता ह्यन्यपरिचयितारो विधुन्वते श्रुतेः प्रामाण्यं प्रसजंदनुष्ठापकतया॥१३॥ टी०॥ समंतादवलोकय निस्तुला अमी विषयाः शैवप्रचुर
तया न श्लाघामर्हंति॥ अत्र हि तत्वहितपुरुषार्थो न यथावस्थिता नभिदधानाः शैवा विदुषोपि विमोहयंति॥ तथा हि॥ मदनजनकेवी
तातंके महागुणस्पृर्धधौ परमपुरुषे नित्यासक्तां श्रुतिं कमलामिव॥ बत पशुपतौ भूलोपेतो मनोभवदाहके निहितहृदयाः शैवा जल्पंत्यभाग्यहता
इव॥१४॥ सूरादारोग्यमिच्छेत्कमपि हुतवहात्संपदं स्वाम्यमिच्छेद्दीशात्ज्ञानमिच्छेदनवधि विभवंमोक्षमिच्छेन्मुकुंदात्॥ इत्याद्याः सत्यबा
या दिमुनिभणितीराकलय्यापि विष्णोः सेवां शैवा मुंचंते बत भवहतये भावयंते भवं ते॥१५॥ अपि च॥ तद्विष्णोः परमं पदं हि तमसः पारे सदापं
श्यता सांद्रं सूरिगण्येन निर्मलमहानंदात्मकं शाश्वतं॥ अपि प्रांतदुर्मसंमतमनिशं वेतालभूतालिभिर्लोकं भीकरमं चितुं व्यवसिता माहेश्वरं नश्वरं॥
॥१६॥ टी०॥ सरले गुणत्र्य हृ कुतूहली भूयाः॥ निर्ग्रंथमसमाचरंति निगमान् शास्त्राणि चाधीयते संतन्वंति च संप्रतं तु निचयं धिन्वंति भक्त्यातिथीन्
॥ सो वन्यं चकमि [illegible] सदैवादरादेषामीदृशधर्मणां कति प्रयेदोषा विषत्वा न किं॥१७॥ अन्यच्च श्रोतव्यं॥ स्मरहरपरिचर्या सांप्र
तं [illegible] तेया जनयति हरि नन्तिं [illegible] न्यान्तरे सा॥ शमितदुरितवर्गा सा च सूते पवर्गं कृत इव फलहानिः कुर्वतां शर्वपूजाम्॥१८॥ परंतु॥ मारुद्रभ
[illegible] नतो तिभद्रया विष्णुविहेषलवासहिष्णुः॥ तत एव धर्माय भवंति दाराः कदापि यान्नाभिमृशंति जाराः॥१९॥ शेषशुणापि द्वेष एव हि मूर्ध्नाभिषिक्तो
[illegible] णां॥ पश्य॥ नास्ति [illegible] तिनारकमातनोति प्रौढो निहंति परिलुंपति संपदं च॥ आयुः क्षिणोत्यघमपचिनोति च सर्वदोषान्द्वेषो मुकुं
दविषयो [illegible] योगतुल्यः॥२०॥ टी०॥ तथ्यमेतत्तथाप्यवैदिकव्रतेष्वेव प्रयततां शिवभक्तिमभिनयतां पाषंडविशेषाणामेषां वेश एव भीषयति
हृदयं [illegible] यथा हि। श्रिता भव्यमार्गा श्विता भस्म शुष्यन्निटाला जटाला स्फुटाला पशून्याः॥ श्मशाना निनिसंख्या दृशा निर्दहंतः पिशाचा इवामी

१ समन्तं २ अपसार निरूपे ३ अनिच्छंतः ४ युक्तं ५ कृतनिश्चया ६ तर्पयंति भोजनादिना ७ प्रसिद्धः ८ पीषपति ९ मुकुंदसंबंधी १० अमंगल ११ अत्यारक्तरूपे त्यर्थः॥ ॥

वि॰ट॰ दिशासुखंमंति॥ किंचैषामतिजुगुप्सिता रीतिः॥ पक्षीकृत्यगिरीशंसिध्यारहिताश्चमानहीनाश्च॥ इच्छंत्यधिगंतुमिमेधनंजयंलिंगदर्शनेनैव॥ २१॥
३० अन्येचात्र॥ दीर्घवक्रनखरखरकल्पाउद्धूरंतइवबाहुयुगंते॥ शौचमाचरितुमप्यसमर्थानीचबुद्धिहृदयाविहरंति॥ २२॥ वि०॥ विमृश्यसखेगु
णग्राहिणोनैतेपिदूषणीयाः॥ शीतोष्णजृंभणसहेषु जितेंद्रियेषुकष्टोपवासपरिशुष्ककलेवरेषु॥ पुण्यस्थलाटनपराकृतकिल्बिषेषुजानीहिका
[illegible] जटिलेष्वमीषु॥ इत्यन्यतोवीक्ष्यसाशंकं॥ कइमेपुस्तकहस्ताः कल्पएवोत्थायततइतःपर्यटंति॥ २३॥ कु०॥ निपुणमवलोक्यसप
[illegible]सं॥ ज्योतिःशास्त्रमहोदधौबहुतरोत्सर्गापवादात्मभिःकल्लोलैर्निबिडेकणान्कतिपयान्लब्ध्वाकृतार्थाइव॥ दीर्घायुःकृतसंपदादिक
[illegible]नदैवज्ञपाशाइमेगेहंगेहमनुप्रविश्यधनिनांमोहंमुहुःकुर्वते॥ २४॥ किंच॥ विलिखतिसदसद्वाजन्मपत्रंजनानांफलतियदितदानींदर्शय
[illegible]फलतिपदि[illegible]रेवाहमोहंहरंतिधनमिहैवंहंतदैवज्ञपाशाः॥ २५॥ अपिच॥ प्रमोदेखेदेवाप्युपनमतिपुंसोविधिवशान्म
[illegible]वंप्रागेवाभिहितमितिमिथ्याकथयति॥ जन्मनिष्टानिष्टाकलनपरिहारैकनिरतान्सौमेषालीनांपरिगणनयैवभ्रमयति॥ २६॥ अस्तुवात
थ्यवादीदैवज्ञस्तथापिरथातहूचःश्रवणं॥ तथाहि॥ असकृत्खमथसुखंवाकर्मणांपंक्तिवेलास्वहहनियतमेतेभुंजतेदेहभाजः॥ तदिहपुरत
एवप्रादैमौहूर्त्तिकश्चेत्कथयफलममीषांमंततःकिंतदुःस्यात्॥ २७॥ वि०॥ ऐहिकमुष्मिककर्मारंभोपयोगिनोनोपालंभमर्हतिज्योतिर्विदः॥ शृणुत
वत्॥ नदैवंनैपित्र्यंचकर्मावसिध्येन्नयत्रास्तिदेशेवमुज्योतिषज्ञः॥ सतारानचारानवानांगृहाणांनतिथ्यादयोवायतस्तत्रबुद्धाः॥ २८॥
यच्चसमर्थितंमौहूर्तिकवचननिशमनंमुधेतितन्निपुणानभणोति॥ भानोःशीतकरस्यवापिभुजगग्रासेपुरोनिश्चितेतीर्थानामटनेजनस्याघ
हतेतापत्रयोच्चाटनं॥ इष्टेप्रागवधारितेसतिधृतेस्पृष्टेश्चलाभोभवेत्दृष्टेतुव्यसनेत्रतत्परिहृतिःकृतुजपाद्यैःक्षमा॥ २९॥ अविश्रंभश्चदै
टी०॥ १अभिध्यायपक्षीकृत्वा २ अनुमानसिद्धिअष्टसिद्धअन्यतमी३ सत्कारःअनुमानंच ४अग्निधनंजयंचेतिपृथगपि ५ परिपाकः ६ राहुकेतुभ्यां ॥ ॥ ॥ ३०

वज्रूवचनेषु अनुपपन्नः। वृद्धिह्रासौ कुमुदस्य हृदः पुष्पवंतो परागः शुक्रादीनामुदयविलयाविस्यमी सर्वदृष्टाः॥ आविष्कुर्वंत्यखिलवचनेष्व
त्रकुंभीपुलाकन्यायान्ज्योतिर्नयुगतिविदांनिश्चलमानभावं॥३०॥ इत्थंकिलनीतिविदोविदुः॥ विदेवज्ञथाममिविबुधविधुरांभूपतिसभां मुखं
शुसाहीनमनुजंगतिशून्यंचविषेयम्॥ अनाचारान्स्नानपहरिकथंकाव्यमपिचप्रवक्तृत्वौ पेतंगुरुमपिस्फुबुद्धिः परिहरेत्॥३१॥ कु०॥ अ
स्त्वेवमिस्यन्यतोवीस्यसोपहासं॥ मिथ्यौषधैर्हतमृषाकषायैरसत्यलेहैरयथार्थतैलैः॥ वैद्याद्दुमैवंचितरुग्णवर्गाः पिचंडभांडंपरिपूरयं
ति॥३२॥ किंच॥ नधातोर्विज्ञानंनचपरिचयोवैद्यकनयेपनरोगाणांतत्त्वावगतिरपिनोवस्तुगुणधीः॥ तथाप्येतेवैद्याद्तितरलयंतोजडज
नानसून्मृत्योर्भृत्याइववसुहरंतेगदजुषाम्॥३३॥ अपिच॥ कषायैरुग्रवासैश्चकृतामुज्झाघतोनृणाम्॥ निजौषधकृतांवैद्यानिवेद्यहरतेध
नम्॥३४॥ वि०॥ वयस्यविश्वोपकारिषुवैद्येष्वेवंनकलयेथाः॥ पश्य॥ मस्तेदुःसहवेदनाकवलितेमग्नेस्वरेतगलितप्राणांज्वरपावकेनचत
त्यौतेतेहृषीकव्रजे॥ दूनेबंधुजनेकृप्रलपनेधैर्यंविधातुपुनः कःशक्तःकलितामयप्रशमनोवैद्यात्परोविद्यते॥३५॥ किंच॥ माबोधिवैद्यकुम
नपिमहामयेषुप्रासेषुपेभिषगितिप्रथितस्तमेव॥ आकारएषखलुएवविशेषदर्शीलोकोपितेनभिषगेषुनदूषणीयः॥३६॥ कष्टमहोक
ोपकारेप्यगदंकारेकृतघ्नएवनिर्विवेकोलोकः इत्थंहिकवयःकथयंति॥ निर्वृत्ताध्वरकृत्यऋत्विजमहोत्तीर्णापगोनाविकंयुद्धांतेसुभटंच
सिद्धिभिजेयोषोढारमाप्तस्थलः॥ वृद्धांवारवधूजनंचकितवोनिर्घृष्टतद्यौवनोध्वस्तातंकचयश्चिकित्सकमपिदृष्टिप्रदेयार्थिनम्॥३७॥ कु०॥
विमानमप्यतश्चालयन्॥ अग्रतोवलोक्यसोपालंभंसखेपश्यात्रकवीनामेषांशास्त्रैर्विप्रतिषिद्धांचर्यां॥ श्रीनाथस्तवनानुरूपकवनांवाणीम
नोहारिणींकष्टंहाकवयः कंदर्पकुटिलस्मापालसात्कुर्वते॥ दूरापाहृतसारसैंधवपयोदेवाभिषेकोचितंससेकेविनियुंजतेस्म तयःशाखा
१स्थालीपुलाकन्यायेन २देशाः ३रोगिवर्गः ४उदरभांडं ५भ्रामयंतः ६नीरोगतां ७मस्तके ८म्लाने ९दुःखिते १० शकटाश्वादिपालकं ११ रूपणाः १२ नृपवर्णनपरां ॥ ॥॥

सतिहृद्यैकविःसूक्तिभिःकरोतिवरवर्णिनीचरितवर्णनंगर्हितं॥ अनीतिरवनीपतिर्वतशुनी

वि॰द लवालस्यकिम्॥३८॥ किंच॥ रत्नवद्भवनिवर्तकेसतिहृद्यैकविःसूक्तिभिःकरोतिवरवर्णिनीचरितवर्णनंगर्हितं॥ अनीतिरवनीपतिर्वतशुनी

३१ ततनुंमौक्तिकैर्विभूषयतिदेवतामुकुटभागयोग्यैर्यथा॥३९॥ वि॰॥ आंतरध्वांतरवयःकवयस्त्वयानाधिक्षेप्याःकामंवाचःकतिचिदफलाःसंतु

लौकिककवीनांसंत्येवान्यामधुरिपुकथासंस्तवात्कामदोग्ध्र्यः॥ वित्तंकामंभवतुविफलंदत्तमश्रोत्रियेभ्यःपात्रेदत्तेभवतिहिधनेधन्यताभूरिदा

तु॥४०॥ कल्याणंभगवत्कथाकथनतःकाव्यंविधातुःकवेस्तस्यैवांगतयाक्वचिद्रचयतःशृंगारवीरादिकम्॥ कोदोषोभविता यदत्रकवि

तोशीलैःसमाश्रीयतेपंथाव्यासवसुंधरासुतिभवग्रंथादिषुप्रेक्षितः॥४१॥ कृशा॰नरस्तेविधातारोनवस्तुतइमेबुधैः॥ श्लाघनीयाइति

कवीनूशास्त्राध्वन्योविनिंदति॥४२॥ वि॰॥ धनचपलसकलपुरुषसाधारणमिदंदूषणमविवेकिभिःकविष्ववकेवलमाधीयते॥ यतः॥

पद्यैर्हृद्यतमैरलंकृतिकवयःप्रायेणपृथ्वीपतीनन्येतानुक्तवतेवचोभिरचमत्कारैरसारैरपि॥ पद्यारंभणशक्त्यशक्तिविहितोभेदःकवीनांभव

त्यन्येषांचपरंनरस्तुतिकृतोदोषश्चसार्वत्रिकः॥४३॥ क्षणमालोक्यसादरम्॥ प्राचेतसव्यासपराशराद्याःप्राचःकवींद्राजगदर्चितास्ते॥ गोष्ठीन

वीनापिमहाकवीनांपूज्यागुणैर्भुवनोपकर्त्री॥४४॥ तथाहि॥ माघश्चोरोमयूरोमुररिपुरपरोभारविःसारविद्यःश्रीहर्षःकालिदासःकविरथभवभू

त्याख्योभोजराजः॥ श्रीदंडीडिंडिमाख्यःश्रुतिमुकुटगुरुर्भल्लटोभट्टबाणःख्याताश्चान्येसुबंध्वादयइहकृतिभिर्विश्वमाल्हादयंति॥४५॥

परंतु॥ संपन्निर्मदभावयोरनघयोःसाहित्यपांडित्ययोःसामर्थ्यान्यजनोपकारकतयोःसाम्राज्यदाक्षिण्ययोः॥ औदार्यप्रियवादयोश्चकथयं

त्याचारविज्ञानयोःसामानाधिकरण्यमेवविबुधोत्तंसप्रशंसास्पदम्॥४६॥ इदंचावधेयम्॥ प्रणतचरणरेणुर्विष्णुचित्तोमुठमथनःसरसीमु

निःसम्भूतःमधुरःसविरितोपरेचधन्याःकतिनपुनंतिजगंतिसूक्तिपूरैः॥४७॥ कु॰॥ परतोविमानंप्रस्थाप्यपार्श्वेनोहस्थापश्येतानाग्रहिणःपुरु ३१

षान्यदेतेनग्रंथमेवन्यायग्रंथसंततचिंतनेनविश्राम्यंति॥ टी॰ १ वसुंधराश्रुतिर्लक्षणयावल्मीकंतत्रभवोवाल्मीकिः २ शास्त्रमार्गसंचारी ३ मदराहित्यं ४ दानशौंडत्वं॥

तथाहि॥ कर्मब्रह्मविचारणां विजहतो भोगापवर्गप्रदां घोषं कंचन कंठशोषफलकं कुर्वंत्यमी तार्किकाः॥ प्रत्यक्षं न पुनाति नापहरते पापानि पीलु
च्छटाव्याप्तिर्नावति नैव पात्यनुमितिर्नो पक्षतारक्षति॥४८॥ किंच॥ हेतुःकोपविशिष्टधीरनुमितो नज्ञोनयुग्मं मरुत्वांचोनेतिच मोहवादमुखरा
नैयायिकाश्चेद्बुधाः॥ मेषस्याण्डमियत्प्रलंबलिभुजो दंताः कियंतस्त्विथं त्यवं संततचिंतनैः श्रमजुषो नस्युः कथंपंडिताः॥४९॥ विशिष्यचनस्यशु
ष्कतार्किकस्य रीतिर्विवेकिनामुपहासास्पदं॥ शृणु तावत्॥ नजिघ्रत्याम्नायं स्पृशति न तदंगान्यपि सकृत्पुराणं नादत्ते न गणयति किंच स्मृति
गणम्॥ पठन्शुष्कं तर्कं परपरिभवार्थोक्तिभिरसौ नयत्यायुः सर्वं निहितपरलोकार्थयतनः॥५०॥ अपिच॥ प्रयतते रस्तोकैः परिचितकुतर्कप्रक
रणाः परं वाचो वश्यान्कतिपयपदौघान्विदधतः॥ सभायां वाचाटाः श्रुतिकटुरटंतो घटपटाल्लजंते मंदाः स्वयमपि तु जिह्रेति विबुधः॥५१
30 विं०॥ वयस्यविविधोपकारविधायकान्नैयायिकान्मावमंस्थाः॥ शृणु॥ मोहं रुणद्धि विमलीकुरुते च बुद्धिं सूते च संस्कृतपदव्यवहारशक्तिं॥
शास्त्रांतराभ्यसनयोग्यतया युनक्ति तर्कश्रमो न तनुते किमिहोपकारम्॥५२॥ तथाहि॥ प्रायः काव्ये गमितवयसः पाणिनीयांबुराशेः सारज्ञस्या
प्यपरिकलितन्यायशास्त्रस्य पुंसः॥ वारंवारं भवदितुमनसो वाक्यमेकं सभायां प्रव्हा जिह्वा भवति कियतीं पश्यकष्टामवस्थां॥५३॥ किंबहुना॥ अ
परीक्षितलक्षणप्रमाणैरपरामृष्टपदार्थसार्थतत्त्वैः॥ अवशीकृतजैत्रयुक्तिजालैरलमेतैरनधीततर्कविद्यैः॥५४॥ निरूप्य॥ अद्भुतस्तर्कपाथो
धिरगाधो यस्य वर्धकः॥ अक्षपादोतमस्पृष्टस्त्वकलंकः कलानिधिः॥५५॥ पुनरालोच्य सश्लाघम्॥ ज्ञानाब्धिरक्षिचरणः कणभक्षकश्च श्रीप
क्षिलोप्युदयनः सच वर्द्धमानः॥ गंगेश्वरः शशधरो बहवश्च नव्याग्रंथैर्व्यरुंध्यत इमे हृदयांधकारं॥५६॥ रू०॥ अपरत्र व्योमयानेप्रस्थापयन् अथ
तोनिरीक्ष्य सोपालंभं॥ मीमांसकाः कतिचिदत्र मिलंतिवेदप्रामाण्यसाधनकृतोपि न ते भिवंद्याः॥ ॥टी०॥ १ परमाणुसमुदायः २ व्याप्तिर्विशिष्टप
क्षधर्मताज्ञानविशिष्टः ३ पूर्वोक्तगतांशद्वयं ४ त्वगिन्द्रियप्रत्यक्षः ५ काकः ६ लज्जते ७ अज्ञातपदार्थसमूहानां ८ जयमुक्ति ९ राहुः अज्ञानंच॥ ॥ ॥

वि०द उद्घोषितोप्युपनिषद्भिरशेषशेषी ब्रह्मैवनाभ्युपगतः पुरुषोत्तमो यैः ॥५७॥ विशिष्यचमीमांसकानांगोष्ठ्यां विश्रुताः शाबरादयः शाबरादयइवभग
३२ वद्भक्तानां विनिंदनीयाः ॥ तेमीमांसाशास्त्रलोकप्रसिद्धाः सर्वेषींणांसेहिरेनैवसत्ताम् ॥ चैतन्यस्यापन्हवं देवतानांचक्रुर्विश्वंनश्वरंमन्यमानाः ॥ ५८
॥ वि० ॥ सखेनिखिलनिगमार्थनिर्धारणबद्धादरेषुमीमांसकेषुमास्मसन्नह्येथाः ॥ शृणु ॥ आदौधर्मप्रमाणंविविधविधिभिदाशेषतांचप्रयुक्तिंपौ
वांपर्याधिकारौतदनुबहुविधंचातिदेशंतथोहं ॥ बाधंतंत्रंप्रसंगंनयननयघनैः सम्यगालोचयद्भ्योभिन्नामीमांसकेभ्योविदधतिभुविकेसादरं
वेदरक्षां ॥ ५९ ॥ पशुपतावङ्गगवतइवक्ष्वैमिनिशासनवैदिकैः सर्वैरनतिक्रमणीयं ॥ नैयायिकावानतुशाब्दिकावात्रयीशिरःसुश्रमशालिनोवा ॥
धार्ष्टाहवैविभ्रतिजैमिनीयन्यायोपरोधेसतिमौनमुद्रां ॥ ६० ॥ पञ्चमीमांसकेषुदोषोद्घाटनंतदज्ञानतः । भगवदनभ्युपगमनेद्वैतचैतन्यनिन्हव
श्लेषाम् ॥ कर्मश्रद्धावर्धकतत्प्राधान्यप्रदर्शनार्थेव ॥ ६१ ॥ पुनरालोच्यसबहुमानंआगमरूपविचारिण्यधिकरणसहस्त्रशिक्षितविपक्षे ॥ सामिनि
जैमिनियोगिन्यपरज्जतिहृदयमस्मदीयमिदम् ॥ ६२ ॥ शाबरकुमारिलगुरवोमंडनभवदेवपार्थसारथयः ॥ अन्येचविश्वमान्याजयंतिसंत्राप
मापतंत्रास्ते ॥ ६३ ॥ कृ० ॥ अस्त्वितिविमानमन्यतोगमयन्पार्श्वतोदृष्ट्वासोपहासं ॥ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः सोस्तिपतसझिसिपथस
थमिप्वसमसहसिचष्टनाष्टुरतङ्ञ्ञ्चछोत्स्यचोत्यादिटि ॥ लोपाव्योर्वलिवृद्धिरेचियचिभंदांधाघ्वदाप्छेचटेरित्सब्दान्खिलान्नयंतिकतिवि
च्छब्दान्पठंतःकटून् ॥ ६४ ॥ किंचासूत्रैःपाणिनिकीर्तितैर्बहुतरैर्निष्पाद्यशब्दावलिंवैकुंठस्तवमस्मारचयितुंमिथ्याश्रमाःशाब्दिकाः ॥ पक्वान्नंविवि
धंश्रमेणविविधापूपाग्र्यसूपान्वितंमंदाग्नीननुरुंधतेमिर्यबलानाघ्रातुमप्यक्षमान् ॥ ६५ ॥ वि० ॥ त्र्यप्याभरणेषुवैयाकरणेषुभावान्मास्मकलयतुदोष
शकैलंयतः । कृतहुरितनिराकरणंव्याकरणंचतुरधीरधीयानः ॥ बुधगणगणनावसरेकनिष्ठिकायांपरंजयति ॥ ६६ ॥ पातंजलेविष्णुपदापगायाःपातं
जलेचापिनेवगाह्नं ॥ टी० १ मनीतपदार्थैःसहाविचार्य २ सएवब्रह्मइति ३ लोपं ४ वादयुद्धे ५ न्यायरूपेप्रतिबंधके ६ लोपं ७ लेशं ८ पातंजलेइतिविपदद्वयं । ॥ ॥ ३२

आचे[1]स्तेश्रुतिरिद्मागम[2]स्तूतेराच[3]क्षतेरागमधोक्ष्यजेच॥६७॥ अपिच॥ नृणामनभ्यस्तफणाभृदीशगिरांदुरापाबुधराजगोष्ठी॥अबुद्धचाप
श्रुतिपद्धतीनां युद्धास्समेवोद्धततयोधृसार्था॥६८॥ तथाहि॥ नांगीकृतव्याकरणोषधानामपाटवंवाचिस्कगाढमास्ते॥कस्मिंश्चिदुक्ते
तुपदेकथंचित्स्वरंवपुःस्विद्यतिवेपतेच॥६९॥सासाक्षेपं॥कथंसखेशतकोटिपाणिनिनिगदितमेवव्याकरणमाद्रियंतेसंतः॥ वि०॥पाणि
नीयमेवहिव्याकरणंप्रयोगोपयिकंप्रविशदप्रनीतिकारणमितितत्रैवादरःपंडितानां॥ तथाहि॥सूत्रेपाणिनिबद्धंकलयन्पुरुषःसमुद्धह
तिस्फदृशं॥ वर्णादीनांधर्मान्बुध्वाविधिवत्प्रयुक्तेसौ॥७०॥इतिविमानंअन्यतश्चालयन्पुरोवलोक्यसखेपश्यछांदसानर्थचापलेनविक्री
यमाणाम्नायान्॥ आःकष्टमप्रहृष्टाःशिष्टाअपिवित्तचापलाविष्टाः॥अध्यापयंतिवेदानादायचिरायमासिमासिभृतिं॥७१॥वि०॥वयस्य
मैवंवादीः॥नाध्यापयिष्यन्निगमान्श्रमेणोपाध्यायलोकायदिशिष्यवर्गान्॥निर्वेदवादंकिलनिर्वितानुमुर्वीतलेहंततदाभविष्यत्॥कृ०॥
विरुद्धमिदंभाषितंयद्वेसपायेसतिनयज्ञाभ्युदयःस्यादिति॥वि०॥अवगच्छतावदेतदविरुद्धमेव॥नाम्नायज्ञोमखेयस्मिन्यजमानतया
स्थितः॥तत्समागमतःसोपिनाम्नायज्ञोभवेन्नकिम्॥७२॥कृ०॥पुनरन्यतोदृष्ट्वासोपहासं॥पश्यैतान्राजसेविनःपरित्यक्तलोकद्वयसौ
ख्यान्स्पष्टमौरख्यान्पुरुषान्॥नैषांसंध्याविधिरविकलोनाच्युतार्चापिसांगानस्वकालेहवननियमोनापिवेदार्थचिंता॥नस्फहेला
नियतमशनंनापिनिद्रावकाशोनह्योलोकावपितनुभृतांराजसेवापराणां॥७३॥वि०॥दुःसहैषाबहुजनपोषकाणामेषांनिंदा॥अशक्य
भपुषिकलावप्यप्रमत्ताःस्वधर्मादनुदिनमुपकारानाचरंतेबुधानां॥बहुजनपरिपुष्टोबद्धदीक्षास्तएतेतनुस्फरखमपिहित्वातन्वतेराज
सेवां॥७४॥सर्वाणिदिव्यक्षेत्राण्यवलोक्यसांजलिबंधं॥कृशानुमुद्दिश्य॥गंगाझरीपरिचितांघ्रिजगन्निदानंरंगादिधामस्फचिरात्कृ
टी०॥१वदंति २जननादारभ्य ३मरणांतर ४यजुर्वेदः ५इंद्रः ६उपयोगी ७वेतन ८नआम्नायज्ञइतिच्छेदः ९नाममात्रेणसयज्ञः १०अम्बुभबद्धले ॥ ॥ ॥

म०द तसन्निधानं॥ विश्वंस्वतोविशदमेवविलोकमानं वंदस्वबस्तनमदार्त्तिहराभिधानं॥७५॥ कृ०॥ नन्वत्रतृतीयचरणार्थो न मह्यं रोचते॥ वि
३३ लोचनेविभोर्यस्य विख्याते पुष्पवत्तया॥ साक्षात्कर्त्तुं स्फुटं संवैशक्नोति स कथं हरिः॥७६॥ वि०॥ सूर्यचंद्रलोचनतया सचमत्कारं चक्रध
रस्तवानाय तुभ्यं नकुप्यामि॥ शृणु तावदिदं॥ श्रेयस्तोयदसंप्रदायरसिकच्छायः सहायः श्रियश्श्रितारत्नसपत्नश्रीक्षितलवश्चक्रीप
तामायतं॥ यो विश्वं नहिंसात्रवान्हिमरुचाप्युष्णांशुना नेत्रवान्सुग्रीवेण च मित्रवान्कुशलवब्रह्मादिभिः पुत्रवान्॥७७॥ सत्वेसंक्षिप्यव
स्यमाणं सारभूतमिममर्थं गृहाण॥ नराः स्फुरा वा पशवः परे वा न निंदनीयाः पुरुषेण भुष्णुना॥ यतोपि दोषप्रचुरे जगत्त्रये न संति ते ये विगु
णाः कलावपि॥७८॥ अभ्युपगम्य॥ शाठ्यापगुणसमृद्धे दूषणभणितिः समस्तवस्तूनां॥ अस्माभिरुपनिषिद्धा सिद्धांतस्यैव पूर्वपक्षोक्तिः
॥७९॥ इति सकलजनानामीरयंतौ शुभं तौ मधुमथनपवित्रक्षेत्रसेवाकृतार्थौ॥ अनुपथि दृढसख्यौ हृष्टगंधर्वमुख्यौ निजसदनमगातां
निर्भरानंदसांद्रौ॥८०॥ सकलकुशलसिद्ध्यै सर्वदेवस्थलेषु प्रजतु भुवि विवृद्धिं वत्सरायुत्सवश्रीः॥ अपगतभवरोगैरध्वराणां प्रयोगैरखि
लशुभकराणामस्तु भद्रं द्विजानाम्॥८१॥ जयतु जगति लक्ष्मणार्यपक्षो जयतु वचः श्रुतिमौलिदेशिकानां॥ जयतु निगमवर्त्मनिः सपत्नं जय
तु चिराय मुरारिरंजनाद्रौ॥८२॥ प्रकाशदोषप्रचुरेप्यमुष्मिन्ग्रंथे मदीये करुणानुबंधात्॥ क्षमादवंतो न हसंतु संतु परंतु विश्वावसवंतु संतः
॥८३॥ ॥इतिश्रीमंचमतभंजननिबंधनव्याख्यातृतातयज्वभागिनेयवाजपेयसार्वपृष्ठाप्तोर्यामादियज्वात्रेयवंशमौक्तिकीभवदप्पय्याचार्य
तनूभवश्लेषयमकचक्रवर्तिरघुनाथाचार्यदीक्षिततनयस्य श्रीमहूकलाध्वरिणः कृतौ विश्वगुणादर्शः समाप्तः॥ ॥शुभंभवतु॥ ॥
टी० १ सूर्यचन्द्ररूपतया पक्षेक्षिरोगविशेषवत्तया २ पृथक्पदं कर्म ३ अभ्युदयेच्छुना ४ आपयंतौ ५ पुरोभागिनः न भवंतु ६ किंतु विश्वावसुसदृशाः सद्गुणग्राहिण इति ३३

वाराणसीप्रसादस्यनियोगेनप्रयत्नतः॥काशीसंस्कृतमुद्रायामङ्कितोयंशिलाक्षरैः॥१॥श्रीकाशीजीमेज्ञानवापीकेपूर्वफाटकपरश्रीवि
श्वनाथजीकेपासश्री३युतमहाराजशिवलालदुबेजीकेमकानमेकाशीसंस्कृतमुद्रायन्त्रमेछपीजिनकोलेनाहोयउन्होंनेइसकार्यकेसं
पादकबाबूवाराणसीप्रसाद याकचौरीगलीमेभाईप्रतापसिंहजीकेदुकानपरमिलेगी॥मितीचैत्रशुक्ल५रविवासरेसंवत्१९३१ ॥ ॥ ॥

॥इतिविश्वगुणादर्शःसमाप्तः॥

१

किंच भगवतीसेतुतया भगवतीर्णादिदेवतावितुतान् ॥ भगवती यदुरिताद्भगवतीकलशजलधिकन्यायाम् ॥ ७९ ॥ कृशानुः ॥ अहो कथमा
श्रु कविः स्वप्रभिभवानमुदेवमभिनंदति ॥ तथा हि ॥ अधः करोत्यादिमशाब्दिकोरगकलानिधिं धिक्कृतसौमुखेनयः ॥ कृतांतरायस्यसरस्वतीज
वेस्तवेरुचिस्तस्यकथंभवेत्कवेः ॥ ८० ॥ वि० ॥ किमेभिः श्लेषैकावलंबनैर्दोषैरमुं देवमाश्रितेषु खल्वप्रस्पृहः सरस्वतीप्रवाहो विजयते ॥ पश्य
कल्पते कामरामास्फुरदधरसुधागर्वसर्वस्वमोषोद्यक्तान्युक्तान्यमी धीरसिकजनमुदे धातृयोषाहिएषाम् ॥ श्लाघावेलासुदोलायिततनिज
सुकुटाकल्पकल्पद्रुसूनोड्डीनालिध्वानतानाकलनपरिमलच्चारुवीणाभिगाना ॥ ८१ ॥ किंचिदुत्तरतो दृष्टिमाधायसांजलिबंधम् ॥ क्षेमारंभ
निदानमापुरुकनुषांहेमाभिरांभोजस्तोमायातमरंदलंभितपयोभूमास्वभूमानिता ॥ सह्याद्रिप्रभवा समानविभवामत्यामसह्यार्तिहृत्पुण्यायोगिव
८३ रेण्यपुण्यसरसिंदुह्यादसह्याहसे ॥ ८२ ॥ इति दक्षिणतः सादरमस्मिन्निक्षिप्यसांजलिर्भूत्वा ॥ विश्वाल्हादकरीं करींद्रसरसीकल्हारपारंपरीभव्यामोदधु
रंधरानिलजडेदिव्यालयेजाग्रतीम् ॥ कष्टापहित्रिवर्त्तिनीघनतपःक्लिष्टात्मनां योगिनामिष्टामिष्टभुजां भजामि विबुधैराराधितां देवताम् ॥
॥ ८३ ॥ अथ प्रतीच्यां दिशि किंचिदंतरंगत्वा विमानमागमय्यसहर्षम् ॥ त्रिदशाकलितस्नेहस्फूर्तिर्मान्धमपंस्तमः ॥ भाति दीपप्रकाशो
यत्स्फुरणां न बोधकृत् ॥ ८४ ॥ कृ० ॥ दीपप्रकाशसंज्ञादेवेस्मिन्नुत्तमस्फुरणे ॥ रात्रिचरप्रतिकूलेनदीपजातोल्लसद्भुचौनाहो ॥ ८५ ॥ वि०
॥ मदमत्तमेवभाणीः ॥ प्रकटितदशावतारे प्रचुरांज्याकलनभावितस्फुरणे ॥ दीपप्रकाशनामस्मिन् विभावसुर्दितिभीतिहरे ॥ ८६ ॥ निरू
प्यसानंदम् ॥ श्रीरंगेश्वरशासनादधिगतं श्रेयश्चलाचार्यकं दांतं योक्कविवादिदंतिहरिरित्यार्यावदंतिस्थितौ ॥ सर्वस्यापि हंततं त्रसर
१ कृ० दुग्धम् २ देवाः वर्त्तयश्च ३ तैलं प्रीतिश्च ४ तिमिरं अज्ञानं च ५ देवतादीपप्रकाशश्च ६ गृहं रक्षणं च ७ उत्कृष्टतमं स्फुरणं यस्मिन्पक्षे उद्गतं तमः स्फुरणं यस्मि
न् ८ नदीपः समुद्रः तस्माज्जाता लक्ष्मीकौस्तुभो वा ९ दशावतारा: प्रसिद्धाः पक्षे दशा नाम वर्त्तिकानामवतारः १० प्रचुरं यदाज्यं पक्षे प्रचुराः आजयः संग्रामाः ११ दांता
चार्ये

वि॰ द॰ गौरवातंत्र्यमासेदुषांसत्रामासहिवेंकटेशकविराडत्राविरासीत्प्रभुः॥८७॥ जनान्निदिश्य॥ भेदाभिदाविषयवादापनद्धरूपपादार्थसाधकमदो
१७ त्सादावहाद्भुतमरवादागापगास्यद्विनोदापहाररभणितिः॥ पादारविंदनतखेदापहारचतुरो ह्यमारमाधवगुणास्वादाभितुष्टहृदहमोलापवोभ
वतुवेदांतदेशिकमणिः॥८८॥ अपिच॥ नानाम्नायपरिश्रमंकलयतांनास्त्येवशास्त्रेषुधीः सतोरप्युभयोस्तयोर्नसकलभासाहिक्षितौसाहिती॰
॥अप्येतास्वसतीषुनास्तिविनयोनाचारभक्तिस्समाचातुर्यःसचसाचसाचसचताभ्यांलब्ध्यरवेलंस्यमुम्॥८९॥ किंबहुना॥ अवर्तमास्येतसुधा
...वेवं...तु मौजंकुर्वंतिप्रशांतम्॥ कुर्वेतमेतंगुरुमंतरेणगुर्वंतरंकोनुगुणीवृणीते॥९०॥ कृ॰॥ वयस्यमास्मैवमवोचः यदेतत्सत्यंवलंबनं
तःपक्षांतरस्वीकारएववरमितिमेप्रतिभाति॥ नच्यादि॥ यस्मिन्पक्षेस्तिभोक्तागुरूणिलघुनिवासायनेप्यप्रयुक्तेश्लाघाहेतुश्चमाधव्ययकर
यजनाद्यव्यकर्मप्रहाणम्॥ तंहंतोपेक्ष्यपक्षंश्रयतिजगतिकःकाम्यवेदोक्तकर्मानुष्ठानावश्यकत्वप्रकटनकठिनंवेदचूडार्यमार्गम्॥९१॥
वि॰॥ निरूपणनिपुणोपिभवान्नूकथमेवंकथयति॥ वेदांतार्थविशोधितंहितपथ्यंव्याधूयसाधून्वितंचापल्यादनुरुंधतेतत् दितंयंथानमंधान
राः॥ इष्टंभस्ययकांतयाचविहरेत्स्वंप्रियालापिनंरोगार्ताश्चपलास्तकंवतिनतुतयः पथ्यवादीभिषक्॥९२॥ किंच॥ आम्नायमौलिगुरुणाक॰
रुणाकरेणनावातरिष्यतयदीहभवाब्धिनावा॥ अज्ञातभक्तिजगदभ्रकृतस्सच्चरित्रमत्तातशास्त्रमभविष्यदवेदिकंच॥९३॥ पुनरालोच्य॥
अथास्यखलुनिगममौलिगुरोरशेषविद्यासमुद्रतलस्पर्शित्वादधुनातनविबुधव्यूहसमभिव्याहारोनोचितः॥ किंतु॥ निशमयतियःकिल
हँशानिश्वासमप्यं...चयोविश्वम्॥ ॥गजतुरंगौवदनेयौतैःसहवेदांतदेशिकोगण्यः॥९४॥ विचिंत्य॥ गंभीरशब्देनविशालमोहद्दशापि
शांतगृहे...॥ घंटोहरेर्वेंकटनाथरूपाकल्याणसुल्लासयतिश्रुतीनाम्॥९५॥ पुनःसत्त्व...॥ वेदांताचार्यशब्दोस्मिन्वेदांतस्था १७
टि॰ १... २शास्त्रधियोः ३साहित्यशास्त्रम् ४चातुरीशब्दस्यबहुवचनम् ५हयग्रीव ६अज्ञानजम् ७ शेषः ८ आलोचयति ९ घंटावतारोवेंकटाचार्यः॥ ॥ ॥

पके क्षमः॥ इमं विवेकं कुर्वतो दांताचार्ये च तं विदुः॥९६॥ कु०॥ कथं नाम द्रुहिणगृहिणीचिकुरनिकुरंबचुंबिचंपककुसुमसुकुमारतराः॥ क
विकथि [illegible] रवगुरोरपि गिरो दुस्तरप्रस्तरनिष्ठुरबृंहिष्ठसासूयहृदयनिर्भेदाय जायंते॥ [illegible] शृणु तावत्॥ वेदांताचार्य गिरः प्रसूनमृद
वो मोदं दधुर्नः सतां प्रौढग्रावकठोरकाण्यपि परं भिंदंति हृद् द्विषाम्॥ नेदाचार्यजनाभिनंदितमृदुस्पर्शोपि पादो हरेर्दुर्भेदे शाकटास्फुरेतु
शंतकोस्त्याकारमागान्न किम्॥९७॥ पुनः सप्रार्थनमंजलिं बध्वा॥ दर्पाविष्टकुदृष्टिदुष्टसमयोत्सादाय बोधांकुरोद्भेदाय प्रबले कलावपि जयोत्सा
दाय वेधाध्वनः॥ श्रीमल्लक्ष्मणपक्षरक्षकबुधामोदाय पापाटवीच्छेदाया धिग्मरुत्तरुर्विजयतां वेदांतविद्यागुरुः॥९८॥ इत्य[illegible]न्यतो दृष्टिं वि
न्यस्य सांजलिबंधम्॥ श्रीमान् गभीरतरवेगवतीप्रतीरभूमावघद्रुहिस्फुरद्दुरिवावतीर्णः॥ कामादिवैरिगणमुल्बणमस्मदीयं कामासिकान
रहरिः कवलीकरोतु॥९९॥ इत्यन्यतश्चक्षुर्निक्षिप्य प्रांजलिः सन्॥ भयार्त्तजीवातुदयामहिम्नैव कुंठधाम्ने करवै नमांसि॥ आम्नायउ
क्तः परमेशितेति नाम्नाय उक्तः परमत्र चित्रम्॥१००॥ युक्तं चैतत्॥ यतो विष्णुः परम इति श्रूयताम् श्रुतिः॥ अनपायपरमो विष्णुः कस्माद् परमो भवे
त्॥ युक्तं स्वापतेरन्ये देवास्त्वपरमा इति॥१॥ किंच॥ जाग्रत्स्वेव शिरांसि नित्यं वचसां सर्वान्नतौ शार्ङ्गिणस्तत्र व्यासपराशरादिकृतं योदत्ताद्रा
[illegible]॥ [illegible] शासबुद्ददाति यस्तदुपसंगृह्णाति धत्तेथ वा यश्चैतच्छिरसैव तं परमं जानाति को नाम भवान्॥२॥ पुनः सचमत्कारं॥ दुर्वादिनो
विष्णुपदारविंददोषापहृतानुसरं [illegible] तिमोहात्॥ तेषां मतं तु स्वयमत्र विष्णुपदारविंदानुसृतिं विधत्ते॥३॥ इत्यन्यतो दृष्टिं विन्यस्य॥ संमेतरूढ
द्रुमपुष्पनिष्यतन्मरंदसंतत्यभिषिक्तमुत्तमम्॥ रविक्रमाध्वत्वनिरोधिगोपुरं त्रिविक्रमस्यायतनं निशाम्यताम्॥४॥ सविस्मयमभिध्यायन्
टि०१ विचार [illegible] किंच श्लेषेण इमं वेदांताचार्यशब्दं विगतचेकं वेशब्दरहितं कुर्वतो लोकास्तमाचार्यशब्दं च दांताचार्यं ब्रुवते ति युक्तमेवेति श्रीमद्दृतोपाव्हयलक्ष्म[illegible]
नांलापत्त कौशल्यम्॥२ यज्ञप्रायातास् ३ कामासिकानामकनगरवासीनरहरि ४ नआम्नायउक्त इति विरोधाभासवैचित्र्यं ५ अनुत्कृष्टः लक्ष्मीरहितश्च ६ गगना रविंदं

अव्यारूश्रयतामनश्वरपद्प्रासादनिश्रेणिकोहर्षादूर्ध्वमुदंचितः सचरणः स्फीविक्रमीनः क्रमात्॥ त्रैलोक्यार्पणतःसितंशुभ्रयशः स्तुत्र यदा सोऽद
लेदूर्ध्विष्ठोहरिनीलदंडइवयस्तद्वारणायोद्धृतः॥५॥ क्रु०॥ किमरे मापविनमेनक्रमंत्रिविक्रममभिनंदसि॥ पश्य॥ श्रीमानपिस्वयंदैत्यात्कु
वाणःकुप्रतिग्रहम्॥ विदन्समहतीं वृद्धिमपिस्वगोत्रैर्भिदेद्दौ॥६॥ विशिष्यायमुकपटानांकवीनांनश्लाघनीयः॥ यतः॥ नित्यानपायिप्रमदोपि
नाथोबहूभवन्वंचितदातृकोऽसौ॥ कविव्यथाक्तत्खलुभूसुरोपिभूदाभवत्त्वं सममेवभेजे॥७॥ वि०॥ अभ्युपगच्छामएवमतः प्रौढगुणदो
षेकृत्याणे स्थिमास्तामेषश्लेषचमत्कारः॥ आकर्णयतावदेतत्॥ पदश्रितारक्षणायप्रवृत्तेक्षणः स्वमहत्त्वाननुरूपमपिरूपमापेदे॥ नित्यान्न
तोपिनिरपायपरमाश्रितोपिदातापिहंतबहुशोमहतांपदानाम्॥ स्वीकृत्यवामनवपुःश्रितमिंद्रमीशःपातुपदत्रितयमत्रबलिंबिभिक्षे॥८॥ इन्दुः
सभक्तिप्रकर्षम्॥ त्रैविक्रमास्त्रिपथगाजनकः सपादः पायात्सुरस्यमरुतांमरुतांनिहंता॥ शंभोःस्फुरन्मुकुटभूषणदानचंचुसंभोनिधेःश्वश
रमासगिरोयमोहः॥९॥ इतिकिंचित्परिक्रम्य॥ अत्रहि॥ कांचीनगरविभूषाकामाक्षीकल्पमंजरीभजताम्॥ रक्षास्करसेनानांराजतिशर्वस्यस
र्वस्वम्॥१०॥ इतिनिरूप्यसविस्मयानंदंकामाक्षीमामंत्र्य॥ दंतश्रीस्तवदृश्यतेयदितत्कुंदःनिंदंतिकेवक्त्रंयद्यभिलस्यतेबुधजनश्चंद्रंनसं
द्रक्ष्यति॥ दृष्टेदृष्टियुगेपुनर्नेवितुयाद्वालोपिनीलोत्पलंसूक्तिश्चेदनुभूयतेमधुरताकामाक्षिकामाक्षिके॥११॥ क्रु०॥ यद्यपिविद्यतेकामाक्ष्या
सर्वाभिनंदनीयसौंदर्यम्॥ तथापिमुधातदितिप्रतिभाति॥ तथाहि॥ कांतोविरूपाक्षइतिप्रतीतःकामस्यहंतागिरिराजपुत्र्याः॥ स्तंबेरमास्य
स्तनयोपितस्यालंबोदरःकिंफलमाभिरूप्यम्॥१२॥ अनयोःस्वल्वंबिकात्र्यंबकयोःदांपत्यमननुरूपमितिव्यक्तमेतत्॥ इयंहिसर्वमंग
लासतुस्मशाननमंदिरोविभातिहैमवत्यसौसयातिदिक्षुभिक्षुकः॥ इयंतुकुंकुमांकितासभस्मपिंगलितोप्यरालकुंतलाचसाजटाभिरेषभीषणः

१लक्ष्मीसंपदौ २कुत्सितपृथिव्यो ३इंद्रकुलानाशकौ ४भूदैत्यत्वंतत्स्वीकारकर्तृत्वंच ५स्वभक्त ६निर्जलत्वं ७शिवःश्लेषरहितरूपेकुत्सितेअक्षीणीतिर्दमंशोऽपिविरुद्धंद्योतत ९सुवर्णालंकृताहिमनगस्यकन्याच

वि[illegible]वयस्यमैवंवादीः॥ नखल्वप्रशस्तैरप्यावासवासः प्रभृतिभिः सांसिद्धिकमभिरूपाणामभिरूप्यमपहीयते॥ निर्गस्तांवाङ्क्तिंनिवसतु
चिरंवा[illegible]वनेशिवस्तावद्वृत्ता महिमाणमथाप्येषसुभगः॥ परीतंशैवालैरुषितमपिपंकेषुमलिनंनलीनोबिभ्राणंकिमिहकमनीयंनकमल
म्॥ १४॥ किंच॥ रमणीयःसहिपुरुषोरमणीयत्रैवरज्यतिविदग्धा॥ श्लोकःसएवसुभगश्चित्तसक्तंहियत्ररसिकस्य॥ १५॥ अवधार्यतामति
मात्रमत्रेदंविचित्रम्॥ शिवास्यालोकितःकामोजितइत्येवशुश्रुम॥ व्यत्यासोत्रजितोयस्मात्कामास्यालोकतःशिवः॥ १६॥ पुष्कलंकिलपु
९५ त्रभाग्यमपिपर्वतराजकन्यायाः॥ यतः॥ कुशलीभनाथवक्त्रःपुत्रःप्रथमोहिमाद्रितनयायाः॥ पंचास्यात्पितुरधिकःषडाननोनंदनोद्वितीयोस्याः॥ १७॥ इत्यन्यतःकिंचित्प्रारिक्रामन्साभोदम्॥ शशांकमौलिःसहकारमूलेकैलासवासीसइहाविरासीत्॥ यस्याग्निभूर्हेकुचतनू
भवश्चयोषापिभूषापिचनागराजिः॥ १८॥ रू०॥ वयस्यकिंवर्णयसिविश्वविलक्षणचरित्रंरुद्रंलोकेहिलोचनशैत्यसपिपादपिषयायत
मानान्॥ जनानेवपश्यामः॥ अयंतुपशुपतिस्थाणुरितिस्वाव्हयमन्वर्थयन्निवआशुशुक्षणिमक्ष्णिनिक्षिप्तवान्॥ वि०॥ अवधेहितावदभि[illegible]स्यामिरहस्यम्॥ अंगानुषंगोदितसीतबाधामिदोषुसिंधोर्भ्रमन्वयेन॥ दग्धुंवहन्त्यग्निमपीतंतीयाद्दरोहसंतीमिवहंतनूं[illegible]
॥ १९॥ रू०॥ हंततर्हितुहिनकिरणशकलाकरसरिज्झरीशिशिरशिरस्त्रिपुरहरस्यकथमभिषेकप्रियता॥ ततश्च॥ गंगातरंगावलिभिःसुधांशोःसुधाझरैश्चानिशमार्द्रमूर्ध्नः॥ वृथाभिषेकंकलयंतिप्राग्भोस्तपतोयस्यदहत्यपःके॥ २०॥ वि०॥ अत्रापिसुक्तमुत्तरंव्याहरामि
॥ ज्वलनाकलनाद्विषस्यपानाद्विषभाजांवहनाच्चुतप्तमूर्तेः॥ अनिशंत्रिदशापगाधरस्याप्यभिषेकप्रियताशिवस्यजाता॥ २१॥ रू०॥ अ
स्तीदंनेथाप्यन्यदपिनयुज्यते॥ किमसौविहायविहायसं—ततशांकःशिरसिगंगातरंगांतःप्रतिवसतिमृगांकःकृशांगः॥ टी० १मनोज्ञाश्चारश्चम
राः २पार्वतीकायाम्लिकायनेत्रेतेनजितइतिविरोधः ४ एकाग्रेश्वरनामाशिवःआग्नेयश्चरइतित ६ शप्रसिद्धः ५ग्रहःअग्न्युत्पत्तिस्थानंचः ६ नगराजस्येयंनागराजिःनागानांराजि
रितिच ७ अंगारपात्र॥

वि॰॥ शृणुसखेतत्रकारणम्॥शिवशिरसिसीतभानुःसागरसूनुर्लसूवनाद्धरम्॥अधिवसतिनन्महिष्यागंगायाजठरसंल्पतनुरेखः॥२२॥
वृ॰॥ तथापिलुब्धएषफलप्रेप्सुभिरनादृत्यः॥ तथाहि॥ सूक्ष्मसितांशुकलाभेप्यपटोहैमधरपदनिविष्टोपि॥लुब्धोयमयोहस्तस्तंडुलमात्रेप्य
टत्यहोभिक्षाम्॥२३॥अन्यदल्पमिदमुच्यते॥यच्छंकरसंगाद्गंगायामपिजीवनदायिन्यांसक्तातातृक्तालुब्धता॥पूज्य॥मुक्ता श्रिताविं
ष्णुपदादुदीतागांगेयमुत्पाद्यवसुप्रकृष्टम्॥प्राप्यापिरत्नाकरनित्यसंगंकपर्दिकाशांनजहातिगंगा॥२४॥अन्यच्च॥सर्वतोमुखसमृद्धिजु
षोप्यसौपुंडरीकघनवासनयापि॥यत्तयाव्यवधिजन्तुमरवस्तत्तत्रजातिधिरसंगतिदोषात्॥२५॥पुनर्विमृश्य॥ईशःकरस्थीकृतकांचनाद्रिः
कुबेरमित्ररजताचलस्थः॥तथापिभिक्षाटनमस्यजातंविधौशिरस्थेकुटिलेकुतःश्रीः॥२६॥किंचैषविरुद्धधर्माकृतिवासान्स्तोतव्यः॥शृ
णुतावत्॥धत्तेमहोमूर्ध्नितदोषधीशमोषधिं भालतलेगकेषु॥फणीद्रमौलिस्थमणिप्रसूतेहरोंधकारित्वमथाप्युपैति॥२७॥अपिच॥तार
कारिवहनंकेमस्तकेतारकाधिपम्॥अंगीकुर्वन्नुदर्शमप्यलीकासोविभात्ययं॥२८॥वि॰॥किमेभिःशब्दश्लेषैकशरणैर्दूषणैरस्यखलुमृ
त्युंजयस्यविश्वस्तुत्यमसदृशंवदान्यत्वम्॥दीर्घायुमुनिसूनवेप्रददेदिव्यंतथाभीष्टदंप्रख्यातायभगीरथायभगवत्पादोमृतंप्राद्दात्॥
पापेभ्योपिचबाणपंक्तिवदनप्रेष्ठेभ्यइष्टफलप्रादात्तस्यशिवस्यभातिजगदाल्हादायवादान्यकम्॥२९॥कु॰॥तदेतद्याहतंभाषितं॥यन्म
हादेवस्यवादान्यकंजगदाल्हादायेति॥यतः॥दत्वावरान्दानवराक्षसेभ्योविश्वस्यचस्वस्यचयोविषादम्॥संपादयामासशशांकमौलि
र्दातृत्वमेतस्यतवैवहृद्यम्॥३०॥वि॰कुटिलधिषणगुणमपिदोषइतिघोषयतिभवान्॥ तथाहि॥ टी॰ १एककलः२चंद्रःवस्त्रंच३विरोधेहेमध
रस्येर्त्रैःथरं पक्षेहिमधरस्येदं४मुभंलोहंच५तंडुगणस्तेनलसतीतितस्यभावस्तत्वम्६मौक्तिकाविष्णुचरणः७भीष्मःकपर्णंच८[illegible]व्यंवसवश्च९सर्वतःप्र
सोंसम्हिजुषापक्षेसर्वतोमुखमुदकं१०पुंडरीकंकमलंतत्संबंधिसुगंधिपुत्रःयापक्षेपुंडरीकोयक्षः११[illegible]चंद्रश्च१२स्कंदं१३त्रिपंरश्मिवा१४कुत्सितंभालंच१५अ १९
ग्रेसरः१६औदार्यम्॥ ॥

देवेभ्योनवरान्सदास्यतिपदित्र्यक्षोमुहुस्तर्हि तेनाश्वास्यन्भुवनस्यपेष्टमुदयंनाप्स्यद्धीशा ड्डि‌ंणः॥नोदायिष्यतमानुषादिषु हरिर्नो सेतु
गीतादि‌संश्रारप्स्यद्भगवान्भवार्णवममीनालंघयिष्यन्नराः॥३१॥ किंच॥पंपातरंगशिशिरीशनिलंडिंभजातकंपाम्रेध्यघ्यति तपुष्पर साभिषि
३६ क्तः॥संपादयत्यतुलसंपदमर्थिनोनुकंपासुधांबुधिरयंपतिरंबिकायाः॥३२॥पुनर्निरीक्ष्यसम्म्राघम्॥अल्पोपिकांच्यामावासादासादय
तिगौरवम्॥यतएतत्पुरस्थाणुर्गिरीशइतिगीयते॥३३॥क्रु०॥अन्योन्यविरुद्धस्वभावाभ्यांदेवाभ्यामाक्रांतांनगरींकिंविनौषि॥देवौद्वाव
धिकांचिपश्यलसत्तः प्राचीप्रतीच्याश्रयोस्तत्रैकः कुरुतेविनोपकमधश्चित्रंपुरश्चापरः॥एकोनित्यमनष्टमूर्त्तिरितरःख्यातोष्टमूर्त्तिर्जगत्ये
कोवारितवान्गजार्त्तिमचिराद्धत्तेगजार्त्तिंपरः॥३४॥मह्ला॥कांचीनाम्निपुरेसुरेंद्रमहितेप्राक्पश्चिमोद्देशयोश्चित्रंदैवतयोश्चिरंनिवसतो
रीतिर्विरुद्धामिथः॥एकोहिद्विजराजमप्यधरयत्यन्यस्तमुत्तंसयत्यंघ्रोहंतबिभर्त्तिकश्चिदपरःस्वेमूर्धनिस्वर्धुनीं॥३५॥विरुद्धदेवाक्रांत
कांचीनगरसमागमाह्वारणधराधरोप्येवम्॥तथाहि॥भेत्तास्तिगोत्राद्र हरिर्महासवजुषोहिरण्यगर्भस्य॥भयकृद्दिभास्याभयकृन्मूलाचे
लयोश्चक्रास्तिहस्ति॥३६॥अयंचापरोदोषः॥दशानुषंगंचगदांन्वयंचलस्यकुजनायेनिवसतिकांच्याम्॥दंतावलाद्रीश्वरमाश्रितास्तेदेहासये
तीनिर्धृतभजंते॥३७॥वि०॥सर्वमेवंसंभाविष्ठाः॥यतएकरूपदैवतमिदंनगरमितिसमर्थ्यते॥शृणुतावत्॥फणिपतिसरःस्फुरत्तोभेनो
यकधरात्तमांगशोभितनुः॥भवहरिसंज्ञाकांच्योःपूर्वापरयोर्हिदैवनाजयति॥३८॥अन्यच्चास्यनगरस्यभूषणमेवनतुदूषणमित्यन्यः
च्चदृष्टिमाधायसानंदम्॥अहोखलु॥ममाद्यपच्चेलिमभागधेयम्॥सर्वेयोवतोपगीतःप्रातःपद्मानननोमुनिर्ध्यातः॥व्यासेकृतौयःख्या
तःप्रांडवदूतःसदृक्पथनीतः॥३९॥क्रु०॥अनुचितकर्मासौकिमर्थमनुवर्ण्यते॥टी०१एकाम्रेश्वरसमीपवर्त्तिसरः२पुरस्योऽणुःपुरःसंबंधिस्थाणुरितिच
शिवश्च३गरुडःगणेशश्च४गजेंद्रार्त्तिं५असुरः६गरुडचंद्रौ७भयंशंखश्च८गोत्रधरौ९अनंतसरःपक्षेसर्पराजहारः१०आद्येभनायकश्चेंद्रःपक्षेदुभनायकोहस्ति
गिरिः११भक्तगण

वि॰ द॰ सकलजगतामीशानोपि स्वयं विगतश्रियामिदमनुचितं दूतो जातो यस्य पृथ्वीभुजाम्॥ किमिह महतां द्वारस्थो न पोतनिकेतने विरमथिप
२० तेऽभिसादासानुदासतया स्थितिः॥४०॥ वि॰॥ पुरो भागिनूभगवद्गुणोघुन्नोषुमनीषया भवानेव दुष्यति॥ श्रूयतामेतत्॥ कवित्वस्य गांभीर्यं ओ
दार्यमृद्वैः प्रभुत्वस्य शौर्यं गुरुत्वस्य विद्याम्॥ महावंश्यतायाः सदाचारवृत्तिं महत्त्वस्य सौलभ्यमाकल्पमाहुः॥४१॥ इत्यपरत्र विमानमानय
न्सानंदम्॥ अत्र हि॥ विकचरुचिरपुंडरीकखंडच्युतिमदमोचनलोचनप्रभावः॥ जयति विजयराघवः स देवः शुचितरगृध्रसरोवरोपकंठे॥४२॥
किंच॥ संपातिसोदरसरस्तटसंप्ररूढो भात्यङ्कतो विजयराघवपारिजातः॥ शाखा तते रुपरि सङ्गिरुदीक्ष्यते यो यस्याध एव सकलः स्फु
मनश्च प्रपंचः॥४३॥ पुनः सभक्तिप्रकर्षम्॥ जनानुद्दिश्य॥ भोभो भुक्तिमुक्तिप्रेप्सवद्दश्शृण्वन्नुभवतः॥ विश्रुताश्रितवात्सल्यं वीरं विजय
राघवम्॥ नमस्कुरुत योगृध्रं समस्कुरुतदाहतः॥४४॥ अत्रान्वगृध्रपतिक्षेत्रे विश्वप्रसिद्धा काचिद्वैचित्री॥ तनयार्थनयासमागताभि
स्तरुणीभिः परिभर्जितान्त्रमुद्गाः॥ दृढमंकुरमुग्रदेवशक्त्या सममासा पुलकांकुरैः फलंति॥४५॥ छ॰॥ निजमहिमानुरूपस्थितिरसौ
विजयराघवः किमीड्यते॥ श्रीकरकृतोहसमयूरवाहमुखभंगीतो गरुडासनोसौ॥ क्षीराब्धितीरावसथोपि वासं करोत्यहो गृध्रसरोति
केस्मिन्॥४६॥ वि॰॥ तदेतद्व्यापयोधेरेतस्य भूषणमेव न तु दूषणम्॥ तत्ताद्दगुत्तमपदे तमसः परस्तादस्तामयेरनुलसूरिभिरर्चितोपि
॥ अत्राविरस्ति हरिरेष चिरान्नराणां दृष्टिकृतार्थयितुमेव दृढानुकंपः॥४७॥ इति दक्षिणतो विमानं प्रस्थापयन्सहर्षम्॥ इयं हि॥ गंगासिं
धुसरस्वतीभवहरा तुंगा पतंगात्मजारंगाभ्याशतरंगिणी वदघतस्य गारभंगावहा॥ शुभ्राराध्यमनोमनीषिजनतारब्धावगाहा सुहुर्मुग्धा
नामपि सुद्दबुद्धिजननी दुग्धापगा दृश्यते॥४८॥ किंच॥ ॥टि॰ १ एतन्नामा देवः २ वेदशिक्षाच ३ दैवपुष्पयोः ४ दाहश्चमत्कारमकरोत् ५ शुकाचार्यः
पर्श्चिद् ६ परमहंसाः ७ षडाननः मयूरो वाहनश्चेति पृथगपि श्लेषे ८ छंदोमयासनत्वं सूचितम् ९ कांचननदी १० कावेरी ११ पालरूढ इति तद्देशप्रसिद्धा॥ ॥ २०

दूतांन्यत्राभिक्रामन्मंदानिलस्पर्शसुखमभिनीयसानन्दम्॥ कल्हारोत्पलतल्लजोल्लुलनवत्कल्लोलनिर्लोलनक्रीडापादवगाढरूढहिमता सौरभ्यविभ्राजितः॥ कावेरीसलिलावगाहरसिकः कस्यैषनेड्योमरुत् क्लांतानांमुहुरध्वनीनवपुषांयन्निर्धुनीतेश्रमम्॥८६॥ कावेरीनिरीक्ष्य सशिरःकंपम्॥ हंतरंगपुरसंगतमत्राहं तरंगचलपंकजसंघम्॥ सद्योजांयतञ्झरंबहुमन्येसत्यजायततमःशमनार्थम्॥८७॥ एषाखलुदोषा कुलसकलमनुजकुलसकलकलुषशोषणबद्धकंकणकंकणानिजतटनिबिडतमबकुलधवलकुलतिलकामलकाविरलसरलकुंदचंद नमंदारसहकारकेरलकेसरसरलबदरकदंबकदंबकगंभीरजंभीरजंबीरजंबुसपूर्णपर्णकुसुमपलाशप्रसमृद्धकपित्थलोध्रजीरप्रशिलीध्र पाटलपटलजलिलक्रमुकप्रमुखविशंकटविटपिमंजरीपुंजसंजरीजंभदुरुतरश्रमशमकरमकरंदरसग्रसनतात्पर्यपर्यटद्देभ्रविभ्रमालं बरोलंबनीकुरंबकरंबिततयाकलिंदनंदिनीप्रतिच्छंदतामनुविंदतीनिशाकलितविशालसुरत्नदशाभवश्रमशालिक्षितीशालिनिशांतकु डंचयतीसततमंतर्गतचिरंतनपुरुषतल्पीभवदनंतफणामणिघृणिश्रेणीशोणीभूततयासरस्वतीमनुकुर्वतीपार्श्वद्वय्यामपिनैय्यमिककर्मानु गराजनाभिसरोजराजमाननिखिलनिगमपठनमुखरचतुर्मुखसुखवैखरींव्याचक्षणानांमदकरमरालयूनांवरतापरिरंभपरिचुंबनसुखानं पयसिविहायसाध्यासेनसमागतश्चंद्रमाःसन्निहितश्रीरंगधामास्वसमाननामाविधुर्विरचितामेकावतारद्तीर्थ्यैरस्त्वयमपिबहूनिरूपाणि॥

टि० १ पांथाः २ अत्र अहमिति च्छेदः ३ मः शिअनायनेति च्छेदः॥ ४ बद्ध ५ हंसी॥

दे दधानो विराजत इति भ्रांत्यां सत्याम् अनुरागमांद्यसंपादिकायामितरेतरहृढाश्लेषोन्मिषत्तोषाभिः कोकदंपतीपरंपराभिर्निराकृतायाम् अकुंठो
२३ त्कंठनसुबलोकेनगुर्तिमेषमवलोक्यमानैरलंकृतासरस्वत्याभिमुख्येनकवेरात्मजेति प्रसिद्धिं सार्थयंती शांतनवास्पदतयागांगेयतरं
गिणीति संज्ञामन्वर्थयंती समज्जनदुरितहरापि नमज्जनदुरितहरा निराकृतपथिकविश्रांतिः स्रवंतीयं कदलयति चक्षुषोरमंदमानं
दम्॥ प्रहसतिभवद्घोषकरीभवेनपरितोषितां स्रुवर्णनदी॥ दुर्वर्णरुचिरफेनैः सत्यमकृता जान्हवीमसत्यमकृतां॥ ८८॥ पुनः सश्लाघम्
स्वर्णवत्तं विदुःकां तरामां हेमापगामिमाम्॥ दांपत्यमनयोरेतदनुरूपं विशोभते॥ ८९॥ कु॰॥ साक्षेपम्॥ परिशोभितास्त्रपार्श्वोमध्यमहि
तरंगराजे ततः स्फुरिता॥ कथमिव दधाति कीर्तिं कावेरी कनकनिम्नगेत्येषाम्॥ ९०॥ विश्वा॰॥ आपातदूषणमिदं निरूप्यमाणमस्यागुण
एवस्यात्पश्यतावदेनांपरमरमणीयाम्॥ पीतांबरालंकृतमध्यभागा कल्हारमालाकमनीयवेणी॥ सैत्याद्रिकन्याजनकस्यगेहात्पत्युः
समीपं व्रजति प्रसन्ना॥ ९१॥ पुनर्निर्वर्ण्य॥ उद्गच्छदच्छतमगुच्छलसच्छिरस्काः तीरद्रुपे पितरवः प्रतिभांत्यमुष्याः॥ एनां तरीतुमिहयत्न
जुषः स्वशीर्षबद्धावदातवसनाः पथिका इवामी॥ ९२॥ किंचिदंतरमुपसृत्याधस्ताद्विलोक्य सहर्षम्॥ सारंगडिंभनयनानवकेलियोः
ग्यनारंगमुख्यतरुपुष्कलनिष्कुटयम्॥ श्रीरंगदिव्यनगरी प्रथतेनपाब्धिपारंगतैर्बुधजनैः परिसेव्यमाना॥ ९३॥ निपुणं विभाव्य स
शिरःकंपम्॥ हंसानिष्कुटदीर्घिकावसतयः प्रक्रांततर्कावहाली लोद्यानचरः पतंजलिगिरापुंस्कोकिलः खेलति॥ हेतोहेंतकथाययथा
विदधतिक्रीडाकुमाराद्हस्वैरं तांत्रिककारिकाः परिपठंत्येतासुहुःसारिकाः॥ ९४॥ किंच॥ प्रातःप्रातः पयसि विमले पावने सत्त्वपुत्र्याः
स्नात्वा स्नात्वायं सकलविषयत्यागिनो योगिनोमी॥ वारंवारंभुजगशयनं लोचनाभ्यां पिबंतः क्षामक्षेमाः क्षणवदखिलं कालमत्र क्षिपंति॥ ९५॥ कु॰
टी॰ १ कवेरात्मजाकन्येतिश्लेषेण २ शोभनंतमर्णवंसुवर्णयुक्तंच ३ आम्रताम्रइतिपदे ४ त्रपु ५ रूप्यंपक्षेतसिप्रसर्यांतम् ६ बहुलकल्याणाः ॥ ॥ ॥ २३

वचस्यविरुद्धमेवाभिभाषसे॥ सारंगदृष्टीः कथमुत्सृजध्वः सारंगदृष्टीः स्वदते मुनिभ्यः॥ कवेरजासंगतिमुच्छ्रितश्रीः कवेरजासंगरुचिः क
थंस्यात्॥९६॥ वि०॥ सरवे भवता भणितानां पदानां व्यासेनैव विरोधः समधिपद्मस्यग्रतः पश्यन्नंजलिबध्वा॥ श्रीरंगेशोभतेयस्य श्रीरंगेशोभ
तेस्वपः॥ नमोहं कलयेतस्मै नमोहं कलयेततः॥९७॥ किंच॥ प्रणिपति कर्मीकुर्मः फणिपतिभोगेशयं रथांगशायम्॥ कारणमेकं जगतां वारण
पतिभीतिवारणं ज्योतिः॥९८॥ कु०॥ किमस्मिन्महाभुजंगे क्षिपंते त्वया प्रणामाः॥ तथाहि॥ श्यामोत्तुंगपयोधरोज्ज्वलरुचिस्तन्वन्भुजंगा
न्वयं श्रीरंगस्थलनित्यवासिरसिकः शृंगारिणामग्रणीः॥ प्राकारप्रकरांतरस्थितिमतीयाराजपद्मिन्[illegible]ः शंकेपरपूरुषुष्विरमसौ लिहा
तितत्संनिधौ॥९९॥ वि०॥ श्लेषावलंबनाद्दोषानमेरोषावहाः॥ प्रस्तुततोषावहाइति नाहमत्रोत्तरयामि पुनर्निरूप्य॥ क्षितिभृद्गिनिजमौलि
धृतपादो विरहितापकारी च॥ इंदुरिव रंगबंधुर्दोषाभावे विलोक्यते किंतु॥१००॥ यद्वा॥ नविधौ शुभ्ररंगलस्थितांगे स्मसुदाप्यायनकारिणी दृ
दृष्टे॥ कुलयामि कुरंगलक्षितांगं कुमुदाप्यायनकारिणं विधुं तम्॥१॥ पुनः सं[illegible]त्यसमविस्मयम् रंगेशासेवकोयुक्तं नोर्चरीतिं भजेदिति॥ चित्रमेतद
संगीतिव्यपदेशं समदश्नुते॥२॥ अन्यदद्भुतमद्भुतमत्र श्रीरंगधामनि। यच्चंद्राभिव्य[illegible]प्येकाशोभतेपुष्करिण्यहो॥३॥ समंतादवलोक्यस श्लाघम्
गरंगक्षेत्रमिदं रमेशितुरभिव्यक्तिस्थलं त्वादिमं तीर्थं सैवमहत्वधा भगवती यं[illegible]वीनिश्रुतिः॥ सर्वोत्मानगरस्य चास्यजगतां निर्वाहको नायको
वासश्चेदिहलभ्यतेजगतिकोवैकुंठमुत्कंठते॥४॥ कु०॥ साधर्म्यांगीकारम्॥ सोयं पद्मविहृत्य एव विषयः सायंतने दीवरश्यामांगेन सनायकः कृत
तमोभंगेन रंगेंदुना॥ भ्रांताः किंतु चरंति हंत पिशुनाः शांतात्मनां नापदः श्रीमंतोपदु दंभनाहूतनरवत्वत्रासमभ्यासते॥५॥ किंबहुना॥ निलं
नसिंधुमध्यरुचिरो निष्कंपसंपन्निधिर्निस्तुल्यामपिकांचनश्रियमुरोमध्ये दधानः स्वयम्॥ बिभ्यत्किं पिशुनेभ्य एष बहुलप्राकारसंवेष्टिते शेते

१ विलसर्पी २ रंगस्थलक्षेत्रं च ३ चंद्रनृपौ ४ राजापद्मितश्च ५ किरणाश्चरणाश्च ६ रंगसंज्ञकेविष्णौ ७ सुरंभमि सर्पः ८ प्रसिद्धचंद्रम् ९ नृत्यरीतिं आर्तरीतिं च १० संगीत्यभावः संगरश्लिष्ट

धामनिरंगनायकइतिस्वाख्यामिहख्यापयन्॥६॥वि०॥सखेनजातुश्रीमतांहानिःप्रत्कततद्दूषणांपिशुनानामेवभवंत्यनर्थाः॥परवित्तजिही
र्षयाप्रवृत्तःपिशुनस्तामेवयमेवनाशमेति॥स्फुलभःशलभस्यकिंनदाहःपृथुदीपग्रसनायजृंभितस्य॥७॥ अलमन्यप्रसंगेनतमेवचरंगेशंश्रीरं
गधामानमनुसंदधामि॥सविस्मयं॥स्वपर्यंकेरूढाद्पिप्रायुमीष्टेसमर्थौजगत्स्वयंयोरामचंद्रात्॥अरंगाधिराजोदितप्रौढभक्तेरपिप्रापपूर्णां
सरंगाधिराजः॥८॥ अथवानात्रविरोधइतिसमर्थये॥कुबस्तुहानात्सहस्तसंगृहीतःपृथवःस्समम्॥ हंताकुरंगराजस्यरंगराजमपूजयत्॥९॥
पुनःसभक्तिप्रकर्षंभगवंतमुद्दिश्य॥कृतस्करस्तुतिघोषेशत्रुघुस्फीतरोषेनिहतविनतदोषेनित्यदास्याभिलाषे॥ललितवपुषिशेषेलब्धसंपू
र्णतोषेपरमपुरुषशेषेपर्वचंद्राविशेषे॥१०॥ भगवन्रंगनायकभवदीयेसदसिभाषितुमक्षिवयंबिभीमः॥ तथाहि॥ कर्तृव्याकरणस्यवामनिते
रद्यस्यप्रवक्रीक्षणंभाष्यंव्याकरणस्यसाधुविदधेश्राव्यापदीयापुनः॥ यद्वाग्देहिजशेखरःकृतिमयोयस्यप्रभुषाभारतीगोष्ठ्यांत्रस्यतितस्यते
कविजनोरंगेशकर्तुंस्तुतिम्॥११॥ पुनरंजलिबध्वासप्रार्थनम्॥वरगुणगणसीमावारिदश्यामधामासततममरामासंघसंगीतनामा॥परि
हृतभवदामाभासिताकल्यहेमाममकलयतुभूमामंगलंरंगधामा॥१२॥ अम्भोजवीस्यसश्लाघम्॥स्वामिनीस्तोमिनीलाब्जमदमोचनलो
चनाम्॥ अंगनांरंगनाथस्यदीप्तिंमूर्तिमतीमिव॥१३॥देवीमुद्दिश्य॥मोहोन्मूलनमूलिकाभवजुषांसोपानपंक्तिःश्रेणिकाचेतःशुद्धिविधान
सिद्धगुलिकाचिंतातमश्चंद्रिका॥विद्याविभ्रमसारिकासिकमलेविष्णोरुरोमालिकामातस्त्वंममपारिजातलतिकामोदांबुधेर्वीचिका॥
॥१४॥ रू०॥ कांत्येवहंतवृत्त्यापिकमलामपिचंचलां॥अशिष्टेष्वेवरज्जंतीमभिष्टौतिकथंबुधः॥१५॥ तथाहि॥ प्राक्पर्यंकमधिष्ठितोपिमृ
दुलेपातेशाश्याममपिप्रायःप्रार्थयतेकदन्नमिवयःक्षीरौदनंभुक्तवान्॥प्राश्नात्येषकेदुष्णिकाममृतवत् प्रागात्तपीतांबरःकंथांयाचति॥

टी० १ सभा २ स्थित्यास्वभावेनच ३ विद्युतंचपलांच ४ दुर्यवागूः॥

भृत्यन्ति क्षितिपतिर्लक्ष्मीकटाक्षाश्रये॥१६॥ अन्यच्चावधेयम्॥ दातुर्द्वारि य एष वारणमगात्तद्वार्यहो वारणं पश्याम्यद्य चिराद्दशेतद्भुवि यो भूत्तस्य
शेते भुवि॥ ताद्दारानपि लेभिरे यद्वलाहारान मूर्च्छत्रियाविदं तत्कमलादृगूर्मिभिरहो निम्नो भवत्युन्नतिः॥१७॥ इदं च बोध्यं श्रियमुद्दिश्य॥ हन्ते
वं कुत्र मौनं धनार्थमनघान् गंतुः परस्त्रीशतं तर्तुं जंतुविहिंसकैः सहजनैः संतुष्यतो वंचनैः॥ वक्तुं स्तीक्ष्णमयुक्तमेव वचनं पंकुमितं चोदनं नि
त्यं नृत्यसि मंदरेषु कमलेक्षत्यंत वै तन्मतम्॥१८॥ अन्यच्च॥ एषा मन्यकलत्रदर्शनकलाच्युत्पत्तिशून्ये दृशौ मूढं हृच्च परार्थचिंतनविधौ मिथ्या
गंभिन्नं मुखं॥ अप्रज्ञातपशून् बुभुक्षितशिशून्क्रोदकैस्ताम्यतस्तेषां लक्ष्मि गृहान् दृशाच भयभीते वेहमार्गे शुकृसे॥१९॥ वि०॥ सरवेमनसः
र्भागेहजननी तवेयं वाणी॥ यतो दुःशीलेषु दृश्यमानाः साधुजनानुपयुक्ताः संपदश्च याः प्रस्तुतमृत्फतरणकारणभुवनजननीकृपाकटाक्ष वै
धुर्ये निबंधना एव॥ उक्तं हि॥ गुणहानेरुदधिदुहितृवैमुख्यनिबंधनत्वमुन्नितज्ज्ञेन केन चिद्विदुषा॥ सद्यो वैगुण्यमायांति शीलाद्याः सक
लगुणाः॥ पराङ्मुखी जगद्धात्री यस्य त्वं विष्णुवल्लभे॥२०॥ ततश्च॥ संपत्तिः किंपचे नानां संप्राप्ता कोपशेनया॥ नरकानुभवोदर्कोनिसा लक्ष्मीः
कृपाफलम्॥२१॥ तथाहि॥ धन्यंमन्यतया तृणीकृतबुधा धर्मेषु दुर्मेधसः सेष्युरीत्यामसत्पुण्यलेशविलसत्संपल्लवाः पल्लवाः॥ पश्यासूनपहाय
पंचषद्दिनेराकल्पमल्पाद्द्रुमे भोक्ष्यंते बत यातनाबहुविधाः कार्तांतगर्तांतरे॥ श्रीश्च भणितं भवता तत्र भवतः शिष्टान् लक्ष्मीनवीक्ष तदितितद
ज्ञानोपपन्नं हि तमेव॥ अतः साधुजनेभ्यो मुक्तैश्वर्यपर्यंतनिरंतरभगवद्भक्तिसंपदं प्रयच्छ दूणापास्तमारामयविकारावाराशिदुहितुरुदारकटाक्ष
सुधाधारा॥ संभोगारंभजृंभन्मदकितवपतीरंभसंभिद्यमानाप्रौढस्त्रीरत्नहारप्रशाशिस्रगुणवत् भंगुराः संपदोघाः॥ साधूनामास्म भूवन् स्फार
पुनरपीकारदक्षा हि लोके भोक्ष्यंते मोक्षमंते स्थिरनिरवधिकानंदधारात्मकं ते॥२३॥ किंच॥ लक्ष्मीकटाक्षपूरः सजयति यदुपचयतारतम्ये
हा॥ नरसुरपशुप्रजानां यतयः स्युर्हितजंतवः केपि॥२४॥ टि० १ भृत्यवदाचरति २ कृपणाः ३ अन्यायेन ४ औकलिके ५ पंचषड्वापानि ६ कृतांतोपमस्त
स्यये

वि॰ टी॰॥ कमलाकटाक्षातिशयो विभवोपचयहेतुरिति नोपपद्यते॥ यतस्तदल्पीयस्त्वमेव संपदुत्कर्षसंपादकमुक्तं तथाहि॥ गजशिबिकातु
२५ रगाः स्फुरन्नरस्य तन्व्यादृशा हरेस्तन्व्याः॥ तद्भून्निभवसि वाहो नीरदव्रक्षाच हन्तपक्षिन्च॥२५॥टि॰॥ विहगस्य॥ ईदृशी मुत्कर्षमपि मुनामरवि
दाल यामभिनंदामि॥ किंदर्पदायकधनोपचयैर्भवत्तैः कंदर्पसायकहतेः क्षितिपैर्हिताति॥ संतः पुरंदरसुतत्वरविंदनाभेरतः पुरतदवनाद
नुचिंतयंति॥२६॥ पुनरनुध्यायसांजलिबंधम्॥ मातस्तेमधुसूदनप्रणयिनि प्रातस्तरो जच्छदामुष्टीमुष्टि विचक्षणेशुभगुणे दृष्टी नमस्कुर्महे
॥ अष्टाभिः किल दृष्टिभिश्चतसृभिर्जुष्टाः सहस्रेण वा देवा ह्यादशभिश्च यष्टिभवंतामेवार्थयंते क्षणम्॥२७॥ इत्यनन्यतो वीक्ष्य सानंदम्॥
उपरिपुनिग्रहरूपविग्रहदिवौकश्चक्रवृतशक्रमदविक्रमनिहंता॥ मोदरसमाद्रिपतिपितद्गरुडपूर्णः प्रक्षिपतुपक्षिपतिरक्षिपुगुलेमे॥२८॥ टी॰॥ किं
वर्णयसि सुपर्णममुमतिक्रांतमपोदम्॥ तथाहि॥ अधिगतनिगमांगोपि द्विजराजोप्यच्युतं दधानोपि॥ निजगारकथंकारं निःशंकं भिल्लपल्लि
कां गरुडः॥२९॥ वि॰॥ पक्षिराजस्य भिल्लपल्लिकानिगरणेन साधुजनानुग्रहासाधुजननिग्रहसामर्थ्यसदसद्विवेचनचातुर्यं चव्यंजितमेतल्लक्ष
स्यामेव दूषयसि॥ शृणु॥ गरुडोगिलन्किमपि किल्बिषाविलं खलु भिल्लजातिमुषितं तदंतरे॥ निरजीगलन्निजगलादिलासुरं भवतः प्रप
न्नमिव पन्नगेशयः॥३०॥ हंत शकुंत पुरंदरस्यास्य स्वच्छंदविहारावसरेष्वप्यभंगुरमवस्वामिकेंकर्यम्॥ पक्षमारुतोत्थितजलधेः पश्रिततरथघूर्णि
मन्मंडलस्याच्युतास्पसन्मार्गपक्षवातोद्गतधरणिरजश्छन्नमेतज्जवेन॥ कल्लोलैरुल्लसद्भिः प्रचलजलनिधेः क्षालयन् घूर्णदर्णः संखडिंडी
रपिंडैः॥ कमलकुसुमकुलैर्मंडयत्यंडजेन्द्रः॥३१॥ पुनरभिध्यायन्॥ यद्वीक्षाधेयरक्षा किल गुलकभृता याचता देवतानां सेवासंमर्दकाले
गिरिशकमलजगणाद्भिभ्यतामभ्यतानीत्॥ सोयंगांगेयपृथ्वीधरवरशिखरच्छायदायादकायश्चिंदन्वृंददरिपूणां कलयतु कुशलं छांदसो
नः शकुंतः॥३२॥ पुनः सविस्मयम्॥ नगरूपमुपेतिपुक्तमंगीकृतशांखोपि सुपर्ण उन्नतोपि॥ टि॰१ हंसरूपत्वं २ वेदशाखाः शिखाश्च ३ दलानि पक्षाश्च॥ २५

३

विं नतं [illegible]विधेयएषचित्रं स्थिरमामोदमगान्मधौ विपक्षात् ॥३३॥ अथसर्वतः पुरीं निरीक्ष्य सांजलिबंधम् ॥ श्रीवल्लभदासेभ्यः श्रीरंगक्षेत्रनित्यवा
सेभ्यः ॥ [illegible]तिभवत्रासेभ्यः नमोस्तु कृत शिष्यधीविकासेभ्यः ॥३४॥ कृ० ॥ सखे सर्वनितत[illegible] वास्तव्यान्मास्म भवान्नमस्कार्षीत् ॥ निर्भिरीस
गुणस्तोमैर्हरिदासैरलंकृते ॥ अट्टशूलाः कति पर्येपट्टने स्मिन्प्रतिष्ठिताः ॥३५॥ निरूप्य सविस्मयं ॥ शंकाद्यर्थे दविरघहरं शौरिणास्वादितयत्
त्वं वित्तग्रहणचपलाः केपि विक्रीणतेतत् ॥ धामश्रीमद्यदिमधुजिताधीयतेस्वीयमेतेन नत्रस्यं तेधनकणे तृषास्तञ्चविक्रेतुमज्ञाः ॥३६॥ वि० ॥ मं
[illegible]न्तेमैवं ॥ किंकिनजीर्यति मुकुंदपदारविंदद्वंद्वाभिवंदनकृतामिहदेहभाजाम् ॥ अत्यद्भुतौषधविशेषमि[illegible]मापादयेतकिमनर्थमप
थ्यसेवाम् ॥३७॥ समंतात्पुरीं निरीक्ष्य सश्लाघम् ॥ रंगाद्न्यदनंगारेः क्षारेर्वास[illegible]ह्यैव ह्यौ ॥ किं दृष्टं किमपि क्षेत्रं सप्तप्राकारवेष्टितम् ॥३८॥ कृ०
वयस्यमेवं वोचः ॥ अभ्यर्णस्यपुरस्यैतदृधिसह्याद्यमजातटम् ॥ शैवक्षेत्रमवेक्ष[illegible]याः सप्तप्राकारसंवृतम् ॥३९॥ विस्मा० ॥ विहस्यसत्यम् ॥ ज
टाधरप्राकारसंवृतस्यास्य श्लेषनैपुण्यनैवरंगसाधर्म्यं समर्थनीयं निपुणंनिरूप्य ॥ नंदत्कंदर्पदर्पक्षपणनिपुणदृग्वन्हि संपर्कलाभारुण्यः
फण्याग्रगण्यप्रकरमयतयाभीषणैर्भूषणैर्यः ॥ कांतः सांतः पुरः सन् कवलितग[illegible]राजत्सेरन्तद्गौमत्यां सत्यात्मजाग्रे विहरतिसुचिरं शंकरः
शंखरोचिः ॥४०॥ कृ० ॥ सखे नात्रस्थातव्यम् ॥ यदिहविश्वविलक्षणारीतिरालस्य[illegible]या ॥ येतोयैर्नादेयैरभिषिक्तास्तेहिंतापमुज्झंति ॥ प्रत्युतज
हातितापंकावेरीशिरस्यभिषेकेण ॥४१॥ वि० ॥ [illegible]तिएवं ॥ कृ० ॥ शृणुतावत् ॥ गंगानुषंगा[illegible]मुनेसदर्थ्येत्यसह्यतापावतसह्यकन्या ॥ गंगाधरेस्वैरभिषि
च्य[illegible]नितायैः स्वयंतापमभिपंजहाति ॥४२॥ वि० ॥ ईदृशंदूषणंगुणग्राहिणामभिमतमेवेति अन्यतोविमानंप्रस्थाप्य सानंदम् ॥ अमीखलु ॥ व्याल
धिप[illegible]यंशुभस्थलभूषतैलाः स्वेलाशना[illegible]तनसांद्रतरांतरालाः ॥ चोलाविभांतिपत[illegible]माभवि हारवेल्लाडोलायमानसहकारनवप्रवालाः ॥४३॥
[illegible]विभाव्यसोत्कंठं ॥ नागवल्लीमतल्ली[illegible]गैः क्रमुखीभिरिवादरात् ॥ ॥टि० ॥ १ नम्राः २ वसंतवैलो ३ पक्वान्नकर ४ जानि ५ प्राभिर्जटाभिसहितः शंकरस्त
स्यप्राकारः ॥

१रिक्थाः प्रमोदितेऽक्रमुकाः कामुका इव॥४४॥ इतश्च भवानवेक्ष्यताम्॥ अभ्रंलिहानहहा दृश्यमस्तु धायारो धोरन्सत्त्वशु फलानि ह नारिकेलान्॥
अप्यच्छुते सवितृमंडलमाश्रिताय देवाय भक्ति तद्वात्त स्वोपहारान्॥४५॥ कु० ममत्वेऽमतिः॥ लोलन्हीर्घदलान्बृहन्नरफलावातो ल्लुलत्थूलिभि,
श्छन्नाः प्राकृतमाः सुरेतिपुरतो येनारिकेलद्रुमाः॥ धूम्रास्वादनपात्रे धारिण इमे दूर्घिष्ठचचज्जटाभस्मोत्थूलितमूर्तयो विवसनाः पाखंडिभेदा
इव॥४६॥ विश्रान्तहा समन्यतो निर्दिश्य॥ ष्ठोन्याकर्षो चितगंधप्रसवान्प्रपश्य न्नाग्रान्॥ अतेनूथास्तुगकेलनासंप्राप्तानधिकरेणुसंपर्कम्॥
॥४७॥ पार्श्वतो वीक्ष्य॥ अहो महोन्नता जनपदानाममीषामभिजा ता॥ पश्य तिष्ठामस्तो मउक्थ्यातिरात्राप्तोर्यामः षोडशी वाजपेयः॥ प्रौ
ढा यज्ञाः पौंडरीकाद्या येचोलेष्वते चित्रमोपासनंति॥४८॥ पश्य॥ गृहे गृहे पश्य ग्निहोत्रिणः शास्त्रोषधोऽल्ला घट्टोविदोषाः॥ पुण्योत्तराः पंडित
पुंडरीकाः पुनंति वेदैकधना जगंति॥४९॥ कृ०॥ एतद्विषयविषयाश्लाघा शास्त्राङ्गेशारैव न कर्तव्या॥ यत एतद्देशवसतां सतामप्यनेकप्रकारादुरा
चारा उपलभ्यंते॥ स्नातिप्रा नरधिस्त्रवंति विधिवत्संध्यादिकर्माचरंत्यग्नीनादधतेमखान्विदधते शास्त्राणि चाधीयते॥ अभ्यर्चंति सुरान्परा
र्द्धकुसुमैरर्चंति किंचातिथीनन्नैः किंतु पुरातनैस्तनुमम्री पुष्यंति दुष्यंत्यतः॥५०॥ तु ननिरूप्य सविस्मयम्॥ कष्टमेतद्देशवासिनीनां विलासिनी
नां लज्जाव्युत्पत्तिराहित्यम्॥ तथाहि॥ अपिहृतचोलवासैस्थैर्यं वतीनां चिराय युवतीनां॥ अपकंचुलिकास्तनमंडलमाविति विरुद्धमुपलब्धम्
॥५१॥ किंच॥ अगूढगाढस्तनकुंभिकुंभमंभोजदंभोद्यजैन्न नेत्रं॥ चित्ते निधत्तेव तच्चोलदेशस्त्रैणप्रवीणं रतिकौतबाणं॥५२॥ अपि च॥ नवा
र्षि हेलं सवेनतु सहस्रशः संगता गृहाद्बहिरशंकितं गदितकामगाथा श्रुताः॥ अहार्यकठिनस्तनप्रकटनाद नागस्विनो मुनेरपि घनांधू
तिं चुलकयंति चोलांगनाः॥५३॥ वि०॥ वयस्य मास्म निंद चोलमंडलवासिनो जनान्॥ यान्भिः सर्वपदार्थेषु द्विरुदिता तास्वपक्षे देवार्पितं नि

टी० १...विरी २ अतनोः कामस्य बाणाः पक्षे अतनुर्महान्वायुः ३ पल्लवितसर्पः ४ नद्यां ५ वस्त्रं वसतिश्च ६ स्त्रीसमुदायः ७ अगस्त्य ८ प्रसूनिमितामिव स्वल्पां कुर्वंति॥

क्षिप्तं निःशीरक्षितं शुचिहविर्भक्ष्येत चेत्काक्षतिः॥ त्याज्यं शास्त्रनिषेधतस्तदिति चेत्त्याज्यं सतैलं वतज्ञोज्यं पर्युषितं स्मरंति यदतो योज्यं नतत्तद्
र्पणे॥५४॥ ग्रांतिव्रत्यमुपेत्य नित्यमनघाचारावदातात्मनां चोली नांयदि कंचुकीनकुचयोर्मोलीमसीकाततः॥ नारीणां स्फुरतो पयोग्यवयवे
स्पष्टेशूतिदोषइत्यकृतं चेद्धरापिधानमपि किं नस्यात्तदावाससा॥ ५५॥ पार्श्वतोवलोक्य सश्लाघम्॥ अस्य देवस्य भाग्यवत्ताखल्वियत्ता
परित्यक्ता॥ यतोत्र॥ मणिमयफणितल्पेमल्लिकापुंजकल्पे शमितजगदभद्रां संश्रयन्योगनिद्राम्॥ दे हरकुहरवर्तीं देवताचक्रवर्ती दलि
तदुरितबाणेदृश्यते कुंभकोणे॥५६॥ अंतर्नागरिकिंजनतामवेक्ष्य सस्मिरःकंपम्॥ स्नात्वासह्यसुतं ... तमाभूत्वाजपादिक्रमेहु
त्वाग्नौ च हविः कृतैतरगिरां कृत्वा च पारायणं॥ नत्वाशार्ङ्गधरंभवामयहरं स्तुत्वा च तं भक्तितः श्रेष्ठाः कालमनीक्षिपंति बहवः श्रीकुंभकोणे
द्विजाः॥५७॥ इतश्च॥ कुटीषु गोपीरुचिरासु यो र्कभूतटीषु गोपाल इति श्रुतश्चरत्॥ अकंपकारूण्यमुपेत्य मोदते स चंपकारण्यमगण्य
वैभवः॥५८॥ अत्र किल राजगोपालपादकमलमुपाश्रयतः साधुजनस्येत्थमनुसंधानम्॥ कोपाटोपदशाविशालपरुषालापादिरूपाशुभ
व्यापारस्तदपितार्थिलोकहृदये भूपालपीशोरलम्॥ तापाविष्टसकृत्प्रपन्नजनसुरव्यापारलोदीक्षितपापानामपनोदनाय कुहनागोपालमे
वाश्रये॥५९॥ कृ०॥ अत्रापि मम विरोध एव प्रतिभाति॥ यतः॥ न्यस्तपादः स्फ... शीर्षेषु मधुहा यहो॥ मुरारातिर्हि रेफोपि चंपकारण्यमा
श्रितः॥६०॥ वि०॥ विरूक्षानामपि सहावस्थिति संपादकेदेवे वासुदेवे कानाम विरोधकथा॥ यस्मिन्विलोचनतमासह पुष्पवंतौ पर्यंकवाहन
तयाफणिपक्षिराजौ॥ तेजस्विनौ प्रमुदितौ स्थितिमाश्रयंते तस्मिन्नहो भगवति क्व विरोधगंधः॥६१॥ इतिपरिक्रम्यावलोक्य प्रांजलिः॥ प
रिगतसत्कारैः प्रांशुभिर्नारिकेलैर्दिनकरकरधारादुष्प्रवेशांतरंभ्यः॥ चुलकितदुरितेभ्यश्चोलदेशस्थितेभ्यो नम इदमखिलेभ्यो नाथ दिव्य
स्थलेभ्यः॥६२॥ कृ०॥ भवतु तवैतेषु नमस्कर्तृता॥ ॥टि०॥ १ आकाश २ वेदानां ३ यमुना ४ दूरीकृतैः ५ दैत्यमकरंदश्च ६ ... ७ अत्र चौर्यपरैः॥ ॥ ॥

वि॰ इ॰ [illegible]तुदेवलकादिदेवालयोपजीविदुराचारात्॥ लोकयतो न भवति नमश्चिकीर्षा॥ तथाहि॥ वारस्त्रीकुचमर्दिभि[illegible]यंस्यह्योदिदानैकैरस्त
हूटीरसवासितैश्च वदनैर्जल्पंति मंत्रानमी॥ द्रव्यं देवलकाहरंत्यचकितो देवस्य तत्पूजितास्ते ताः कप्रतिमाः कहे॥ भविताकिंदेवतासन्निधिः॥
॥६३॥ किंच॥ आघ्राताबतपुण्यपयोवतकचानोकमैसंध्यादिकैयैरभ्यस्तमभूदसभ्यवनं तत्त्वेव वेदाक्षरम्॥ अधश्चोयैपरैर्दुरन्वयभवैः सूदैर
मीभिः कृतान्यन्नादीनि निवेदितानि भगवानंगीकरोत्येष किम्॥६४॥ विमृश्य॥ अहो कलिमहात्म्यादखिलजनानामनिवार्यो विवेकविपर्ययः॥
सद्भिः स्वादरतोऽर्पितानि हरये सत्त्वोत्तरैर्भूसुरैरन्नान्यत्र न मानयंति विधिवित्सिद्धान्यवृद्धा अपि॥ देवस्यायतने स्वदंति विभयाः श्राद्धैः कृतानो
दनात्स्पृष्टान्दुष्टजनेन कष्टमखिलैर्दृष्टान शिष्टाल्हतान्॥६५॥ वि०॥ मादृशेभ्यो हि दिव्यक्षेत्रमहात्म्यवेदिभ्यो भवदीयमत्र दूषणं न रोचते॥
यतः॥ उपस्पर्शस्नानादुचितशुचिताशालिवपुषो विनीताः स्वे शास्त्रे विगतवृजिनाः पूजकजनाः॥ परित्रातुं लोकान्विधिवदपतंद्रानु विदधते प
वित्रैरन्नाद्यैः परमपुरुषाराधनममी॥६६॥ आकर्ण्य तामिदमपि यद्भ्युपगम्याप्यभिधास्यामि रहस्यम्॥ विधिवदविधिवद्वा भक्तितो भक्ति
तोऽज्ञानतो वा शुचिरशुचिरवो नाथमर्चंत्विहस्थाः॥ अनुदिनमुपयातैरर्च्यमानाः कदाचिद्रुचिरजितमूर्तिर्नास्तिकस्यास्तिकस्य॥६७॥ इदं चावधे
यं॥ केचित्त्वक्षधरापराधचकिताः क्ष्मापालभीताः परे श्रद्धातः कतिचित्पचंत्यवहिताः शुद्धाश्च दिव्यं हविः॥ अग्रे न्यस्तमिदं सुदेवभगवा
न्लोकनैः स्वीकरोत्यह्नः संहरणास्य पाचकृदिदं प्राश्नंति भाग्योत्तराः॥६८॥ पश्य तावत्त्वानुभवसि द्वौ प्रकर्षान्विशेषौ भगवदायतननन्नदित
रस्य तूपरिकल्पितयोरन्नयोः॥ उपस्कारैः स्फारैरुपचितरसामोदभरसम्यवे सन्नं गेहे कृतमनतिभोग्यं बुधजनः॥ अभूपः संस्कारिण्यपि
हविषि देवस्थलप्रभवे त्वनल्पं भाग्यत्वं पुनरघहरत्वं च मनुते॥६९॥ इदं च बोद्धव्यं॥ देवागारनिषेविणः किल जनाद्दुष्यंतु शुद्धं तु वा तेमी॰
स्वामिपरिग्रहेण नियतं मान्या मनीषाजुषाम्॥ ॥टी०॥ १ पाककर्त्तारः २ सात्त्विकगुणवद्भिः ३ संस्कारहीनः ४ विष्णुः ५ भाग्यशालिनः ६ बहुभिः ७ मन्यते ॥ ॥

प्रायेणाश्रयगौरवेण लभते हीनोपि मानार्हतां कुब्जः क्लीबमुखो जनोपि भजते पूजां हि राजाश्रयात् ॥७०॥ इत्यन्यतः परिक्रामन्नग्रतो विलोक्य सहर्षं
सांजलिबंधम् ॥ पांतु पातकिनो जनान् शरणान् पातुं तमः सागरं यातुं पातुपुरीमरीन् रणमुखे जेतुं दशास्यादिकान् ॥ नेतुं भूतनयां मुदं विरहि
णी मे तुं यशः प्राग्भवं तदा तुं शर्मं च राघवेण रचितं सेतुं नमस्कुर्महे ॥७१॥ हंत कठिनानामप्यनुबंधेन नेप्रीतिरतिमहती ॥ यतः ॥ लंकापुरं पंक्तिमु
खेन रुद्धां भूमिस्फुतां भूमिभृतोनुबंधात् ॥ पतिं पुनः प्रापयितुं पयोधौ सेतूभवंतः स्वयमाप्लुवंति ॥७२॥ निरूप्य ॥ पयोधिमध्ये प्लवमानमूर्त्तयस्तरं
गवेगार्पितफेनचिन्हिताः ॥ हसंति किं मंदरमंतरर्णवं निमग्नमेतेन लसेतुभूधराः ॥७३॥ पुनर्विमृश्य ॥ लंकापुरावासिरघूद्वहारिसंपर्कपापादि वसिं
धुराजः ॥ सपक्षभूभृन्निविडांतरोपि विपक्षभूभृद्भिरबंधि कष्टम् ॥७४॥ शुद्धाः संश्रितधर्मसेतवइमे सोढोग्रवर्षातपाः स्थित्वा सिंधुजले सदा क्षिति
भृतो घोरं तपः कुर्वते ॥ नृत्यंतीरिह नित्यमेव लुलिताः स्तीक्ष्णैरतन्वांशुगैर्लावण्यं दधतीः कदापि न चलंत्यालोक्य वीचीरमूः ॥७५॥ क्षणमपि ध्या
यन् अंजलिं बध्वा ॥ अस्तोकदृप्तिरपि वारिधिरेष यस्मात् त्रस्तो बिभर्त्ति विपुलोपलसांद्रसेतुम् ॥ गोपायते दुरितवंति जगंति तस्मै कोपाय तेरघुप
तेमहते नमोस्तु ॥७६॥ क्रु० ॥ साक्षेपम् ॥ काकुत्स्थकोपचकितः कमितानदीनामासीन्नदागुरुनयप्लवनार्हतोयः ॥ शाक्यस्तदेषतरितुं हरिभिः पदा
भ्यां किं वा फलं कथय सेतुकृतिश्रमस्य ॥७७॥ विम्वा० ॥ तत्कथितमेव भया भवतां तु न सम्यगवधारितम् ॥ शृणुत र्हि पुनः सावधानम् ॥ अंभोराशिं
वानराः लंघयंत्विति तद्व्याजीकृत्य राजीवनेत्रः ॥ अंहोराशेर्लंघनार्थं नराणामंभोराशौ सेतुमुच्चैरबध्नात् ॥७८॥ पुनर्निरूप्य ॥ न सागरोसौ नभ एव फेनव्र
जानच्चामी विपुलोडुवर्गाः ॥ न सेतुरेषोपि निशाचराणां नृपातकानामपि धूमकेतुः ॥७९॥ पश्यात्र जलचरभ्रमचमत्कारः ॥ गजेन्द्रबुद्ध्या नलसेतु
शैलान् ग्राहाग्रसंते जलधौ वसंतः ॥ तद्भासजायासमुत्थदंष्ट्राव्याधाः प्रधावंति यथागतं ते ॥८०॥ पुनर्विचिंत्य ॥ डिंडीरखंडान् वपयां डुराभं द्राघिष्ठ
वैः परिणाहवंतं ॥ काकुत्स्थसेतुं कलयंगुणाढ्यं धौतोत्तरीयं धृतमर्णवेन ॥८१॥ १पक्षरहिताः पक्षवंतः २कामबाणैः बहुभिर्बाणैर्भिः ३सौंदर्य ४सारत्वं ४विशालता ॥ ॥

वि·र [illegible] हा॥ चिराङ्कुराभूरिभरार्तमूर्त्तिर्हरित्करिष्वर्पितनैजकृत्यः। श्रमस्यायार्णववारिशीतेशेतेसकिंसेतुमिषेणशेषः॥८२॥ विमृश्यसश्लाघम्॥ यःपु
रापापदशकच्छेदसाधनतांगतः॥ ससेतुर्नकथंशक्तःपापपंचकभंजने॥८३॥ इतिपरावृत्यअन्यतोवलोक्यसामोदम्॥ तापंविलुंपतिनृणामिहता
म्रपर्णीसारव्यांवहन्नघदवानलजृंभणोत्थाम्॥ पाथोनिधेस्त्विजगतिप्रथितोवरोधोरोधोल्लसत्सरमहर्षेमहर्षियूथः॥८४॥ तदभ्यर्णनिर्वर्ण्य॥ चका
स्तिकुरुकापुरीशुचिनिताम्रपर्णीतटेविरक्तपरिपक्तिमन्त्रियुगभक्तिभिर्वैष्णवैः॥ दृढव्रतशठारिणोवकुलसंपतद्भरध्वनिह्रीगुणाज्जृंभणद्द्रविडवे
दघोषोज्ज्वला॥८५॥ अत्रत्यानांहरिभृत्यानामित्थमनुसंधानम्॥ परिदृष्टवतेसहस्रशाखापरंद्राविडसंहितांहितांनः॥ गुरवेकरवामनित्य
मस्मैशठकोपायमहर्षयेप्रणामान्॥८६॥ अंचामचिंचातरुमङ्घ्रितंतंपंचामरद्रूनवधीरयंतम्॥ शठारिसंज्ञंकिलयस्यमूलेतपःफलंकिंचिददुर्द
र्चितनः॥८७॥ दिशन्नश्रितानाममृतात्मकंफलंविलक्षणोभातिसतिंतिणीतरुः॥ सहस्रशाखंद्रविडागमंसृजन्नपस्यमूलंसमुपाश्रितोमुनिः
॥८८॥ हरिमिवकृतवितरणंवकुलाभरणंवृणीमहेशरणम्॥ ध्येयंयंविदुरार्यामुमुक्षुभिर्यत्प्रबंधमध्येयम्॥८९॥ तस्मिन्प्रतिमैस्तत्रदृष्ट्वाशठारे
गायंतउच्चैरिहयस्यगाथाः॥ प्रह्लायदेहप्रथयंतिदिव्येपदेह्येमन्नादइतिप्रगीतम्॥९०॥ कृतदुरितनिरोधानांकलितक्षतिमौलिभाववोधानां
॥ वशितरमानांथानांनसुधापिसमाशठारिगाथानाम्॥९१॥ जनानुद्दिश्य॥ कठिनशठनरेन्द्रस्तावकान्श्लोकपाशान्जठरपिठरपूर्त्यैजातुमा
स्तंभदिष्ठाः॥ लुठितहठतमस्कैमाचसंस्कारकूपेपठतशठजिदुक्तीःश्रमानीतमुक्तीः॥९२॥ कृशानुमामंत्र्य॥ ननुशठकोपायत्वंप्रणतिप्राप्ताप
भावुकोपायत्वम्॥ विमलमतेकुरुकायान्निरसितुमंहोविराजतेकुरुकायाम्॥९३॥ किंच॥ वकुलाभरणीयानांगाथानांसन्मुखेनभरणीयाना
न्॥ हरिगृहमध्येतारस्वरेणपुनतेप्रपंचमध्येतारः॥९४॥ सश्लाघं॥ विरक्तैरास्थानीमधुमशनभक्तैर्नेत्रैर्नभूर्विमुक्तैर्निश्रेणीसुकृतपरिपक्तेःफलमसौ॥
टी० १ पापीयोदशकोदशमूर्धारावणः पंचमहापातकानिस्वल्पानिपंच २ अल्वारितिर्नहरीतितद्देशप्रसिद्धिः ३ विष्णुः ४ धिक्कुर्वंतं ५ एतन्नामकपुर्याः ६ उच्चस्वरेण ७ राजधानी ८ रंगभूमिः॥ २८